# पाशुपततन्त्रम्

## अथ ज्ञानकाण्डम् ः

### अथ प्रथमः पटलः

एकापि या विभाति व्यासाराकारनामाभिरनेकेव।
सहमानन्दसुधाद्रां शिवचन्द्रकलां नमामि तादृशीम्।।1।।

त्रयम्बकं च सुखासीनं दधीचो नन्दिकेश्वरम्।
पप्रच्छ सर्वधर्माणामुत्पत्तिं मुनिपुङ्गवः।।2।।

**दधीच उवाच**

उत्पत्तिं सर्वतन्त्राणां तत्त्वानां चैव लक्षणम्।
स्वरूपं शिवतन्त्राणां शिवयागं च मे वद।।3।।

**नन्दिरुवाच**

स्मृत्वा हृदि शिवं शान्तमणीयांशमणोरपि।
प्रोवाच भगवान्नन्दी तन्त्रोत्पत्तिं समागमम्।।4।।

शिवस्य धाम्नश्शिवशक्तिरासी-
तस्माच्च नादो हि ततस्स विन्दुः।
वर्णत्रयान्तरविभेदितां च
अनादिकेभ्यश्शिवमूर्त्तयस्स्युः।।5।।

**ईश उवाच**

पुरुषो घोरो वामः सद्यश्च मूर्त्तयः पञ्चकाभिश्शिवदेहं स्यात्ताभिर्वक्त्राणि पञ्च जातानि।।

अष्टाविंशति रुद्रा जातास्तन्त्रैः सहास्य वक्त्रेभ्यः।
वक्ष्ये नामान्येषां सिद्धान्तानां क्रमेण नामानि।।6।।
प्रणवं तिलकं चैवं हरत्यकर्मकसञ्ज्ञकः।
सुधामा चैव पद्मश्च प्रभुर्योगः प्रकीर्त्तितः।।7।।
देवोद्भवं च विजयमीशानं विजयोत्तमम्।
पारमेश्वरहंसौ च मतङ्गं यक्षमेव च ।।8।।
एते रुद्राश्च सिद्धान्ताश्शिववक्त्रसमुद्भवाः।
अचिन्त्यो दीप्तिमांश्चाथो गोपतिश्चाम्बिकापतिः।।9।।
सुशीलो वीरमेकाग्रं पुष्करं वामनं तथा।
अघोरं पौरुषाद्वक्त्रात्सञ्जातास्ते च (षट् स्मृताः)।।10।।
जितन्तः सोममीशानमीश्वरश्च त्रिमूर्त्तिमान्।
सिद्धमन्त्रं मुखं बिम्बं विन्दुं चण्डेश्वरं पुनः।।11।।
शिवनिष्ठमघोराख्याद्रुद्रास्तन्त्रैश्च दक्षिणात्।
भवश्चैवान्तकः सूर्यो विराडिन्दुश्च पञ्चमः।।12।।
पद्मोद्भवमनन्तश्च वीरभद्रमनन्तरम्।
मार्त्तण्डं भैरवं साम्नं पञ्च वाममुखोद्भवाः।।13।।
अग्निः प्रजापतिः सोमः क्ष्मा धर्मः काम एव च।
शांशपायनसन्तानौ किरणं ललितं तथा।।14।।
भैरवं पाश्चिमाद् वक्त्रात्समुत्पन्ना महात्मनः।
अशृण्वन् रुद्रशिष्यास्ते ततो ब्रह्मर्षयोऽमलाः।।15।।
देवश्चतुर्मुखः पूर्वमुशना परमेश्वरः।
कण्वः कचश्चण्डसेनो भार्गवः कपिलस्तथा।।16।।
नृसिंहः सत्यको देवगुरुश्च वरुणश्शशी।
ब्रह्मा यमस्त्वगस्त्येन्द्रवसिष्ठाख्यास्सभैरवाः।।17।।
जमदग्निर्गौतमश्च संवर्त्तकमरुद्गणाः।
पराशरस्सौरभेयो देवेशोऽप्यहमेव च।।18।।

मार्त्ताण्डः साम्ब इत्येते श्रोतारः परिकीर्त्तिताः।
तस्मात्तस्मात् सारभूतमुद्धृत्योद्धृत्य ते पुनः।।19।।
आलोक्य सर्वतन्त्राणि किन्नरा नारदादयः।
ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा।।20।।
नारदीयन्तु मार्त्ताण्डमाग्नेयं तु भविष्यकम्।
ब्रह्मवैवर्त्तकं लैङ्गं वाराहं स्कान्दमेव च।।21।।
वामदेवं तथा कौर्मं याम्यं गारुडमेव च।
ब्रह्माण्डमिति चोक्तानि क्रमादष्टादश द्विजाः।।22।।
विद्याभिश्शाब्दमुद्दिष्टं तां प्रवक्ष्ये समासतः।
अङ्गानि चतुरो वेदा मीमांसान्यायविस्तरः।।23।।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश।
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।।24।।
अर्थवाक्यश्चतुर्थस्तु सर्वतत्त्वप्रकाशकः।
निरुक्तं च तथा शिक्षां छन्दो विचितिरेव च।।25।।
कल्पं व्याकरणं ज्योतिषडङ्गं परिकीर्त्तितम्।[1]
उत्पादितेषु तन्त्रेषु भूयो देवमुखाम्बुजात्।।26।।
सर्वतन्त्रार्थसंयुक्तं चतुष्पादसमन्वितम्।
तन्त्रं पाशुपतं नाम क्रियासममभून्मुने।।27।।
तदिदानीं प्रवक्ष्यामि श‍ृणुष्व वदतस्तु तत्।
सर्वार्था येन तन्यन्ते त्रायन्ते च भयाज्जनाः।।28।।
इति तन्त्रस्य तन्त्रत्वं तन्त्रज्ञाः परिचक्षते।
प्रणेतृत्वात्पशुपतेस्तदीयज्ञानकर्मणोः ।।29।।
साधकत्वेन वा शास्त्रमिदं पाशुपतं विदुः।
आप्तप्रोक्ततया चास्य प्रामाण्यं परिकीर्त्तितम्।।30।।

---

1. प्रारम्भतोऽत्र पाठः 'क' 'ख' मातृकयोर्नास्ति।

तदिदानीं प्रवक्ष्यामि शृणुष्वावहितोऽनघ।
स्थण्डिले मण्डले चाग्नौ तोये च हृदि योगिनाम्।।31।।
यजनं तस्य वै प्रोक्तं लिङ्गे वा तत्क्रमं ब्रुवे।[2]
एष्टव्यो यजमानेन प्रतिष्ठानन्त्यमिच्छता।।32।।
आचार्यस्सर्वतन्त्रज्ञस्तस्य लक्षणमुच्यते।
ब्राह्मणेन च ब्राह्मण्यामुत्पन्नः कुलजो युवा।।33।।
गर्भाधानादिसंस्कारैः स्वकीयैरपि संस्कृतः।
विनयोऽतिविशुद्धिश्च विद्यावृद्धं तपोवनम्।।34।।
अर्थशौचं मनश्शौचं कुलमित्यभिधीयते।
दीक्षाभिषेकवाञ्छान्तो गृहस्थः पण्डितोऽग्निभृत्।।35।।
गुरुदेवोऽग्निशुश्रूषुस्सामान्यं पण्डितैरपि।[3]
आचार्यो मूर्तिपैः सार्धं पूर्वं तं वरयेद् गुरुम्।।36।।

सिद्धान्तसिद्धं विजितेन्द्रियं च
भक्तं शिवे सर्वगुणैः समृद्धम्।
कार्पण्यहीनं गुरुभक्तमिष्टं
क्रियासु दक्षं सुकुलेऽभिजातम्[4]।।37।।

आसने वस्त्रसंवीते निवेश्य शिवदेशिकम्[5]।
[6]अष्टमूर्त्तिमयानष्टौ कृत्तिवा[7]सं निवेशयेत्।।38।।
पाद्यादिभिः समभ्यर्च्य दत्वा च घृतपायसम्।
भुक्तेषु तेषु दत्त्वार्घ्यं प्रदाय[8] गुरुदक्षिणाम्।।39।।

---

2. 'क' 'ख' मातृकयोः 30-31 1/2 पद्ययोः पाठो नास्ति।
3. 'क' 'ख' मातृकयोः 33-35 1/2 पद्ययोः पाठो नास्ति।
4. 26-37 श्लोकानां पाठः 'ख' मातृकायां नास्ति।
5. 'क' मातृकायां 'देशिकम् पाठो' न वर्तते।
6. 'क' मातृकायां पाठो विलुप्तः कीटदंशत्वात्।
7. मूर्त्तिमान्-ग
8. 'क' मातृकायां पाठ एष न विद्यते कीटभ्रंशत्वात्।

वरयेत्कार्यमुक्त्वादौ शिवगायत्रिया गुरुम्[9] ।
मूर्तिपान् मूर्तिमन्त्रैस्तु नत्वा तान्वरयेत्पुनः।।40।।
[10]क्षमाग्नियजमानार्कवारीरणनिशाकराः ।
व्योमान्ता मूर्तयस्त्वेता[11] निर्दिष्टास्त्रिजगत्पतेः।।41।।
क्षितिर्वै धार्यते लोका लोकाः क्षितिमया स्मृताः[12] ।
सर्वगं क्षितिरूपं ते क्षितिमूर्ते नमोऽस्तु ते।।42।।
धार्यते आत्मा यजति यज्ञानि लोका[13] यज्ञमयाः स्मृताः।
अग्निर्वै-सूर्यो वै-जलं बलं वै-वायुर्वै सोमो वै।।43।।
आकाशो धार्यते लोकांल्लोकाकाशमयाः स्मृताः।
आकाशं सर्वगं रूपं मूत्र्याकाश नमोऽस्तु ते।।44।।
गुरुश्च मूर्तिमान्भूयः[14] पाणिमालभ्य दक्षिणम्।
वरयेच्च पुनस्सर्वे वदेयुश्च तथास्त्विति।।45।।
शिल्पिनं वरयेत्पश्चात्कार्यमुक्त्वाप्यनन्तरम्।
[15]प्रयतो यजमानेन गुरुः कर्माणि कारयेत्[16] ।।46।।

**इति पाशुपते नन्दिप्रोक्ते प्रथमः पटलः॥**

---

9. गुरुः-ख, गुरुमूर्त्तिपान्-ग
10. ग्नि-ख
11. मूर्त्तयो ह्येताः-ख
12. मयाः-क
13. लोको यज्ञमयः स्मृतः-क
14. मूर्तिपान्-क
15. प्रार्थितेन-क
16. अन्तिमे द्वे पद्ये-'क' मातृकायां न स्तः।

# अथ द्वितीयः पटलः

## दधीच उवाच

सिद्धान्तैः सकलैः शुद्धैर्यत्तत्त्वमुपपादितम्।
तत्तत्त्वं तत्त्वतो मेऽद्य वद भो नन्दिकेश्वर।।1।।

## नन्दिरुवाच

अध्वानं सम्प्रवक्ष्यामि शिवतत्त्वसमन्वितम्।
येन विज्ञातमात्रेण शिव एव भवेद् गुरुः।।2।।

शिवः पशुपतिः प्रोक्तः पशवो ह्यणवो मताः।
ते पाशबद्धाः पशवः पाशस्स्यादध्वसञ्चयम्।।3।।

शिवात्परतरन्नास्ति परात्परतरं शिवः।
सिसृक्षुरखिलां सृष्टिमसौ देवस्सनातनः।।4।।

ज्ञानात्मना शिवा[1] शक्तिमधिष्ठाय विलोक्य खम्।
शक्त्या कारणभूतन्तु सूक्ष्मनादमजीजनत्।।5।।

ततो बिन्दुस्सहस्त्रार्कद्युतिस्तस्मात्सदाशिवः।
स्थूलनादात्मको जज्ञे सृष्टिर्नानाविधानतः[2]।।6।।

स्थानसंयोगभेदेन जाता वर्णास्तु नादतः।
क्रमेण नववर्गस्थो वर्णाध्वा यः[3] प्रकीर्त्तितः।।7।।

समासव्यासभेदेन युक्तैर्वर्णैर्यथाक्रमम्।
ततः पदानि जातानि पदाध्वायमिहोदितम्।।8।।

---

1. ज्ञानात्मनाच्छिवाशक्ति-ख, क्रियाशक्तिम-ग
2. विधाततः-ख
3. वर्णाध्यायं-ख, ध्याये-क, दशवर्गस्था वर्णाध्वा-ग

देवतावचनैरेभिः पदैर्युक्तैः पृथक् पृथक्।
सर्वमन्त्रान् क्रमाज्ज्ञात्वा मन्त्राध्वायः प्रकीर्त्तितः।।9।।

पुनः सदाशिवादीनि तत्त्वानि सकलान्यपि।
पृथिव्यान्तानि जातानि तत्त्वाध्वेति विदुर्बुधाः।।10।।

कलयन्त्यखिलां सृष्टिं क्रमात्तस्यैव शक्तयः।
जाता कलाख्या विज्ञेयाः कलाध्वेति विचक्षणैः।।11।।

ब्रह्माण्डोदरसंस्थानि भुवनानि चतुर्दश।
नरकानन्तयुक्तानि भुवनाध्वेति च स्मृतः।।12।।

शिवादेवाखिला सृष्टिरेवं जाता यथाक्रमम्।
स एव सकलो ज्ञेयो न तदन्यं महेश्वरात्।।13।।

सूक्ष्मा च निर्मला नित्या शान्ता निर्वाणरूपिणी।
सा विजृम्भति सृष्ट्यर्थं शिवसंयोगकारणात्।।14।।

शक्तिशक्तिमतोर्योगात्त्रिधा भवति सा पुनः।
इच्छा ज्ञानं क्रिया चेति बिन्दुनादकलामयी।।15।।

शक्तिशक्तिमतोर्योगाज् ज्ञातश्चायं सदाशिवः।
सदाशिवस्य देवस्य योगपीठं ततो भवेत्।।16।।

तस्य तस्य क्रमादन्त[4]दीपाकारैष्षडक्षरैः ।
दीपिते तु ततः शान्ते यत्तद्योगासनं विदुः।।17।।

परं सदा शिवं तत्त्वं विद्या सकलनिष्कला।
सृष्टिरुत्पद्यते तस्मात्तस्मिन्नेव च लीयते।।18।।

ईशादि पञ्च ब्रह्माणि वामाद्याश्शक्तयो नव[5]।
विद्येश्वरास्तथा [6]चाष्टौ मन्त्राणां [7]सप्तकोटयः।।19।।

---

4. दीपाकारै-ख
5. द्वितीयपटलस्य 01 श्लोकतः 17 1/2 श्लोकपर्यन्तपाठः 'क' मातृकायां न वर्तते।
6. धिष्टो-क
7. सप्तमोतयः-क

विद्यायां संस्थिता ह्येते विद्याधिपतिरीश्वरः।
दिव्यस्रग्गन्धरत्नाढ्या मातृकावर्णभूषणा[8] ।।20।।
आद्या त्वजा महादेवी नीलकुञ्चितमूर्धजा[9]।
आलोलनीलनयना सेन्दुवद्धा[10] मनोरमा।।21।।
वरदाभयहस्ताढ्या नीलोत्पलसमप्रभा।
देवाज्ञया पुनर्देवी सन्निधिं योनिशोधने।।22।।
करोत्यृतुमती[11] तत्र न जातो जायते पुनः।
सोमा विभज्य चात्मानमष्टधा दिक्क्रमात्स्थिता।।23।।
ईश्वरोऽपि[12] तथा भुक्त्वा तत्र तत्र व्यवस्थितः।
वामाद्याः शक्तयो ज्ञेया रूद्रानन्तादयः स्मृताः।।24।।
आत्मतत्त्वं तयोर्योगादीशानश्चाधिपः स्मृतः।
चतुर्विधमथात्मानं चतुर्मूर्तिसमन्वितः[13] ।।25।।
आत्मा चैवान्तरात्मा[14] च परमात्मेति सञ्ज्ञितः[15]।
सद्यादयोऽधिपास्तेषां निवृत्त्यादि[16] च शक्तयः।।26।।
मायादिसर्वतत्त्वानामात्मतत्त्वं तु[17] कारणम्।
एकमेव परं तत्त्वं पञ्चधा परिकीर्तितम्।।27।।
प्रतीयते[18] हि बहुधा व्यापाराकारनामभिः।

---

8. ख्यामातृकावर्णभूषणा, इति पाठः 'ख' मातृकायां नास्ति, भूषिता-ग
9. 'ख' मातृकायां पङ्क्तिर्नास्ति।
10. एतावत्पाठः 'ख' मातृकायां न वर्तते, सेन्दुखण्डा-ग
11. एष पाठः 'ख' मातृकायां नास्ति, क्रमोन्त्यृतुमयी-क
12. रैश्वरो-'क'
13. समन्वितम्-'ख', मूर्त्तिभिरन्वितम्-ग
14. वै वान्तरात्मा-क
15. परमं ज्ञानसंज्ञकम्-ख, परमो ज्ञानसञ्ज्ञकः-ग
16. मूत्र्यादि-'क'
17. हि-'ख', कारणं परमार्थतः-ग,
18. प्रदीयते-'क'

शुद्धानि पञ्च तत्त्वानि शुद्धाशुद्धानि सप्त[19] वै।।28।।
अशुद्धानि चतुर्विंशदेवं[20] षट्त्रिंशदीरितम्।
ततो मायामयं तत्त्वं पाशत्रयसमन्वितम्[21] ।।29।।
अभिलाषा समस्तेषु शरीरं कर्मणः[22] फलम्।
इन्द्रगोपमुख[23] प्रख्यमिन्द्रजाल[24] वदुत्थितम्।।30।।
अयुतार्क[25] समं शुद्धं रश्मिजालैस्तिरोहितम्।
यद्वत्ताम्रगतं काष्ण्यं तुषबिन्दुकवद्विदुः।।31।।
[26]गहनश्चाप्यसाध्यश्च दशैशानो हरस्तथा।
त्रिलोकी गोपतिर्माया या स्ते चाधः [27]स्फुटस्थिताः।।32।।
क्षेमीशो ब्रह्मणः स्वामी विद्येशानः शिवस्तथा।
विद्येश्वरश्च मायायास्त्वनन्तश्चोर्ध्वतः[28] स्थिताः।।33।।
मध्यस्थः कुरुते नन्दी सृष्टिं संहारमेव च।
स्वेच्छया च विभुस्तस्यां[29] व्यष्टिशो हि महेश्वरः।।34।।
ततः समभवत्कालः सर्वलोकान्तकृत्प्रभुः।
भ्रुवौ[30] च पिङ्गले तस्य श्मश्रूणि स्युः[31] सितानि च।।35।।

---

19. 'क' मातृकायां पाठो नास्ति।
20. चतुस्त्रिंशदेवं-क
21. 'क' मातृकायां पाठो नास्ति।
22. कर्मणां फलम्-'ख'
23. निभ-ख, निभं चित्तं-ग
24. वदुत्थितः-क
25. अतार्क-क, ख मातृकायां पाठ एवं नास्ति, निभं पूर्णं-ग
26. गगन-ख, ग
27. पुटे स्थिताः-ख, ग
28. यात्वनन्तश्चोर्द्धगस्थिता-ख, पुटः-ग
29. पितुस्तस्याप्यधीशो-ख, व्याधीशो-ग
30. रूपौ-ख, ध्रुवौ-ग
31. स-ख

दंष्ट्राकरालो घोरास्यः[32] कलजीमूतसन्निभः।
रुद्रः परिवृतो क्रूरैर्दशभिर्दशदिग्गतैः[33] ।।36।।
उच्छुष्टश्चापरो यामः क्रोधनो [34]बडबामुखः।
घोररुद्रो भुलुभुलुर्वटरुद्रोऽतिभीषणः।।37।।
चण्डरुद्रस्थूलगलस्तथा [35]मातङ्गवक्त्रकः।
तदधीशोऽप्यजेशस्तु मायातश्चाभवत्कला[36] ।।38।।
नीललोहितवर्णाभा नित्या सर्वानुबन्धिनी[37]।
मन्त्रकोटिसमायुक्ता ह्यष्टत्रिंशत्कलान्विताः।।39।।
अष्टौ त्रयोदशाष्टौ च चतस्त्रः पञ्च एव च।
अष्टत्रिंशत्कलाः प्रोक्ताः सद्यादीनां[38] विभागतः।।40।।
तावत्यः शक्तयो ज्ञेयाः स [39]द्यादीनां तथैव हि।
शशिनीलाङ्गदा[40] चेष्टा मरीचिर्ज्वालिनीति च।।41।।
शान्तिर्विद्या प्रतिष्ठा च निवृत्तिः पौरुषी स्मृतः।
तमो मोहा क्षमानिद्राव्याधिर्मूर्च्छा क्षुधा तृषा।।42।।
राजा रक्षा रतिःकामा[41] क्षमा भूयो हि संयमी।
क्रिया सन्ध्या च धार्या च रात्रिर्वै भ्रामणी[42] परा।।43।।
मोहिनी च तथा श्रीश्च[43] वामदेवस्य शक्तयः।

---

32. घाराः स्युः-क
33. रुद्रैः परिवृतैः क्रूरैद्रदशभिद्शभिगतैः-ख, दशभिश्शतैः-ग
34. वद्धवा-ख
35. मातंकावत्तताः-क
36. माया तन्वा भ.........क
37. 'क' मातृकायां पङ्क्तिर्नास्ति कीटदंशत्वात्।
38. सत्यादीनां-ख
39. सद्वादीनां-ख
40. शशिनीचाङ्गदौ-ख
41. कमा-क
42. भामनीवरा-ख
43. स्त्रीश्च-क

सिद्धिरृद्धिर्धृतिर्मेधा[44] कान्तिः प्रज्ञा स्वधा क्षमा।।44।।
विघ्नश्चण्डो वृषः स्कन्दस्तथा भृङ्गीरटी[45] स्थिताः।
एता एते कलातत्त्वे विगृहीशोऽधिपः स्मृतः।।45।।
मायातो नियतिर्जाता[46] नियमान्नियतिः[47] स्मृता।
वामो ज्येष्ठश्च रुद्रश्च कालश्चैव कलस्तथा।।46।।
विखनोऽथ बलश्चैव[48] बलोऽपि करणः[49] परः।
बला त्रयोदश प्रोक्ता रुद्राः प्रथमतः[50] स्मृताः।।47।।
[51]दमनस्सर्वभूतानां मनश्चोन्मन एव च।
[52]सूक्ष्मरुद्रोऽधिपस्तस्माज्जाता विद्या च पूर्ववत्।।48।।
वामदेवस्तथा भीम उग्रश्चैव भवस्तथा।
शर्वेशानेश्वरश्चैते[53] ह्येक[54]रुद्रः प्रचण्डधृक्।।49।।
ईश्वरश्चाप्यजोऽनन्त एकरुद्रश्च संस्थितः।
रुद्रास्त्रयोदशैताः[55] स्युर्माभक्तोऽप्यधीश्वरः।।50।।
मायातः पौरुषं तत्त्वं षड्विंशं रागसञ्ज्ञकम्।
एकरुद्रो[56] महातेजा वामदेवो [57]भवोद्भवः।।51।।

---

44. र्द्युतिः-क
45. भिकिरिटी-क
46. र्विद्या-क
47. नियत्यान्नियतिः-क
48. विकलनो-क
49. विकरणः-क
50. प्रथमगः-ख
51. तथादमनभूतानां-क
52. एषा पङ्क्तिः 'क' मातृकायां कीटभ्रंशा वर्तते।
53. श्चैव-क
54. ते ह्येकरुद्रप्रचण्ड धृत्-क
55. त्रयोदशस्तस्यामु-ख
56. क-द्रश्च महातेजजा-क
57. वामदेवो भवद्भवः-ख

एकपिङ्गेक्षमिशानभुवनेशपुरःसरः ।
रागे संवर्त्तको रुद्रस्तस्मादव्यक्त[58] एव हि।।52।।
[59]व्याधीशश्चण्डसंवर्त्तः ज्योतिः पिङ्गल[60]शूरकाः।
पञ्चान्तकैर्विराप्यश्च शिवदः[61] सङ्गतेश्वरः।।53।।
एकवीराष्टकं ह्येतदव्यक्तावरणाश्रितः[62]।
एकवीरोऽधिपस्तस्माद्गुणतत्त्वं ततोऽभवत्।।54।।
अकृतं च कृतं चैव भैरवब्राह्मवैष्णवाः।
[63]कौमारमौमं श्रीकण्ठं योगाऽष्टकमिति[64] स्मृतम्।।55।।
महादेवाष्टकं ह्येतन्महादेवाधिपः स्मृतः।
पैशाचं राक्षसं याक्षं गान्धर्वं[65]चैन्द्रमेव च।।56।।
सौम्यं प्रजेशकं ब्राह्मं देवयोन्यष्टकं[66] विदुः।
[67]बुद्ध्याधिपतिरीशानो बुद्धिरष्टविधा स्मृता।।57।।
धर्मज्ञानं च[68] वैराग्यमैश्वर्यं सत्त्वबुद्धयः।
अधर्मं तु रजो[69] बुद्धिरज्ञानाद्यास्तमोद्भवाः।।58।।
अहङ्कारजतस्तस्मात्त्रिविधं त्रिगुणात्मकम्[70]।
[71]विगलण्डद्विरण्डञ्च मार्त्तण्डं मण्डलेश्वरम्।।59।।

---

58. तस्मादव्यक्तमेव च-ख
59. आधि-क
60. पूर्वकाः-क
61. राख्यश्शिखदस्सङ्गतेश्वराः-ख
62. परणाक्षितः-क
63. मौवं-ख
64. योगोऽष्टकमिति-क
65. चैत्रमेव-क
66. योत्ह्यष्टकं विदुः-क
67. बुध्यं तु स्थित ईशानो-क
68. तु-क
69. तमो-क
70. एषा पङ्क्तिः 'क' मातृकायां नास्ति।
71. एषा पङ्क्तिः 'क' मातृकायां नास्ति।

[72]महाकालवनं चैव शतकर्णं स्थलेश्वरम्।
स्थलेश्वरमहङ्कारे महावीराष्टकं[73] विदुः।।60।।
देवः पशुपतिस्त्वीश[74]स्त्वमहङ्कारस्त्रिधा मतः।
सात्विकस्तैजसो नाम[75] तैजसादभवन्मनः ।।61।।
मनः श्रोत्रादिषु ज्ञेयमित्थं[76] वागादिषु[77] स्थितम्।
मनोबुद्धिरहङ्कारश्चित्तं वेति चतुष्टयम् ।।62।।
अन्तःकरणमित्याहुश्चित्तमत्र गुणत्रयम्।
*राजसो वैकृतस्तस्मात् बुद्धिकर्मेन्द्रियाणि तु।।63।।
*भूतादिस्तामसो नाना[78] तन्मात्राणि[79] ततोऽभवन्।
तन्मात्रेभ्योऽथ[80] भूतानि शब्दमात्रात्मकोऽथ[81] वा।।64।।
तस्माद्वा एतस्मादिति श्रुतिरप्याह केवला।
ब्रह्मज्योतिः क्वचिच्चेदं[82] शब्दब्रह्मात्मकं क्वचित्।।65।।
क्वचिज्ज्ञानं क्वचिन्नादं रूपमात्रात्मकं क्वचित्।
भूतात्मकमिदं ब्रह्मन्नाकाशं[83] सर्वकारणम्।।66।।
विधेश्वरादिका दिव्या[84] व्यक्तिमुक्तं महालयम्।
गोकर्णं भद्रकर्णं[85] च स्वर्णाक्षं स्थाणुरष्टकम्।।67।।

---

72. मनेता भुवनं-क
73. महावीराष्टकत्विदम्-ख
74. त्वीशमहङ्कार-क
75. नाना-ख
76. चित्तं-ख
77. वामादिषु-क
*'क' 'ख' पाण्डुलिपौ पङ्क्तिद्वयं नास्ति।
78. नाम्ना-क
79. तस्मात्तानि-क
80. तस्मात्तेभ्यो-क
81. शब्दमात्रान्मनो-क
82. क्वचिद्वेदः-क
83. ब्रह्माकाशं-ख
84. रुद्रकोटिश्चाप्यनिर्मुक्तं-ख
85. भूतकर्णं-क

पवित्राष्टकमिदं व्योम्नि भीमोऽधिपतिः स्मृतः।
गयां चैव कुरुक्षेत्रं नखलन्नखदं[86] तथा ।।68।।
विमलं दण्डहंसं च माहेन्द्रं[87] भीममण्डलम्।
गुह्यातिगुह्यं वायव्यं त्वष्टकं चोग्रदैवतम्।।69।।
श्रीशैलं च हरिश्चैन्द्रं जल्पेशं मातृकेश्वरम्।
मध्यमं च महाकालं केदारं भैरवं तथा।।70।।
अतिगुह्याष्टकं चाग्नौ[88] रुद्रोऽत्राधिपतिः स्मृतः।
अमरेशं प्रभासं च नैमिषं पुष्करं तथा।।71।।
अषण्ढं चैव ढिण्ढं च [89]भावभूतिमलातकम्।
गुह्याष्टकमिदं चाप्सु भव एवाधिपः स्मृतः।।72।।
सत्यलोकं त्रिधाभूतं रुद्रविष्णुजसंस्थितम्।
तपोलोकं जनर्ल्लोकं महल्लोकं सुवस्थलम्।।73।।
भुवर्लोकं च भूलोकं तदधश्च[90] रसातलम्।
अतलं च महाद्यं च गभस्तिनितलह्वयौ[91] ।।74।।
[92]परतालमथाभास-मनन्तभुवनं क्रमात्।
तस्मिन्नेवोपरिष्टाद् हि नरकानि बहूनि च।।75।।
अष्टमूर्त्यधिपैः सार्धं शर्वाद्यैः स्वालये हरिः[93] ।
विष्णुलोके महाविष्णुर्मायारूपेण संस्थितः।।76।।
ब्रह्मा चैव ब्रह्मलोके श्वेतरुद्रोऽथ वै स्मृतः[94] ।

---

86. नवलनवदस्तथा-क
87. मन्थनं-क
88. चास्नौ-क
89. भारभूति-क
90. तत्तपश्च-क
91. आभिस्त्रीणि तलाह्वयौ-क
92. रसातलमथा-ख
93. पालने हरः-क
94. वैद्युतम्-ख

महाकालोऽथ[95] विकटो महावीर्यः[96] सुवःस्थले।।77।।
वायुवेगः सुभद्राख्यो[97] निर्ऋतिश्च[98] महानपि।
सर्वरुद्रोऽप्यमोघश्च विजयश्चण्डसञ्ज्ञकः।।78।।
ज्येष्ठस्थलेश्वरा रुद्राः कूष्माण्डः कालरुद्रकः।
अमरावती च तेजोवती 'क्रमात् संयमिन्यपि[99] च' इति पाठः।।79।।
कृष्णा शुद्धवती गन्धावती महोदयाख्य यशोवती च पुरः इति पाठः।
लोकाधिपानां स्थानानि कथितानि समासतः।।80।।
दशभिर्दशभी रुद्रैः दशदिक्षु व्यवस्थितैः।
धृतं वै ब्रह्मणश्चाण्डं गन्धमात्रात्मकं शुभम्।।81।।
शर्वात्मकं विकाराः स्युः क्रमेण सुखमाश्रिताः[100]।
षट्त्रिंशत्कोटिविस्तीर्णं शतकोट्या समुच्छ्रितम्।।82।।
सा जलाग्न्य[101] निलाकाशगर्वधीगुणकारणैः।
क्रमाद्दशगुणैरेतैः समन्तात्परिवेष्टितः[102]।।83।।
राजविद्या नियत्याख्या कलाकालाख्यमायया।
तत्तच्चतुर्गुणैर्भूयः सहस्रगुणितात्मना।।84।।
वेष्टिता लक्षवृध्या च सर्वतः शुद्धविद्यया।
ज्ञानक्रियाख्यशक्तिश्च निष्कलोऽथ सदाशिवः।।85।।
इच्छा या परमाशक्तिः शिवे सा समतामियात्।
यथा वह्निगतं चोष्णं यथा दीपगता[103] प्रभा।।86।।

---

95. कालाथ-क
96. महावार्यः-क
97. सुतन्द्राख्यो-ख
98. निर्मृतिश्च-क
99. संयमी ह्यपि-क
100. स्थलमाश्रिताः-क
101. जलाश्चनिवाकार-क
102. परिवेष्ठिरे-क
103. दीपतो प्रभा-क

तथा हि शिवतत्त्वे तु शिवशक्तिमयी[104] प्रभा।
द्वैतस्थिते[105] विनाशाय शिवादन्यं न भावयेत्[106] ।।87।।
मत्तः शृणु समुद्धृत्य[107] वक्ष्ये ध्यानं समासतः।
आद्यं सदाशिवं तत्त्वं विद्यातत्त्वमनन्तरम्।।88।।
तृतीयमात्म[108] तत्त्वं तु मायाख्यं त्रिगुणान्वितम्[109] ।
बुद्ध्यहङ्कारचेतांसि चैतन्यं पञ्चमं विदुः।।89।।
तन्मात्राणां तथा वर्गो बुद्ध्यक्षाणां तथा परः[110] ।
कर्माक्षाणां च भूतानां न वाध्या परिकीर्तितः।।90।।
श्रोत्रत्वक्चक्षुषी जिह्वाघ्राणं बुद्धीन्द्रियाणि तु।
वाक्पाणिपादपायू चाप्युपस्थमितराणि हि[111] ।।91।।
नवाक्षराणि बीजानि व्योमव्यापि शिवस्य तु।
पायौ लिङ्गे च नाभौ च जठरे हृदये गले।।92।।
वक्त्रे चापि भ्रुवोर्मध्ये स्थानानि नवमूर्धनि।
एतानि च पदान्याहुः[112] वामाद्याश्च कला नव।।93।।
मातृका[113] नववर्गस्था मन्त्राध्वा[114] च नवाक्षरः।
लोकाश्चानन्तनरक[115] पातालाख्यधरादयः।।94।।

---

104. शिवतत्त्वमपि-क
105. वैतस्थितेऽतिनाशाय-क, द्वे.......स्थि-ख
106. शिवादिह्य......पतत्-क
107. समुच्चित्य-ख
108. मायातत्त्वं-क
109. त्रिगुणान्तिकम्-ख
110. परम्-ख
111. तु-ख
112. ममाद्याश्च-क
113. मानिका-क
114. मन्त्राध्याय-क
115. श्चानन्तरता-क

[116]नीत्वा तत्वेषु चैकत्वं[117] नवाध्वानं[118] प्रकल्पयेत्।
अण्डान्तं पृथिवीतत्त्वं रागान्तं वाङ्मयं[119] विदुः।।95।।
आग्नेयमात्मपर्यन्तं[120] विद्याख्यं वायुसञ्ज्ञकम्।
सदाशिवाख्यमाकाशं सद्याद्या[121] अधिदेवताः।।96।।
[122]निवृत्त्यायाः कलास्सर्वाः शिवतत्त्वसमन्विताः।
स्वर्गान्तं लोकमेकं स्यात् पुनश्च महदादयः।।97।।
भूतवर्णैस्तु वर्णाध्वाः[123] भूयो बीजानि[124] चोद्धरेत्।
नादबिन्दुसमायुक्तं चतुर्दशकलान्वितम्।।98।।
[125]प्रासादं व्योमबीजं वा शिवबीजं समुच्छ्रितम्।
[126]अग्निस्थञ्चाग्निबीजं तु वारुणोपरि संस्थितम्।।99।।
चतुर्थस्वरसंयुक्तं[127] पार्थिवोपरि संस्थितम्।
द्वितीयस्वर[128]संयुक्तं पार्थिवं परिकीर्तितम्।।100।।
पञ्चानामपि तत्त्वानां[129] बीजानि कथितानि ते।
[130]आत्मानमात्मतत्त्वं तं ब्रह्मविष्णुमयं परम्।।101।।

---

116. निश्चि-क
117. चैतन्यं-क
118. न चास्थानं-क
119. तत्त्वात्मयं-क
120. 'क' मातृकायां पङ्क्तिः लुप्ता वर्तते।
121. सद्वाद्या-ख
122. एषा पङ्क्तिः 'क' मातृकायां लुप्ताऽस्ति।
123. वर्णा स्यात्-क
124. अंशोऽयं नष्टः 'क' मातृकायाम्।
125. 'ख' मातृकायां पङ्क्तिरेषा नास्ति।
126. एषा पङ्क्तिः 'क' मातृकायां नास्ति।
127. अधोपायुसमायुक्तं-क
128. द्वितीयस्य रसं युक्तं-क
129. बीजबीजानि-क
130. आत्मान्तरात्म तत्त्वं नु-क

विद्याख्यमैश्वरं तत्त्वं सदाशिवमिति त्रिधा।
नाभिहृन्मस्तके स्थानं बीजाद्होमाक्षराणि हि।।102।।
वामा ज्येष्ठा च रौद्री च कला भूरादयस्त्रयः[131]।
स्वरस्पृग्व्यापकैर्वर्णैस्त्रिधा[132] ध्वानं[133] प्रकल्पयेत्।।103।।
महामायान्वितं[134] नादमग्निस्थं[135] बिन्दुभूषितम्।
मूलात्मिकायाः प्रकृते बीजमेतदुदाहृतम्।।104।।
नादं बिन्दुसमायुक्तं सोमं सर्गसमन्वितम्।
सदाशिवस्य देवस्य बीजद्वयमुदाहृतम्।।105।।
नादिकान्तानि वर्णानि बिन्द्वन्तानि यथाक्रमम्।
विद्यादीनां तु बीजानि दीर्घत्रययुतं गुणम्।।106।।
त्रयस्त्रिंशत्कलायुक्ताः[136] विद्यादिमनवः[137] क्रमात्।
शिवः पञ्चकलायुक्तः शक्तिभ्यां तु सदाशिवः।।107।।
नेच्छायां हि कलालेशस्तदतीते कथं भवेत्।
अविद्यान्तानि तत्त्वानि व्याप्तानि[138] सकलं विदुः।।108।।
नमोऽन्तानि[139] हृदिस्थानि के वक्त्रे हृदि गृह्यते।
तन्मात्राणि[140] पदद्वन्द्वे इन्द्रियाणि स्वगोचरे।।109।।
भूतानि मात्रास्थानेषु कल्पयेदङ्गदेहयोः[141]।
हृन्मध्ये कल्पयेत्पद्मं लैवेयं[142] मण्डलत्रयम्।।110।।

131. भूरादयस्त्रयम्-क
132. व्यापका वर्णास्-क, व्यापका वण्णैस्-ख
133. त्रिधास्थानं-क
134. स्थितं-क
135. मग्निस्था विन्दु भूषिता-ख
136. समायुक्ता-क
137. विद्यादिर्मनवः-क
138. प्रत्तानि-ख
139. मनोन्तानि-ख
140. नमोऽन्तानि-क
141. कल्पयेल्लिङ्गदेहयोः-ख
142. लैपीयं-ख

स्वरैश्च भावयेन्मध्ये तेजोराशिं सदाशिवम्।
पञ्चवक्त्रं दशभुजं सुसितं वा चतुर्भुजम्[143] ।।111।।
मूर्त्तिभिश्चानन्ताद्यैरुमाद्यैर्लोकपालकैः[144] ।
अस्त्रैः परिप्लुतं[145] देवं शिवं सकलं निष्कलम्[146] ।।112।।
सर्वाध्वानमिह[147] प्रोक्तं शिवतत्त्वं च ते मया।
दीक्षायां च प्रतिष्ठायां जीर्णोद्धारविधावपि।।113।।
उत्पातेषु समस्तेषु महास्नपनकर्मणि।
न्यासहोमादिकर्तव्यं गुरुणा तत्त्ववेदिना।।114।।
अतत्त्ववेदिना नैव कारयेत् कर्मदैविकम्।
सिद्धान्तैश्चोदितं ह्येतन्मन्त्ररूपेण भावयेत्।।115।।

**इति श्रीपाशुपते नन्दिप्रोक्ते द्वितीयः पटलः॥**

---

143. 'क' मातृकायामेषा पङ्क्तिर्नास्ति।
144. मूर्त्तिः शिवाख्यं तत्राद्यैः रुद्राद्यैर्लोकपालकैः-क
145. परिवृतं-क
146. 'क' मातृकायां द्वितीयचरणं नास्ति।
147. कार्त्तिताक्षरत्वात् 'क' मातृकायां सर्वाध्वान'मिति शब्दो नास्ति।

# अथ तृतीयः पटलः

## नन्दिरुवाच

शिवमन्त्रान् प्रवक्ष्यामि बीजनामादि[1] भेदतः[2]।
स्नात्वाचम्य शुचिर्भूत्वा मन्त्रोद्धारं समाचरेत्।।1।।
सर्वेषामिह[3] [4]मन्त्राणामादौ तारं नियोजयेत्।
बीजानां च[5] तथा चान्ते यदि नाम न विद्यते।।2।।
सान्तं विन्दुसमायुक्तं चतुर्दशकलान्वितम्[6]।
(चतुर्थ्यन्तं नमो मन्त्रः) शिवस्य परमात्मनः।।3।।
[7]आदित्रिदीर्घभिन्नेन मूलाङ्गानि षट् क्रमात्।
द्वादशेन तदन्त्येन षोडशेनास्त्रपश्चिमम्।।4।।
वामदेवस्तथा पङ्क्तिः शिव ऋष्यादिकाः स्मृताः।
एवं पञ्चाक्षरस्यापि[8] देवतापि सदाशिवः।।5।।
शूलाहिटङ्कघण्टासि[9] रणड्डमरुकं[10] क्रमात्।

---

1. नामानि-क
2. भेदितात्-ख
3. सर्वेषामेव-ख
4. तन्त्राणामादौकारं-क
5. वा-ख
6. एष श्लोकः 'क' मातृकायां नास्ति।
7. अदितिदिर्व-क
8. व्यापी-क
9. खड्गा-क
10. नेणं-क, रण-ख

वज्रपाशाग्न्यभीतिञ्च दधानं[11] करपल्लवैः।।6।।
कपालमक्षमालां च शूलं खट्वाङ्गमेव[12] वा।
हृच्छिवायेति पञ्चार्णं[13] ताराद्यं तत् षडक्षरम्।।7।।
षड्वर्णैरिह चाङ्गानि परश्वधमृगाह्वयौ।
वरदञ्चाभयं दोभिर्दधानं चन्द्रशेखरम्।।8।।
नादस्त्रयो[14]दशेनैव पुनश्चैकादशेन च।
पञ्चमेन तृतीयेन स्वरेणाद्येन संयुतम्।।9।।
बीजानि[15] पञ्चमूर्तीनामीशादीनां क्रमाद्विदुः।
पञ्चाक्षरस्य वर्णानि बीजन्यासं[16] तदर्चने।।10।।
पञ्च ब्रह्मशिवस्यास्य ऋग्भिर्मन्त्रमुदाहृतम्[17]।
पञ्चतारोपरिष्टात्तु सर्वज्ञायेति हृन्मनुः।।11।।
प्रणवान्ते मृते तेजोमालिनीति समुद्धरेत्।
[18]तृप्तायै ब्रह्मशिरसे शिरोमन्त्र उदाहृतः।।12।।
[19]शिखरेणादिबोधायेत्युद्धरेज्ज्वलितादिकम्।
वज्रिणे वज्रधराय[20] स्वतन्त्राय[21] द्विठोपरि।।13।।
सहमध्ये चकारं च नेत्रार्थं[22] बिन्दुना सह।

---

11. दधतांकुरपल्लवैः-क, दधतं-ख
12. पंचाङ्गमेव-क
13. ताराणा पंचाना-क
14. एष शब्दः 'क' मातृकायां कीटखण्डितः।
15. बीजादि-क
16. वीजा ह्यासां'-क
17. आभि-क
18. तृप्त्यै-ख
19. शिखे अनादिबोधाये-ख
20. वज्रिधाराय-ख
21. स्वकृन्ताय-क
22. नेत्रान्तद्विन्दुना-ख

चतुर्दशकलायुक्तं बीजत्रयमुदाहृतम्।।14।।
अलुप्तशक्तयेत्युक्त्वाद्वीङ्कारं[23] बीजमुद्धरेत्।
उद्धरेत्पशु हुं फट्कमनन्तादि च शक्तये।।15।।
पञ्चब्रह्माङ्गमन्त्रास्ते[24] कीर्तिताः सर्वकामदाः।
ईशश्च पुरुषश्चाग्निर्वामदेवो हरः क्रमात्।।16।।
भूर्यनुष्टुप्गायत्री अनुष्टुप्कृत्यनुष्टुभौ।
ईश्वरश्च द्वयोरापश्चान्ययोश्च हरः क्रमात्।।17।।
त्रितारं सत्यकामाय[25] वरदाय नमो द्विठः।
सद्यः कामवरदाय नमो नम इति द्विठः।।18।।
[26]पन्नगरूपिणे स्वाहेति स सद्योजातमूर्त्यपि।
हुं फट् तारं ततो[27] हुं फट् प्रोक्तं सद्याङ्गपञ्चकम्।।19।।
[28]तदों वामाय[29] हृदयं वामदेवाय हुं पुनः।
फट् शिरश्चोदितं तारं सर्वपापप्रणाशिने।।20।।
शिखे[30] वामादिहृद्वन्द्वं स्वाहान्तं हि शिखाः[31] स्मृताः।
हुं फडों[32] हुं फडित्यस्त्रं वाम देवाङ्गपञ्चकम्[33]।।21।।
ओं सदोमप्यघोराय प्रशान्ताय च हृन्मनुः।
अमुग्रचण्ड हुं फट्कं शिरोमन्त्रमुदीरितम्।।22।।

---

23. श्लींकारं-क
24. स्त्रे-ख
25. सद्यवामाय-क
26. इति पीठः सह हरः वीने स्वाहेति-क
27. तारान्तको-क
28. सत्याङ्ग-क
28. ततो-क
29. वामादि-ख
30. शिवं-क
31. शिवाः-क
32. पटा हुं पडि-क
33. दीरितम्-क

भीमभीषणिताराद्यं सर्वविद्याविदारिणी।
हुं फट्शिखा हि कवचमोमघोराय[34] हुं स्मृतम्।।23।।
ओं सदो हुं फडित्युक्तमघोरस्याङ्गपञ्चकम्।
तारादिसत्सदोमाद्यं व्याहृतित्रितयं त्रयम्।।24।।
पुरुषस्यास्त्रमोङ्कारं तत्सदोमित्युदाहृतम्।
ओं सदों हृदयं प्रोक्तमी[35]शायेति समन्वितम्।।25।।
ओं पञ्च मूर्तिने[36] हृद्यशिवायेति शिरः स्मृतम्।
ओमीशान नमः स्वाहा शिवायेति शिखा स्मृता।।26।।
ओं ज्वलच्छिन्द हुं फट्कं कवचास्त्रं सदोमिति।
चतुर्भुजमुदाराङ्गं सुमुखं चन्द्रशेखरम्।।27।।
जटामण्डलसंयुक्तं चन्द्रार्धकृतशेखरम्[37]।
अक्षसूत्रकपालेऽधः शूलपट्टाङ्गमूर्ध्वतः।।28।।
वहन्तं दक्षिणे वामे हस्तैरेवं हरं स्मरेत्।
सर्वाभरणसंयुक्तास्त्रिनेत्राश्चन्द्रशेखराः।।29।।
कुन्दं काञ्चननीलाभरक्तभास्करसन्निभाः।
पुरुषाद्याश्चतुर्वक्त्राः[38] पञ्चवक्त्रः सदाशिवः।।30।।
ईशो दशभुजो घोरश्चाष्टबाहुश्चतुर्भुजः।
आद्यः प्रासादवद्ध्येयः पुरुषो ब्रह्मरूपवत्।।31।।
शूलं परश्वधं खड्गं पिनाकं नागमुज्ज्वलम्।
वज्रमग्निमहाघण्टा[39]प्रशान्तं दधतं स्मरेत्।।32।।

---

34. मोमश्चोराय-क
35. एं शायेति-क
36. मूर्त्ति हे हृ-क
37. पञ्चब्रह्ममयं शिवम्-ख
38. मुक्ता-क
39. महाचण्डां-क

टङ्कं शूलं कपालं च वरदं दधतं भुजैः।
वामदेवं स्मरेद्देव्या वामोरुगतयान्वितम्।।33।।
शूलं टङ्कं[40] महापाशमङ्कुशं दधतं परम्।
एवं हि पञ्चमूर्तीनां ध्यानमत्र प्रकीर्तितम्[41]।।34।।

ओं महेशाय विद्महे वाग्निशुद्धाय धीमहि तन्नः शिवः प्रचोदयात्।

[42]धर्मकामार्थफलदं केवलं मोक्षसाधनम्।
चतुश्शताक्षरं मन्त्रं सर्वशास्त्रेषु कीर्त्तितम्।।35।।
सर्वमन्त्रसमायुक्तं व्योमव्यापिनमव्ययम्।
मन्त्राणां [43]सप्तकोटीनां सारं तत्ते वदाम्यहम्।।36।।
पञ्चतारान् पुरोद्धृत्य[44] प्रासादं प्रणवं पुनः।
आदित्रिदीर्घाबिन्द्वन्ता व्योमव्यापि च नेयुतम्[45]।।37।।
व्योमरूपाय सर्वार्ण्णे व्यापिने च शिवाय च।
अनन्ताख्यमनाथाख्यमनाश्रितपदं पुनः।।38।।
ध्रुवाख्यं शाश्वतपदं योगपीठादिसंस्थितम्।
नित्ययोगिपदस्यान्ते ध्यानाहारपदं क्रमात्।।39।।
सम्प्रदानविभक्त्यन्तं पदानामष्टकं नयेत्।
षडक्षरीं च सर्वार्णौ प्रभवेति शिवाय च।।40।।
ईशानादि पुनर्मूर्द्धे[46] वक्त्रं तत्पुरुषादिकम्।
अघोरहृदयं[47] गुह्यं वामदेवपदं[48] पुनः।।41।।

---

40. शूलण्डङ्कं-ख
41. प्रदर्शितम्-ख
42. एष श्लोकः 'क' मातृकायां नास्ति।
43. सर्व-क
44. पश्चात्पुनरावृत्त्य-क
45. पूर्णश्लोकः 'क' मातृकायां नास्ति।
46. च मूर्त्ताय-क
47. अं चोरुहृदयं गुह्यं-क
48. वामगुह्यपदम्-क

पदत्रयं चतुर्थ्यन्तं सद्योजातादिमूर्तये।
तारं नमः पदं वीप्स्य गुह्यादीति पुनर्वदेत्।।42।।
गुह्यादीति[49] पुनर्गोप्त्रे भूयोऽप्यनिधनाय च।
सर्वविद्याधिपायेति ज्योतिरूपाय कीर्तयेत्।।43।।
पाराष्णौ विषमे युक्तं परो भूयः पराय च।
अचेतनाचेतनेति व्योमिव्यापिन्[50] पदद्वय।।44।।
अरूपिन् प्रथमस्तेजो जितषट्कं[51] द्विरभ्यसेत्।
रूपाग्नि[52] धूमभस्माख्यपदानां प्रथमाक्षरम्।।45।।
आदौ चतुर्णां संयोज्य [53]तानि सर्गान्तमुच्चरेत्।
अनादेति द्विकूर्चार्य नाधू द्वौ[54] वेदसङ्ख्यया।।46।।
प्रणवादि पृथक् भूयः प्रोच्चरेद्व्याहृतित्रयम्।
अनिधनपदस्यान्ते निधनोद्भव इत्यपि।।47।।
शिवः शर्वः सर्वपरः क्षेतुं चानन्तसंयुतम्।
हान्ताधो मम महश्चेति[55] महादेवः सत्पुनः।।48।।
भावेश्वरमहातेजो[56] योगाधिपतयश्च[57] ते।
मुञ्च[58] द्वन्द्वं समुच्चार्य प्रथमद्वयमेव च।।49।।
शिवशर्वपदाख्यौ च भवोद्भवपदा[59] ह्वयौ।
विध्यवामादि[60]देवेति सर्वभूतसुखप्रद।।50।।

49. गुह्यातिति-ख
50. व्योमि व्यापि-ख
51. ज्योतिः-क
52. रूपाणि-ख
53. ताम-क
54. शुद्धो-क
55. श्चेतिर-ख
56. तेज-क,ख
57. पतत-क
58. मुञ्च मुञ्च द्वयं सर्वव्याप्य-क
59. भवाह्वयौ-क
60. वीप्स्य-ख

[61]सर्वासान्निध्यवर्णान्ते तार[62]ब्रह्माक्षराण्यपि।
विष्णु रुद्रपर इत्यनर्चित अनर्चितेति।।51।।

असंस्थितपूर्वस्थित साक्षिन् तु रूप-(तारकम्)
तज्ज्ञानं तथा शब्दसूक्ष्मेति नवकं क्रमात्।।52।।

[63]द्विरुच्चार्य शिवः शर्वः सर्वदः प्रणवं नमः।
शिवाय तारं हल्लेखां हच्छिवायेति[64] तां पुनः।।53।।

तारप्रासादहल्लेखां हच्छिवायेति[65] चोद्धरेत्।
ओं नमो नमः इत्येवं मन्त्रमुद्धृ[66]तमुत्तमम्।।54।।

ओं नमः सर्वात्मने पराय परमेश्वराय पराय योगाय योगसम्भवकर -सद्योभवोद्भव वामदेव सर्वकार्यप्रशमन सदाशिव नमोऽस्तु ते स्वाहा हृदयाय नमः। ओं सु शिवशिव नमो ब्रह्मशिरसे-शिरसे[67] स्वाहा ओं शिव हृदये ज्वालिनि स्वाहा ज्वालिन्यै-शिखायै वषट्।

ओं शिवात्मकं महातेजः सर्वज्ञं प्रभुमव्ययम्।
आवर्त्तयेन्[68] महाघोरं कवचं पिङ्गलं शुभम्।।55।।

आयाहि पिङ्गलं महाकवचं शिवाज्ञया हृदयम् बन्धः। ज्वलं घूर्ण सम्पूर्णः किरि सूक्ष्मः वज्राधर-कवचाय हुम्। ओं जूं सः ज्योतीरूपाय-नेत्रत्रयाय वौषट्। ओं नः घोरघोरतर कर्णरूप चटः तहः वमः बन्ध घातय-हुं फट्।[69] अघोरान्ताय फट्।..

---

61. सान्तै-क
62. कर-ख
63. द्विविश्चार्य-ख
64. हच्छिखायेति-क
65. हच्छिखायेति-क
66. मुद्धृतं मन्त्रमुत्तमम्-ख
67. सुशिव शिरसे-ख
68. आवतेये-क
69. 'ख' मातृकायां मन्त्र एवं प्राप्यते-

षडङ्गान्यभिन्यस्य[70] व्योमव्यापिशिवस्य[71] हि।
ऋषिर्वसिष्ठो गन्तादि गायत्री परमेश्वरः।।56।।

छन्दोऽधिदैवते चास्य ध्यानं पञ्चाक्षरोदितम्।
तारदीर्घत्रयं व्योमव्यापि नेति नवाक्षरम्[72]।।57।।

अस्यान्त्यपञ्चवर्णैस्तु पञ्चाङ्गानि यथाक्रमम्[73]।
यानि बीजानि नेत्रेषु तानि मृत्युञ्जयं[74] विदुः।।58।।

दीर्घस्वरयुजाङ्गानि कल्पयेत् भृगुणास्य तु।
कहोलश्चाथ गायत्री बालरुद्रो हि देवता।।59।।

हालाहलं चतुर्विंशमन्त्यमग्नौ त्रयं न्यसेत्।
ऊँङ्कारेण समायुक्तं बीजमुख्यं त्रिवर्णकम्।।60।।

हुं फट्कं तारमध्यस्थं वज्रमन्त्र[75]मुदाहृतम्।
[76]वाक्पञ्चमान्तमूर्ध्वं च मायोढौ वेहि[77]दीक्षिकृत्।।61।।

क्षुरिकाष्टाक्षरी प्रोक्ता ताराद्याः सर्वकामदाः।
श्लीङ्कारं पशुहुंफट्कं साक्षात्पाशुपतं विदुः।।62।।

षडङ्गान्यपि षड्वर्णैः ताराद्यैः परिकल्पयेत्।
अघोरश्चाथ गायत्री रुद्रः पाशुपतादिकः।।63।।

---

"आयाहि पिङ्गल कवचं शिवाज्ञया हृदयं बन्धः जलद घूर्णयः सम्पूर्णः करिः सूक्ष्मवज्रधर वज्रपाश वज्रपशरीर मम शरीरं मम शरीरमनुप्रविश्य सर्वदुष्टांस्तम्भय हुं फट्। ऊँ जः सः ज्योतीरूपाय ओं प्रस्फुर घोरघोरतर तनुरूप चटकमहं बमः ब(म) घातय हुं फट्।"

70. षडङ्गान्युदिन्यस्य-ख, षडंशा इत्यादि तान्यस्य-क
71. व्यामव्यापिनेति वाक्षरम्-क
72. उपरि साद्र्धैकपद्यं 'क' मातृकायां नास्ति।
73. यथाकृतम्-क
74. मूर्त्ते त्रयं-क
75. वज्रमस्त्र-क
6. खात्-ख
77. खेहिदिक्षि-ख

कल्पान्तार्कं सहस्राभं रक्ताक्तं[78] रक्तवाससम्।
दंष्ट्राकरालसम्भिन्नं [79]पञ्चवक्त्रं भयङ्करम्।।64।।
केशैश्च कपिलैर्दीप्तं ज्वालामालासमाकुलम्।
टङ्कं चर्म कपालं च चापं नागं च वामतः।।65।।
शूलं खड्गं युगान्ताग्निं बाणं वरदमेव हि।
दक्षिणैः स्वभुजैर्दीप्तं रुद्रं ध्यात्वा यजेत्प्रभुम्[80] ।।66।।
पद्ममष्टदलं कृत्वा पीतेनापूर्य[81] कर्णिकाम्।
दलानि रक्तवर्णानि केसराः सुसितारुणाः।।67।।
कृष्णेन दलसन्धिस्तु शेषं हि शिवपीठवत्।
अङ्गैः स्वास्त्रै रथेन्द्राद्यैस्तदस्त्रैरर्चयेत्प्रभुम्।।68।।
खादिराख्यसमित्सर्पिरन्नाज्यैश्च[82] शतं शतम्।
अष्टाधिकं हुनेदग्नौ निवेद्य विकिरेद् बलिम्[83] ।।69।।
औमेयमाद्यं तारं स्यादौमार्णैस्तारमुद्धृतम्।
[84]हाल्लेखिकन्त्रिवर्णाढ्यमाद्यमेकादश स्वरम्।।70।।
तयोः संयोगतः साक्षाद्यद्वर्णमुपजायते।
[85]तद्वाग्भवन्त्रिवर्णाढ्यं तृतीयं बीजमुद्धृतम्।।71।।
वलभिञ्जलजोद्भूतं महामायान्वितं परम्।
वियत्सोमद्विसप्ताख्यं वर्णैः पञ्चममुद्धृतम्।।72।।

78. रक्ताक्षम्-ख
79. लम्बवक्त्रम्-क
80. प्रभुः-ख
81. वीतेना-क
82. सर्वप्तवीरणाद्यैश्च-क
83. बली-ख
84. हाल्लवीत-क
85. तं चाग्गवं-क
86. वही
87. सर्गपान् भृगुम्-क
88. वर्णत्रयैर्ण यैकैतं-क

अग्निनान्तमनोरद्य वर्णैः षष्ठं वियत्पुनः[86]।
बिन्द्वन्तानीह बीजानि सर्गवान्[87] भृगुरन्त्यगः।।73।।
सर्गाढ्यं पञ्च मन्त्रं वसुवर्णैः समुद्धृतम्।
[88]वर्णत्रयैरथैकैकं क्रमाच्छक्तित्रयात्मकम्[89]।।74।।
बिन्दुना च तुरीयत्वं तदतीतं रवेण हि।
तद्वाचकोऽनुभूतिः स्यात् करणैः सकलैरपि।।75।।
यानप्राप्या त्वजामेया[90] सानन्तं नन्दविग्रहा।
पुल्लिङ्गानां[91] तदेवात्मा तदेव हि चराचरम्[92]।।76।।
एवमेकैकबीजस्य परत्वमिह कीर्तितम्।
पराद्याख्यानभेदेन त्रिपुराख्या[93] त्रिवर्णकैः।।77।।
वैखरी[94] बिन्दुना ब्रह्म चतुर्धा वाङ्मयं विदुः।
वेदाग्निगुणलोकात्मतेजोव्याहृतिभिः स्वरैः।।78।।
त्रिपुरा सा त्रिवर्णैस्तु नादेनैव हि पञ्चधा।
प्राणाग्निभूतमूर्त्यङ्गैः[95] पञ्चधा परिकीर्तिता।।79।।
शक्त्या षोढा हि ऋक्तत्त्वं ज्ञानाद्यैः सा परेण हि।
ऋषिच्छन्दस्वराद्यैस्तु सप्तधा भुवनैः स्मृता[96]।।80।।
अष्टप्रकृतिभिः सेयमष्टधा परिकीर्तिता[97]।
तारमाधारमुद्दिष्टं कुण्डली तत्र वर्तते।।81।।
वाग्भवं लिङ्गमूले तु कामराजं हृदन्तरे।

---

89. क्रमातुशक्तयोन्वितम्-क
90. यानं प्राख्यं च जाया सा ननन्ता-क
91. पुत्कलानां-क
92. परापरम्-क
93. त्रिपुरा सा-ख
94. वैवर्णि-क
95. मूर्त्यशैः-क
96. 'ख' मातृकायामेष श्लोको नास्ति।
97. 'ख' मातृकायामेषा पङ्क्तिर्नास्ति।

कार्त्तीयं[98] तालुमध्ये च श्रीकण्ठं च भ्रुवोर्न्यसेत्[99] ।।82।।
अजपाञ्च पुनर्मूर्ध्नि वर्णमाला च सर्गयोः।
आदीक्षान्तां तया देहं मुखादि परिकल्पयेत्।।83।।
लोलान्ताङ्गादिवर्गाश्च शादिवर्णत्रयं पुनः।
ब्रह्मा विष्णुश्च रुद्रश्च प्रजेशश्च दिगीश्वराः।।84।।
शक्तित्रयञ्च वर्गाणां नवानां देवताः स्मृताः।
तृतीयादि च षड्वर्गैः षडङ्गानि प्रकल्पयेत्[100] ।।85।।
प्रणवाद्यन्तदण्डैस्तु षड्बीजसहितैः क्रमात्।
शिवः परमगायत्री मूलप्रकृतिरेव हि।।86।।
ऋष्याद्या रक्तवर्णाभा पाशाङ्कुशवराभया।
चतुर्भुजा त्रिनयना सेन्दुखण्डा मनोरमा।।87।।
द्विनेत्रद्विभुजा श्यामा देवपार्श्वंगता तदा।
देवपीठे तु यष्टव्या ह्यङ्गमात्रा दिशाधिपैः।।88।।
ध्यात्वा प्रविन्यसेत्सम्यगाधारेषु न (संशयः)।
बाह्वादिमूलदेशेषु कादयः खादयः पुनः[101] ।।89।।
(विन्यसेत्तु)दीर्घाद्याश्चाप्यङ्गुलानां तु मूलतः।
गादयो मणिबन्धादिस्थानेषु जठरे क्वचित्।।90।।
पार्श्वद्वये[102] शिखामूले पृष्ठे नाभ्यां हृदन्तरे।
भ्रूमध्ये संस्थिता वर्णाः पञ्चभूत[103]मयाः क्रमात्।।91।।
किमत्र बहुनोक्तेन सर्वावरणसंयुतम्।
शक्तित्रययुतं कृत्स्नं जगत्स्थावरजङ्गमम्।।92।।

---

98. तार्त्तीयं-क
99. भुवोरन्तरे-क
100. षड्गणैः-क
101. एषा पङ्क्तिः 'क' मातृकायां कीटदंशत्वान्नास्ति।
102. पार्श्वोदयो-क
103. पञ्चभूतमयात्मकाः-ख

अनेनाष्टाक्षरेणैव व्याप्तमित्यवधारय।
सर्वत्र देवपूजायां बह्नेरुत्पादनादिषु।।93।।
स्मर्तव्याऽखिललोकात्मा पार्वतीसिद्धिमिच्छता।
तारहृन्मध्यगं बीजं श्रीकण्ठं सर्वकामदम्।।94।।
तारशक्त्यजपा सैव[104] [105]प्रतिलोमाग्निवल्लभा।
असावष्टाक्षरी विद्या तया लिङ्गादिमर्चयेत्[106]।।95।।
नारायणाख्यया मध्यं तारहृत् पूर्वदेन्त्रया[107]।
तारप्रासादहृल्लेखा हृच्छिवायेति[108] विद्यया।।96।।
शिवभागं यजेन्मन्त्री त्रिंशत्पुष्पाञ्जलिः पृथक्।
तत्पुरुषाय विद्महे पितामहाय धीमहे तन्नो ब्रह्मा प्रचोदयात्।
तत्पुरुषाय विद्महे जनार्दनाय धीमहे[109] तन्नो विष्णुः प्रचोदयात्।
तत्पुरुषाय विद्महे महादेवायधीमहे[110] तन्नो रुद्रः प्रचोदयात्।।
हृदयं च शिरश्चैव शिखाकवचमेव हि।।97।।
नेत्रत्रयमथास्त्रञ्च[111] सर्वमध्येषु योजयेत्।
नमः स्वाहा वषट्स्थं च वौषट् फट्ज़ा तयोर्मताः।।98।।
[112]अर्चने तु नमोऽन्ताः स्युः स्वाहान्ता होमकर्मणि।
त्रिपुरं जघ्नुषः पूर्वं ललाटनयनोत्थितः।।99।।
यो वह्निस्तस्य हृदयमघोरास्त्रं वदाम्यहम्।
हृल्लेखां च स्फुरद्वन्द्वं प्रस्फुटद्वयमेव हि।।100।।

---

104. श्चैव-क
105. व्रत-क
106. श्रीशादि कल्पयेत्-क
107. पूर्वन्तया-ख
108. हृच्छिखायेति-क
109. धीमते-ख
110. धीमते-ख
111. नेत्रमस्त्रं तथाङ्गानि सर्वमन्त्रेषु-क
112. अष्टनेतुः-क

घोरघोरतरेत्युक्त्वा तनुरूपचटद्वयम्[113] ।
प्रादितञ्चादि वीप्स्यन्ते कहद्वन्द्वं[114] बमद्वयम्।।101।।
बन्धघातयसंवीप्स्य[115] हुं फडित्युद्धृतं मया।
चतुर्भिश्च तथा षड्भिः दशभिर्दशभिः क्रमात्।।102।।
अष्टाभिद्वादशार्णैस्तु षडङ्गानि मनोर्विदुः।
देवता घोररुद्रोऽस्य ऋषिश्चाघोर एव हि।।103।।
त्रिष्टुप् छन्दःस्मरेद्रुद्रं सहस्रार्कसमप्रभम्।
टङ्कं डमरुकं खङ्गं चर्म[116] बाणधनुर्धरम्।।104।।
शूलं कपालं दधन्तं[117] [118]कालाभ्राभं त्रिलोचनम्।
दंष्ट्राकरालवदनं नागाभरणभूषितम्।।105।।
सर्वदुष्टग्रहादींस्तु खादन्तं रक्तवाससम्।
अङ्गैः स्वास्त्रैर्दिशापालैस्तदस्त्रैः सह योजयेत्।।106।।
[119]आज्यापामार्गनिर्गुण्डीतिलसर्षपपायसैः।
श्वेतकिंशुकचिञ्चाज्यसंयुतैः सर्वसिद्धये।।107।।
अष्टोत्तरसहस्रं तु गुणेदाद्यन्तौ पृथक् पृथक्।
तत्र (सर्वं) दधीचाहं[120] वदिष्ये मन्त्रसन्ततिम्।।108।।
मन्त्रैर्वर्णैः पदैर्बीजैरंशान्यनुदिते[121] नयेत्।।109।।

**इति श्रीपाशुपते नन्दिप्रोक्ते तृतीयः पटलः॥**

---

113. अरुपचट-क
114. प्रादि तव्याभि विविप्स्यान्ते तहद्वन्द्वं च मद्वयम्-क
115. संस्थित्या-क
116. बाणधरंवरम्-क
117. दधतं-ख
118. कलाभ्राभं-क
119. श्लोक एष 'क' मातृकायां कीटदंशत्वान्नास्ति।
120. दधिपोऽहं-क
121. रङ्गान्यदिते-क

# अथ चतुर्थः पटलः

## नन्दिरुवाच

स्नात्वा यजेन्महादेवं मन्त्रैः सम्यगिहोदितैः।
ध्यानमुद्राहुतिस्तोत्रबलिविप्राशनैः सह।।1।।
मणिबन्धसमौ [1]हस्तावूर्ध्वाग्रौ सम्पुटीकृतौ।
मूर्ध्नि [2]प्रसादिनी मुद्रा वन्दनी हृदि योजिता।।2।।
उत्तानौ तु करौ कृत्वा[3] अङ्गुष्ठौ तलमध्यगौ।
आवाहनीया सम्प्रोक्ता मन्त्रावाहनकर्मणि।।3।।
सम्मुखौ [4]प्रसृतौ कृत्वा किञ्चिदाकुञ्चिताङ्गुली।
आवाहनार्थमुद्दिष्टा [5]मन्त्रवत् स्थापनं भवेत्।।4।।
सङ्कुञ्चिताङ्गुलीहस्तावूर्ध्वाङ्गुष्ठौ[6] तु यद्भवेत्।
सान्निध्यमुद्रिका[7] ज्ञेया दृढागुष्ठौ[8] निरोधनी।।5।।
कृत्वान्योऽन्यगताङ्गुल्यौ पृष्ठयोर्हस्तयोर्द्वयोः।
तिर्यक्स्थेन न्यसेच्चैवमङ्गुष्ठाभ्यां समाक्रमेत्।।6।।

---

1. ग्रस्तामूर्ध्वाग्रौ-क
2. प्रसदानी-क
3. कृत्वावङ्गुष्ठौ-ख
4. विस्नतौ-क
5. न्यस्तपस्थापना-ख
6. पूर्वाङ्गुष्ठौ-क
7. मुद्रिता-क
8. शुङ्गुष्ट-क

देशिनीमध्यमे रुद्धेऽ[9]नामिके चोच्छ्रिते युते।
कृत्वा पञ्चमुखी ख्याता मुद्रेयं शङ्करप्रिया।।7।।

मुदः कुर्वन्ति[10] देवानां राक्षसान्द्रावयन्ति च।
तेन[11] मुद्रा इति प्रोक्ता रहस्ये ताः प्रयोजयेत्।।8।।

शुचिर्विदोषा सङ्गृह्य सद्योजातेन मृत्तिकाम्।
वामेन विभजेत्त्रेधा घोरेणामन्त्र्य त्रिदशः[12]।।9।।

आलिख्य[13] पुरुषेणाङ्गमीशेन सलिले[14] क्षिपेत्।
अघोरेण च दिग्बन्धं कृत्वा मज्जेच्छिवं वदन्[15]।।10।।

पञ्चाक्षरेण तारेण ब्रह्मभिश्चाधमर्षणम्।
ब्रह्मभिर्वारिणाप्लाव्य[16] परिधाय च वा[17]ससी।।11।।

गायत्र्यार्घ्यं प्रदायार्कमण्डले संस्मरेद्धरम्[18]।
व्योमव्यापि शिवं जप्त्वा[19]देवानृषिगणान्पितॄन्।।12।।

सन्तर्प्य सगणांस्तीर्थं सङ्गृह्य भवनं विशेत्।
प्रणवेन[20]द्विराचम्य द्विरुन्मृज्य हृदा मुखम्।।13।।

---

9. रुन्धेन्नमिके-ख
10. मुदः त्रिदेवानां-क
11. केन-क.
 2-8 श्लोकाः 'ग' मातृकायां पञ्चमे पटले वर्तन्ते। एतदनन्तरं 'ग' मातृकायामेषा पङ्क्तिर्वर्तते- 'अथार्चनविधिं वक्ष्ये शिवस्य परमात्मनः। 'ग' मातृकायामेतया पङ्त्त्या चतुर्थः पटलः प्रारभते।
12. चत्रिशः-ख, तिग्मरः-क
13. आलिप्य-ख
14. सलिलैः क्षपेत्-क
15. वदेत्-ख, पदम्-क
 अघमर्षणसूक्तेन ब्रह्मभिश्चाघमर्षणम्-ग
16. वारिमाप्लाव्य-क
17. वाससम्-क, विधाय सिताम्बरम्-'ग'
18. संस्मरेत् हरम्-क, संस्मरच्छिवः-ग
19. देवानृषिगणान्वितम्-क
20. त्रिराचमेत्-क, द्विराचमेत्-ग

पञ्चात्मना [21]ह्युपस्पृश्य नेत्रे चापि नसोः पुटे।
श्रवणे हृदये मूर्ध्नि संस्पृशेत् ब्रह्मपञ्चभिः।।14।।

द्वारपालावथाभ्यर्च्य प्रविश्य भगवद्गृहम्।
तलौ[22] पृष्ठौ च भुजयोः स्वास्त्रेण परिशोध्य च।।15।।

अङ्गानि करशाखासु मूलं हस्ततलद्वये।
अङ्गुलाग्रे[23] ततश्चास्त्रमघोरास्त्रं[24] समुद्धरेत्।।16।।

तालत्रयं च दिग्बन्धमग्निप्राकारमेव च।
कृत्वा सुखासनासीनो[25] भूतशुद्धिमथाचरेत्।।17।।

अपनीय च निर्माल्यं विलोमाद्[26] ब्रह्मपञ्चभिः।
सञ्क्षाल्य भगवद्विम्बं पीठं पाशुपतेन च।।18।।

मण्डलानि[27] धरादीनां प्राणायामेन शोधयेत्।
गुणतः पञ्च चत्वारः त्रयो द्वौ च सकृत्क्रमात्।।19।।

वायुं ह्यमृतबीजैस्तु रेचपूरककुम्भकैः।
दश द्वादशमात्राभिस्तथा षोडशभिः क्रमात्।।20।।

जानु प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम्।
क्रियते योऽङ्गुलीस्फोटः सा मात्रा प्रणवात्मिका।।21।।

मूलाधारे महीबिम्बं पिकाभं चतुरस्त्रकम्।
अर्धेन्द्वाभं ततो नाभौ मण्डलं वारुणं सितम्।।22।।

त्रिकोणं रक्तवर्णं तु हृदये वह्निमण्डलम्।
पृक्तं षट्बिन्दुकं कृष्णं कर्णमूले तथानिलम्।।23।।

21. पञ्चात्मनाप्युपस्पृश्य-ख
22. तले-क
23. अङ्गुलास्त्रे-क
24. समुच्चरेत्-ख, समुच्चरन्-ग
25. सुवासनासीनो-क
26. विल्लामात्-क, आत्मसात्कृद्वारिभिः-ग
27. मण्डलादि-क, मण्डलानि च भूतानां-ग

अञ्जनाभं ततो वृत्तं मूर्ध्नि वैहायसं स्मरेत्।
काण्डमेलसुषुम्नायास्तानि स्युर्वेणुपर्ववत्।।24।।
तेभ्यः सर्वशरीरेषु शिराणां सम्भवो(भवेत्)।
वायवाः सप्तवर्णा स्युराप्या अत्राष्टसङ्ख्यया।।25।।
आग्नेया [28]नववायव्यास्तावद्वैहायसा अपि।
एवं भूतलिपिर्ज्ञेया द्विचत्वारिंशदक्षराः।।26।।
मुख्याः पञ्च ततो नाड्यः तासु प्राणादयः स्थिताः।
तावन्तश्चाग्नयस्तेषु तेषु चापः प्रतिष्ठिताः।।27।।
अप्सु स्थिता महाभागाः पार्थिवाः परमाणवः।
उद्घातावृत्तिभिस्तानि मण्डलानि विशोध्य च।।28।।
शुद्धतत्त्वं परे तत्त्वे योजयित्वा परे परे।
निष्कलं तु शिवे तत्त्वे योजयेत्परमात्मनि।।29।।
तत्तोयमन्त्यनाभिस्थं तेन देहं विशोध्य च।
हृदयेष्वग्निमुत्पाद्य रेफणामुन्दहेत्पुनः।।30।।
मूर्ध्नि चान्द्रमसं बीजं तेन सम्प्लाव्य तन्मयम्।
भावयित्वा ततश्चाण्डं तद्भित्वास्त्रे पुमान् शिवः।।31।।
पूर्वोपसंहृतं तस्मिन् सुधीः संयोज्य केवलम्।
ततः सृष्टिक्रमेणैव सर्वाह्वानं प्रकल्पयेत्।।32।।
अङ्गानि करशाखासु शस्त्रहस्ततलद्वये।
हृदयादिषु चाङ्गानि देहे मूर्ध्नि मुनीश्वरान्।।33।।
छन्दांसि वाक्पथे कल्प्य हृदये मन्त्रदेवताः।
अष्टेशादिमन्त्राणि पञ्च पञ्चाङ्गुलीषु च।।34।।
भूतोक्ते[29] हृदि गुह्ये च पादयोर्विन्यसेत्क्रमात्।
स्वस्ववक्त्रेषु देहेऽस्मिन्व्यापकं च पुनः न्यसेत्।।35।।

28. वायव्यया-क
29. भूतेक्ते-क

प्राग्याम्यवरुणोदीच्यमध्यमूर्धसु चेशगाः।
प्राक्प्रत्यक्दक्षिणोदीच्यवक्त्रेषु पुरुषात्मिकाः।।36।।

हृद्गलांसद्वयेनाभिपृष्ठयोरपि च क्रमात्।
अघोरजाः पुनर्वामी गुह्ये च करणे न्यसेत्।।37।।

ऊर्वोर्जन्वोश्च जङ्घास्थिकटिपार्श्वाङ्गुलीषु च।
(नेत्र)स्तनौ नसौ[30] बाहुयुगलेषु च मूर्तिजाः।।38।।

अङ्गीकृत्य जपेन्मन्त्रं ध्यायन्नष्टोत्तरं शतम्।
उदपात्रमथादाय प्रक्षाल्याग्रे निधाय च।।39।।

सम्पूर्य गन्धपुष्पाद्भिः प्रणवेनाभिमन्त्र्य च।
वौषडन्ते नतेनाद्भिः प्रोक्ष्यात्मानं च साधनम्।।40।।

आत्मानमभ्यर्च्य च गन्धपिष्ठेन
आलिख्य पुण्ड्राणि ललाटमध्ये।
कर्णौ च अंसद्वितयेन सितेन
हृदन्तरे पञ्च च पित्रमन्त्रैः।।41।।

के वक्त्रे हृदि गुह्ये च पादयोर्वदनेषु च।
ईशादि पञ्च मन्त्रैस्तु निक्षिपेद् भस्ममन्त्रितम्।।42।।

अष्टत्रिंशत्कलास्थानेष्वादरात्ताभिरेव च[31]।
जङ्घा[32] च हृदयं तेन रक्षार्थं दिक्षु निक्षिपेत्।।43।।

तारेणावाह्य सङ्कल्प्य तोयाद्यैः पीठमर्चयेत्।
आदावाधारशक्तिं तां तेजोरूपां परावराम्[33]।।44।।

उपरिष्ठात्ततोऽनन्तं सहस्रफणमण्डितम्।
धर्मं रक्तं वृषाकारं ज्ञानं श्यामं मृगाधिपम्।।45।।

---

30. स्तनासाके-क
31. 22 पद्यतः 42-1/2 पद्यं यावत् पद्यानि 'ख' मातृकायां न सन्ति।
32. जप्ताग्नि-ख
33. परात्पराम्-ख

वैराग्यं पीतभूतं स्यादैश्वर्यं वारणं सितम्।
अनलादिषु कोणेषु नञ्पूर्वस्तां दिशासु च।।46।।
सत्त्वेन रजसा पीठं तमसा बन्धयेद् दृढम्।
अधोर्ध्वच्छदने मायाविद्ये कृष्णसिते न्यसेत्।।47।।
लैपीयं पङ्कजं मध्ये केसरेषु च शक्तयः।
वामा ज्येष्ठा च रौद्री च काली[35] च कलपूर्विका।।48।।
बलपूर्वा विकलिनी बलप्रमथनी पुनः।
सर्वभूतादिदमनी कर्णिकायां मनोन्मनी।।49।।
श्वेता रक्ता तथा कृष्णा पीता श्यामाग्निसन्निभा।
श्वेता कृष्णा तथा रक्ता दीपाकारास्त्विषोल्बणाः।।50।।
पत्रकेसरभौमाख्यस्थानेषु व्याप्य[36] तेजसा।
ओमैः स्थितं [37]भानवीयं सौम्यमाग्नेय्यमेव च।।51।।
आत्मानमन्तरात्मानं परमात्मानमेव च।
मण्डलानामभेदेन पीठमेवं समर्चयेत्।।52।।
तन्मध्ये [38]लिङ्गसदृशं भावयेद्विग्रहं पुनः।
आवाह्य हृदयादीशं दीपाद्दीपं यथा तथा।।53।।
आदायाञ्जलिपद्मे तु सुषुम्नारन्ध्रमार्गतः[39]।
सुषुम्नारन्ध्रमार्गेण शिवलिङ्गं नियोजयेत्।।54।।
आवाह्य परमं पूर्वं सूक्ष्मं स्थूलं पुनः स्मरेत्।
सर्वगत्वादनन्तस्य न चेत्तस्य गतागती।।55।।

---

34. स्त्रफामण्डितैः-क
35. कालीयकलपूर्विका-क
36. व्याप्यते जडाः-ख
37. मानवीयं-ख
38. ब्रीहिसदृशं-ख
39. मार्गणे-क

यथा सर्वगतो वायुः व्यजनेन[40] महामते।
व्यक्तिमभ्येति भगवानाहूतस्तद्वदेव हि।।56।।
मूर्त्यङ्गपरिवारादिभेदेन बहुधा स्थितः।
यथाम्बरस्थः सविता त्वेक[41] एव महामते।।57।।
जलाश्रयाणि चाश्रित्य बहुत्वं[42] मन्त्रमूर्तिषु।
[43]अष्टप्रकृतिरूपाणि पूजाद्रव्याणि युक्तितः।।58।।
अनुग्रहाय भक्तानां तानि गृह्णाति शक्तिमान्।
स्वमन्त्रेणार्पितं[44] गन्धं पार्थिवं पुष्पमत्र खम्।।59।।
वायव्यं धूपमाग्नेयं दीपं तोयं तु वारुणम्।
अहङ्कारात्मकं चान्नं[46] बुद्धिरूपं रसत्रयम्।।60।।
मन्त्रं गुणात्मकं चैशं ज्ञानशक्त्या समर्पयेत्।
ख्यातामावाहने मुद्रां स्थापनीं च निरोधनीम्।।61।।
प्रार्थनीमर्पणे ख्यातां तथा [47]पञ्चमुखीमपि।
ताभिरावाहनादीनि स्वस्वमन्त्रैः[48] समाचरेत्।।62।।
अङ्गैश्चतुर्भिर्मूलेन पञ्चार्णैं ब्रह्मपञ्चभिः।
स्वस्वमूलेन चान्येषां ब्रह्मयागे त्वजादिकम्।।63।।
सङ्कलीकरणं कृत्वा मन्त्रन्यासं[49] तु पूर्ववत्।
प्रार्थनीं वन्दनीं चैव शूलखट्वाङ्गमुद्रके।।64।।

---

40. स्वजनेन-क
41. एक एव-ख
42. बहु मन्ति-क
43. तस्याष्टप्रकृति-ख
44. स्वमन्त्राणां तं-क
45. पुष्पमन्त्रवम्-क
46. चाहं-क
47. पञ्चमणीमपि-ख
48. स्वस्त्र-क
49. मन्त्रस्यासन्तु-ख

परश्वेणादिकाः[50] सर्वाः संदृश्य परमेश्वरम्।
मूर्त्यङ्गपरिवारैस्तद्ध्यात्वा सपरिवारकम्।।65।।
पाद्यमर्घ्यं तथाचामं हृन्मन्त्रेण प्रदापयेत्।
मधुपर्कं च मूलेन स्नानं गायत्र्या ददेत।।66।।
कवचेनाम्बरं दत्वा तारेणास्योपवीतकम्[51]।
भूषणं मूलमन्त्रेण सर्वं मूलेन वाचरेत्।।67।।
मूर्त्यङ्गेभ्यस्तु भूषान्तं[52] स्नानादि परिकल्पयेत्।
गन्धादीनि तु सर्वेषां परिवृत्या[53] शिवादिकम्।।68।।
दिक्पाल[54] शस्त्रपर्यन्तं मूर्तिपक्षा[55] वसानिकम्।
[56]शम्भुपुष्पावसानं तु पुष्पैस्त्रिविधमर्चयेत्।।69।।
मूर्धादि पञ्चस्थानेषु पञ्चवक्त्रेषु मूर्तयः।
हृदयं हृदयेऽभ्यर्च्य शिरः शिरसि विन्यसेत्[57]।।70।।
शिखायां तु शिखामिष्ट्वा कवचं [58]स्तनमध्यतः।
शस्त्रं हस्ततलद्वन्द्वे शम्भुपक्षमितीरितम्।।71।।
पश्चिमाभिमुखे लिङ्गे सद्यवक्त्रे तु पौरुषम्।
वक्त्रयागे तु मूर्त्याख्ये सद्यादिपरिकल्पना[59]।।72।।
संस्मृता न तु देवस्य दिङ्मुखादिविकल्पना।।
ईशानमुपरिष्टात्तु दिग्दलेषु च मूर्तयः।।73।।

---

50. दिताः-क
51. पवीतिकम्-ख
52. भूषास्त्रं-ख
53. परिवृत्यानि चादिकम्-क
54. दीपा च-क
55. मूर्त्तिक्षं-क
56. शुभपक्ष्मावसानं-क
57. पूजयेत्-ख
58. तुनमध्यतः-ख
59. परिकल्पयेत्-ख

अग्नीशरक्षो वाय्वग्रे दिक्षु चाङ्गानि षट् क्रमात्।
वरदा भयहस्ताः स्युस्त्रिरूपाशाङ्गदेवताः।।74।।
अनन्तः प्राग्दलाग्रे[60] तु सूक्ष्मस्तद्वच्च[61] दक्षिणे।
शिवोत्तमं[62] तु वारुण्यामेकनेत्रं [63]तथोत्तरे।।75।।
एक[64]रुद्रमथैशान्यां त्रिमूर्तिमनले यजेत्।
श्रीकण्ठं नैर्ऋतेऽभ्यर्च्य शिखण्डिमनले यजेत्।।76।।
जटामण्डलिनो रुद्रा नागाभरणभूषिताः।
शूलाशनिशरेष्वासबद्धदोर्दण्डभूषणाः।।77।।
रक्तोऽतिरक्तः [65]सुसितश्चारुणश्शशिसन्निभः।
रक्तोऽलिरक्तश्श्याम [66]स्त्रिणेत्रश्चन्द्रशेखरः।।78।।
उमा चण्डेश्वरो नन्दी महाकालो गणेश्वरः।
वृषो भृङ्गीरटिस्स्कन्दः[67] उत्तरादिदिशासु[68] च।।79।।
[69]खट्वाङ्गं परशुं शूलं तर्जनीं दधतं करैः।
त्रिणेत्रं [70]शुभ्रवर्णं तु ध्यायेच्चण्डेश्वरं विभुम्।।80।।
तारहुंफट् तयोर्मध्ये [71](वह्नि) चण्डपदं न्यसेत्।
अङ्गानि मन्त्रवर्णैस्तु बीजमाद्यक्षरं मनोः।।81।।

---

60. प्राग्दलेग्रे-क
61. तद्वय-क
62. शिखोत्तमं-क
63. ततोत्तरे-क
64. एकमूर्त्तिस्थैशान्यं-क
65. वरुणं-क
66. रक्तोरक्तश्यामवर्णास्त्रिनेत्रश्-ख
67. वृषोभिकिरीटितस्तण्डु-क, भृङ्किरिटिस्कन्दे-ग
68. उत्तरादिक्रमण तु-क
69. पट्टाङ्गं-क
70. त्रिनेत्रमाम्रवर्णं-ख
71. नी-क, नि-ख

नन्दिनं [72]शूलखट्वाङ्गवरदाभयभूषणम्[73]।
पद्मरागप्रतीकाशं वैष्णवं मां स्मरेत् बुधः।।82।।
तारशक्त्याख्ययोरन्ते[74] स्फुरत्स्फोटय हुं वदेत्।
त्रियक्ष्मेति[75] समाभाष्य पूर्णचन्द्रद्वयान्वितम्।।83।।
एकद्वित्रैकभिर्द्वन्द्वैर्वर्णैरङ्गानि कल्पयेत्।
श्यामवर्णं विलोलाक्षं [76]दण्डकोदण्डधारकम्।।84।।
त्रिणेत्रं च महाकालं ध्यायेद्रक्ताम्बरं विभुम्।
श्रीकण्ठबीजहुन्मध्ये कपालिङ्ग इतीरयेत्।।85।।
तारं शक्तिं च मन्त्रादावुद्धृतं तन्नवाक्षरम्।
बीजैस्त्रिभिश्च नाम्ना च व्योमार्णेन हृदा[77] क्रमात्।।86।।
अङ्गानि कल्पयेद्विद्वान् [78]महाकालार्चनाविधौ।
पाशाङ्कुशौ स्वदन्तञ्च[79] दाडिमं दधतं [80]स्मृतम्।।87।।
[81]सुरत्नमकुटं रक्तं तुन्दिलं हि गजाननम्।
तारहृल्लेखयोरन्ते वीजं नाम [82]नमो युतम्।।88।।
तत्तृतीयेन[83] बीजेन दीर्घस्वरयुजा क्रमात्।
कल्पयेच्च षडङ्गानि न च [84]मन्त्रं[85] दशाक्षरम्[86]।।89।।

---

72. पट्टाङ्गं-क
73. धारकम्-ख
74. योन्ते-क
75. त्यक्षेति-ख
76. चण्ड-ख
77. हृदं-क
78. महाकाली ना विधौ-क
79. डाडिमं-क
80. सुतम्-ख
81. सरक्त-ख
82. मदेयुतम्-क
83. तत्रतीयेन-क
84. चामन्त्रं-क
85. दशक्षरम्-क
86. 89 श्लोकः 'ख' मातृकायां नास्ति।

तारहृल्लेखयोरन्ते लान्तं बिन्दुसमन्वितम्।
उच्चरेत्सौरभेयाय नत्या मन्त्रं दशाक्षरम्।।90।।

बीजनामनमस्कारैः कल्पयेदङ्गपञ्चकम्।
वृषाभं [87]वृषभं ध्यायेत् त्रिनेत्रं कुन्दसन्निभम्।।91।।

पीतवर्णं विलोलाक्षं शूलटङ्कधरं विभुम्।
ब्रह्माञ्जलिधरं ध्यायेत् ध्यायन्तं परमेश्वरम्।।92।।

तारहृल्लेखयोरन्ते नाम चान्तं[88] नमोऽन्वितम्।
नामाद्यर्णं तु बीजं स्यात् पञ्चानां[89] बीजनामभिः।।93।।

लान्तबिन्दुयुतं बीजं विन्दुना[90] रहितं च तत्।
बलद्ध्रुवे नमःशब्दं चतुर्वर्णैर्नमोऽन्वितम्।।94।।

षडङ्गानि ततो ध्यायेत् कुङ्कुमाभं षडाननम्।
शक्तिवङ्काधरं सौम्यं धनुर्वाणं[91] कराम्बुजैः।।95।।

एवं ध्यात्वा यजेदेतान् वीथ्यामेव [92]गणेश्वरान्।
इन्द्रमग्निं यमं चैव निऋतिं वरुणं क्रमात्।।96।।

वायुं सोमं कुबेरं च रुद्रं शेषं पितामहम्।
वज्रपाणिं सहस्राक्षं श्यामलं गजवाहनम्।।97।।

त्रिणेत्रं त्रिशिखं रक्तमश्वगं शक्तिपाणिनम्।
रक्ताम्बरधरं कृष्णं महिषोपरि दण्डिनम्।।98।।

खङ्गपाणिन्नरारूढं श्यामवर्णं त्रिलोचनम्।
मेषस्थं पाशपाणिं तु श्वेतवर्णं त्रिलोचनम्।।99।।

---

87. वृषाकारं वृषं ध्यायेत्-ख
88. न मन्देन्त-क
89. पञ्चाङ्गं-ख
90. वीजना-क
91. ण्डनुर्वण-क
92. गणैश्वरान्-क

पीतवर्णं मृगारूढं ध्वजहस्तं त्रिलोचनम्।
शशारूढं गदापाणिं श्वेतं श्यामं विमानगम्।।100।।
शूलिनं [93]कपिलं ध्यायेद् वृषस्थं चन्द्रशेखरम्।
अनन्तं पूर्ववत्पीतं पद्मस्थं पद्मलोचनम्।।101।।
जटामुकुटसंयुक्तं नागाभरणभूषितम्।
कुम्भमक्षस्रजं मुद्रां पङ्कजं दधतं स्मरेत्।।102।।
इन्द्रादिलोकपालानामायुधानि च तद् बहिः।
गणेशानां [94]पृथग्यागमङ्गमातृदिशाधिपैः।।103।।
शिवपीठे तु यष्टव्या मुक्त्वा स्कन्दगणेश्वरौ।
तीव्रा च ज्वालिनी नन्दा भोगदा कामरूपिणी[95]।।104।।
उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी।
शिवपीठे यजेदेतां त्वाङ्गमात्रो रथान्तरे।।105।।
यष्टव्या मूर्त्तयश्चाष्टौ [96]स्कन्दयागे तथैव च।
विघ्नो विनायको वीरः शूरो वरद एव हि।।106।।
गजवक्त्रैकदंष्ट्रौ च लम्बोदर इति क्रमात्।
विद्या शान्तिः स्मृतिर्मेधा प्रज्ञा कान्तिर्द्युतिर्धृतिः।।107।।
व्यापिनी नव सम्प्रोक्ताः शक्तयः क्रौञ्चधातिनः।
सनत्कुमारं पूर्वदले[97] स्कन्दं याम्यपल्लवे।।108।।
बाणं पश्चिमदिग्भागे हेमचूडं[98] तथोत्तरे।
[99]भद्रसेनमथैशान्यां भवपुत्रमथानले।।109।।

---

93. कपालिलिनं-क
94. पुनर्यागमङ्गमात्र-क
95. एषा पङ्क्तिः 'ख' मातृकायां नास्ति।
96. स्कन्दयोगे-क
97. दलं-क, स्कन्दं दक्षिणपल्लवे-क, ख
98. हेमचूर्णं-क
99. भद्रचूडं-ख

नैर्ऋत्यां देवसेनं च देवयानिमथानिले।
अङ्गानि [100]मूर्तीरभ्यर्च्य पूर्ववद्वा यजेदिह।।110।।

तृतीयं च द्वितीयं च पञ्चमं षष्ठमेव हि।
चतुर्थं प्रथमं वर्णं सप्तमं दशमं क्रमात्।।111।।

नवमं च दिशापानां बीजानि व्यापका[101] ह्वयेत्।
तारहृच्छस्त्रनामान्ते हूं फडन्तस्तु हेतयः।।112।।

प्रासादार्चनवेलायां नादब्रह्मभिरावृतः।
पुरुषाद्यो रसाद्याख्या वामेशानैः समावृताः[102]।।113।।

पञ्चार्णवीजसम्भिन्नैः पञ्चब्रह्मार्चने स्मृतः।
प्रसम्भिन्नैस्तु पञ्चभिः पञ्चाक्षरविधौ स्मृतः।।114।।

तारादिपञ्च ऋग्भिस्तु पञ्चब्रह्मार्चने स्मृतः।
तारप्रासादसम्भिन्नं मूर्त्तिभिश्च समावृतः।।115।।

व्योमव्यापी शिवो मध्ये ध्येयः सकलनिष्कलः।
या मूर्त्तिरर्च्यते मध्ये प्रयान्ति परिवारकाः।।116।।

अन्याश्च मूर्तयः सर्वाः प्रधानस्थानगः शिवः।
शान्तिर्विद्या प्रतिष्ठा च निवृत्तिरनलादिषु।।117।।

कोणेषु मूर्तियागे तु यष्टव्याः शक्तयः क्रमात्।
आनन्तादिषु यागेषु पञ्चात्मा तद्वदेव हि[103]।।118।।

गणेश्वराणां यागे तु देवीस्थानद्वयोदितम्[104]।
लोकपालार्चने ब्रह्ममध्यस्थःस्थानगः प्रभुः।।119।।

ध्यात्वैवं गुडपुष्पाद्यैः सम्यगभ्यर्च्य शङ्करम्।
मुद्राः सन्दृश्य देवाय [105]नैवेद्यं च निवेदयेत्।।120।।

---

100. मूर्त्तिम-ख
101. ख्यापकाह्वये-क
102. समावृतम्-ख
103. श्लोक सं. 114 तः 118 श्लोकान् यावत् पाठः 'ख' मातृकायां नास्ति।
104. द्वयोदिता-क
105. निवेद्यं-क

प्रोक्ष्यास्त्रेण च संस्पृश्य बीजमुख्येन मन्त्रवित्।
परिषिच्य व्याहृतीभिर्दत्वार्घ्यं प्रणवेन च।।121।।

पञ्चप्राणाहुतिः पञ्च ब्रह्मभिः परिकल्पयेत्।
धेनुमुद्राञ्च सन्दृश्य दिक्षुरक्षां विधाय च[106] ।।122।।

अग्निमभ्यर्च्य मूलेन कृत्वा च परिषेचनम्।
अष्टोत्तरसहस्रं[107] वा शतमष्टाधिकं हुनेत्।।123।।

मूर्त्यङ्गैस्तद्[108] दशांशं[109] तु विघ्नेशाद्यैः[110] सकृत् सकृत्।
परिषिच्य पुनर्जप्त्वा होमशेषं[111] समाप्य च।।124।।

[112]अनले वानिले पीठे द्वारयोग्यं बलिं हरेत्।
अग्नये तेजोऽधिपत्यै देवमुखाय रुद्रपार्षदे नमः।।125।।

त्रिवारं पञ्चवारञ्च बलिं दत्त्वाऽमुना हरेत्।
ओं नमो रुद्रपार्षदेभ्यः सर्वेभ्यो नमो नमः।।126।।

आमूर्त्तिमयान् विप्रान् भोजयेद् घृतपायसम्।
अन्नशेषञ्च निर्माल्यं चण्डेशाय निवेदयेत्[113] ।।127।।

पाद्यमर्घ्यमथाचामं चन्दनं पुष्पमेव च।
घण्टारवयुतं धूपं दीपं च स्तुतिमेव च।।128।।

ताम्बूलमर्घ्यं दानं च कृत्वा मूलेन देशिकः।
शिवहस्तं ततो मूर्ध्नि दत्वा जप्त्वा प्रणम्य[114] तम्।।129।।

---

106. एषा पङ्क्तिः 'क' मातृकायां नास्ति।
107. अष्टाक्षरसहस्रं-क
108. तु-ख
109. दशांगं-क
110. विद्धयैशाद्यैः-ख
111. होममध्यं-क
112. ननले-क
113. 'क' मातृकायां 123-127 श्लोकाः पञ्चमे पटले वर्तन्ते।
114. मनम्य-क

पद्मस्थं जङ्गमस्थं वा संहृत्यात्मनि योजयेत्।
आगच्छावाहने योज्यं क्षमस्वेति [115]विसर्जने।।130।।

कलशात्तोयरूपेण प्रतिमायां नियोजयेत्।
नोद्धरेत्प्रतिमासंस्थं मुक्त्वा जीर्णादिरुषितम्।।131।।

एवं यः पूजयेद्देवं भक्त्या च परमेश्वरम्।
इह कामानवाप्यान्ते याति शम्भोः परं पदम्।।132।।

**इति श्रीपाशुपते[116] नन्दिप्रोक्ते चतुर्थः पटलः॥**

**॥ ज्ञानकाण्डं समाप्तम्॥**

115. विसर्जयेत्-ख
116. पाशुपते-ख

# अथ चर्याकाण्डम्

## अथ पञ्चमः पटलः

### नन्दिरुवाच

उत्पादयेद् [1]वह्निमनन्तरं च
संहृत्य चोत्पाद्य निजं[2] शरीरम्।
मन्त्रैः प्रविन्यस्य[3] समर्चयित्वा।
सम्पूज्य विघ्नं सगुरुञ्च नत्वा।।1।।

सम्मार्ज्य वायुवीजेन [4]कुण्डं तद्दर्भमुष्टिना।
आलिप्येशानपर्यन्तं शकृता [5]वरुणेन तु।।2।।

अघोरास्त्रेण सञ्जप्तान् सिद्धार्थान्विकिरेत्ततः।
सम्मार्ज्य गन्धतोयेन गायत्र्या [6]परिकल्पयेत्।।3।।

शोष्य सन्दह्य विप्लाव्य[7] बीजैः संशोष्य सन्दहेत्।
उद्धृत्यावोक्ष्य[8] चास्त्रेण निक्षिप्य सिकताः[9] पुनः।।4।।

---

1. उत्पादयेदग्निम-ख
2. निभं-क
3. प्र परिकल्पयेत्-क
4. काण्डं-क
5. शकुतादावारुणे-क
6. परिकल्पयेत्-क
7. सम्प्लाव्य-ख, शोषणदहनप्लावनशोषणदहनानि वीजकैश्च निजैः-ग
8. प्रोक्ष्य-ख, भुवा स्वास्त्रेण-ग
9. विकतां-क

सङ्गृह्य[10] वामनास्त्रेणोल्लिख्य शकलं त्यजेत्।
षट्त्रिंशद्दर्भसङ्क्लृप्तविष्टरं प्रणवेन तु।।5।।

पुष्पाक्षतानि विन्यस्य पीठं तत्र समर्चयेत्[11]।।
आवाह्य विष्टरे देवं[12] पूर्वोक्तविधिना यजेत्।।6।।

अस्त्रेणाग्निं समादाय कवचेनावगुण्ठ्य[13] च।
सञ्छाद्य[14] शिरसा दर्भैः सम्पूज्य हृदयेन च।।7।।

शिखा मन्त्रेण सन्ताड्य विश्लिष्य नयनेन च।
ध्यात्वात्मानं शिवं देवं चिद्रूपां कुण्डमध्यगाम्।।8।।

रत्यर्थिनीमृतुस्नातां ध्यायन्नादाय पावकम्।
[15]परिहृत्य त्रिधा तस्यां योन्यां मूलेन निक्षिपेत्।।9।।

इन्धनानि क्षिपेत् पुंसां कुर्यात्तेन समेधनम्[16]।
परिसमुह्य[17] च तेनैव[18] पर्युक्ष्य च परिस्तरेत्।।10।।

स्रुक्स्रवौ षडशेषाणि प्रोक्षणीं तेन सादयेत्।
प्रोक्षणीकरणं कुर्यात्तारेणाऽऽज्यस्य संस्कृतिम्।।11।।

स्रुक्सम्मार्जनमन्त्रेण[19] मूलेनाग्निं समर्चयेत्।
पञ्चाक्षरस्य पञ्चार्णैस्स्वाहान्तप्रणवादिकैः।।12।।

अङ्गैश्चतुभिर्मूलेन प्रासादस्यैव पञ्चभिः।
त्रिधैवं मूलमन्त्रैर्वा क्रियानामावसानिकाः।।13।।

---

10. स्वगृह्य-क, स्वगृह्य वर्त्मनोल्लिख्या चास्त्रेण क्षालयेत्करम्-ग
11. पुष्पाक्षरान्वितं त्यक्ता पीठमत्र समर्पयेत्-क
12. देवीं-क
13. कुण्ठ्य-क
14. संज्ञाप्य-ख
15. परिश्रम्य-ख
16. एषा पङ्क्तिः 'क' मातृकायां नास्ति।
17. परिसमूह्य-क, तेनैव परिसमूह्य-ग
18. केनैव-क
19. सम्मार्जनमस्त्रेण-ख

अष्टाक्षरस्य वर्णैर्वा व्रतबन्धावसानिताः।
अष्टावस्य रसं युक्ता नादेन द्वादश क्रियाः।।14।।
प्रासादेन ततः कुर्यात् समावर्तनमेव हि।
गर्भाधानं पुंसवनं सीमन्तं जातनामनी।।15।।
सद्यादिब्रह्मभिः कृत्वा पुंसा चैलोपनिष्क्रमः।
शिवेनान्नाशनं चैलं पुंसा भूयः शिवेन च।।16।।
व्रतवन्धं तु सद्याद्यैः समावर्तावसानिकाः।
क्रिया वेदव्रताद्यास्तु [20]पत्नीयोगं नवात्मना।।17।।
[21]यागं प्रासादबीजेन षोडशैव समाचरेत्।
स्वमन्त्रैः समिधं हुत्वा चाज्येनाष्टाहुतीः पृथक्।।18।।
प्रतिकर्मणि नादेन पूर्णां वाथ नवात्मना।
ध्यानं जलप्रदानं च तारेणैव समर्पयेत्[22]।।19।।
एवं [23]शिवाग्निमुत्पाद्य तस्मिन्शिष्यं तु दीक्षयेत्।
शाङ्करं जनयेद्वह्निं पूर्वोक्तं परिगृह्य च।।20।।
वज्रेणोल्लिख्य सम्प्रोक्ष्य शिवास्त्रेण[24] हि वारिणा।
वामदेवेन [25]रुद्राणीमाहूयाङ्गैः [26]सहार्चयेत्।।21।।
मथितं मणिजं वापि श्रोत्रियागारजं शुभम्[27]।
पात्रस्थं वह्निमादाय सद्योजातेन देशिकः।।22।।

---

20. पतियोगं-क
21. योगं-क
22. समर्पणम्-क
23. शिखाग्नि-क, एवमग्निं समुत्पाद्य-ग
24. शिखास्त्रेण-क
25. रुद्राणि-क
26. हूयाग्नैः समर्चयेत्-क
27. तु वा-क

पिधाय वामदेवेन प्रशान्तेन समर्चयेत्।
जप्त्वा [28]शिवं समादाय सद्येनाग्निं विनिक्षिपेत्।।23।।
ईशवामप्रशान्ताख्यपुरुषेशानपञ्चभिः।
गर्भाधानादिकाः कुर्यात् क्रियानामावसानिकाः।।24।।
एवमुत्पाद्य दोषेषु प्रायश्चित्तं समाचरेत्।
इष्ट्वा मण्डलमध्यस्थं शिवं सम्परिवारकम्।।25।।
शिष्यं निर्गत्य संशोध्य नेत्रे बद्ध्वा सुवाससा।
प्रविश्य पाणिमालम्ब्य देवाग्रे स्थाप्य तं शिशुम्।।26।।
क्षिप्त्वा माल्यानि हस्तेऽस्य क्षिपस्वेति वदेद्गुरुः[29]।
शिष्यः पुष्पाञ्जलिं कुर्यान्नेत्रबन्धं विमुच्य च।।27।।
यस्यां मूर्तौ पतेत्पुष्पं तस्य तन्नाम[30] निर्दिशेत्।
स्वस्य दक्षिणतः स्थाप्य स्वयमग्रे प्रविश्य च।।28।।
यथा विभवविस्तारं देवमीशं समर्चयेत्।
पुनरग्निं समासाद्य दक्षिणे स्थाप्य पुत्रकम्।।29।।
पद्मासनस्थं हस्तेऽस्य कुशौ[31] दत्त्वाऽस्य मूर्धनि।
शिवहस्तं तु विन्यस्य मण्डलानि विचिन्त्य च।।30।।
भूतानां सूक्ष्मरूपाणि सर्वतश्चैव[32] चिन्तयेत्।
ग्रथित्वा पञ्चधा[33] सूत्रे तद् ग्रन्थिषु तथा स्मरेत्।।31।।
अग्नावग्निमुखं कृत्वा तस्मिन्नग्नौ तथा स्मरेत्।
स्वात्मन्यपि तथा[34] ध्यात्वा पुंसा पक्वं तु होमयेत्।।32।।

28. शिखम्-क
29. वन्दन्गुरुः-क
30. तन्नामाऽसौ प्रदापयेत्-ख, तन्नामाऽस्मै-ग
31. कुशोदं चाथ-क
32. सर्वतत्त्वैर्विचिन्तयेत्-ख, सर्वतत्त्वयुतानि हि-ग
33. पञ्चशा-ख, पंधा-क
34. कथां-क

उद्वाह्य[35] पञ्चवक्त्राणि शिवादिब्रह्मपञ्चभिः।
पृथक् पञ्चाहुतीर्हुत्वा ध्यायेद्देवमुमापतिम्।।33।।
अग्नेस्तेजसि पद्मस्थं लेलिहानं स्वहेतिभिः।
जिह्वाकारा इति ज्ञेया हेतयः सर्वकामदाः।।34।।
हिरण्या गगनारक्ता सुकृष्णा सुप्रभाह्वया।
बहुरूपातिरक्ता च सप्तजिह्वा हविर्भुजः।।35।।
पञ्चवक्त्रं दशभुजं सप्तजिह्वं त्रिलोचनम्।
प्रोक्ष्यास्त्रेण[36] च सन्ताड्य भस्मना श्लथितं स्मरेत्।।36।।
शिष्यदेहात्समाकृष्य मायासूत्रे नियोजयेत्।
ध्यात्वाभ्यर्च्य पुनर्ग्रन्थीन् निकृत्य स्त्रुचि विन्यसेत्।।37।।
गृहीत्वा चतुर्गृहीतं तद् ग्रन्थ्या सह होमयेत्।
अस्त्रेण प्रोक्षणादीनि तत्त्वना[38]म्नां हुत्क्रिया।38।।
गर्भजन्माधिकारं च [39]भोगन्नाशं च पञ्चभिः।
अष्टाष्टाहुतयः कार्या ब्रह्मभिर्ध्यानमर्चनम्।।39।।
बीजशब्द [40]कलामूर्त्तितत्त्वात्मसहितेन तु।
उदिते[41] नाध्वमन्त्रेण समाप्ते[42] जुहुयाच्छतम्।।40।।
स्त्रुवं पूर्णाहुतिं हुत्वा प्रासादेन समाहितः।
आदायात्मनि संयोज्य पार्थिवं पार्थिवैः स्मरेत्।।41।।
कुम्भयित्वार्चयेद्[43] ध्यात्वा जीवं समरसीकृतम्।
शिष्यदेहे परे तत्त्वे तस्मादुद्धृत्य योजयेत्।।42।।

---

35. उत्पाद्य-क
36. प्रोक्ष्येण च संताढ्य-क
37. च तुर्हितं-क
38. तत्त्वनानाहुतिः-क
39. भोगस्या शं-क
40. बीजं च कलामूर्त्तीः-क
41. उदितो नाट्य-क
42. समासे-क
43. कुम्भयित्वार्पयेत्-क

मुक्ताण्ड इव पक्षीशस्त्यक्त्वाण्डं चाप्सु संस्थितः।
कथमत्रावसं स्वल्पेत्येवं वैराग्यतामियात्।।43।।

उत्तरेषु च तत्त्वेषु एवमेव समाचरेत्।
क्षितिं नाभौ विलोड्याप्सु हृद्यापोऽग्नौ[44] विलोपयेत्।।44।।

वह्निं [45]च पवने कण्ठे तालुमध्ये च खेऽनिलम्।
एवं [46]विरूपमार्गेण [47]कृत्वान्तं शाश्वते पदे।।45।।

चतुरङ्गुलतो व्योम्नि स्थापयित्वा समाहितः।
अस्त्रेण छेदयेत्तस्य शिखां जीवसमन्विताम्।।46।।

व्योमग्रन्थिसमायुक्तं प्रासादपरिमण्डितम्[48]।
पूर्ववज्जुहुयाद्विद्वान् यथोक्ते जातवेदसि।।47।।

गर्भजन्माधिकारं च भोगनाशं च पञ्चभिः।
कृत्वा[49] समाप्य कर्माणि पूर्ववज्जुहुयाच्छतम्।।48।।

जीवन्तं पाशनिर्मुक्तं विश्वव्यापि निरामयम्।
तस्माज्जीवहृदादाय[50] गुप्तं स्वहृदि योजयेत्।।49।।

संशोध्य[51] मरुता देहं पुनर्दग्ध्वा च वह्निना।
सम्मार्ज्य वायुनाप्लाव्य[52] सुधया कल्पयेत्तनुम्।।50।।

दिव्यां सृष्टिं क्रमाद् ध्यात्वा षडध्वन्यासमाचरेत्।
आवाहनक्रमेणैव नाडी[53] सन्धानयोगतः।।51।।

---

44. हृत्याद्यावोशो-क
45. अवह्निपवने-ख
46. विषम-ख
47. कृत्वा तं-ख
48. परिगणितम्-क
49. उक्त्वा-क
50. तस्माच्छिव-ख
51. संशोष्य-ख, ग
52. सङ्प्लाव्य-क, वायुनालिप्य-ग
53. नाढी-क, नाडि-ख

आदाय हृदयादीशं शिष्यदेहे हृदम्बुजे।
नियोज्य सकलीकृत्य गन्धाद्यैरर्चयेद्गुरुम्।।52।।
शिष्यदेहगतस्येह[54] शिवलिङ्ग[55] शतस्य वा।
सर्वदोषविनाशाय सान्निध्यकरणाय च।।53।।
कृत्वा चाग्निमुखं हुत्वा पक्वं वक्त्रेण देशिकः।
सम्पूज्य पीठमन्त्रैस्तु हुत्वाज्यं च सकृत्सकृत्।।54।।
द्रव्याण्यादौ तु संहारे सृष्टिमार्गे तथान्तकः।
उत्पाद्य संहरेन्नाशे संहृत्योत्पादयेत् परे।।55।।
सृष्टौ शतं सहस्रं वा पूर्णान्तित्त्वान्तरे हुनेत्।
षट्त्रिंशदुदितैस्तत्त्वैः पञ्चतत्त्वैरथापि वा।।56।।
मूर्त्यङ्गपरिवाराणां नामभिश्च सकृत्सकृत्।
समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान्।।57।।
सर्पिरष्टोत्तरशतं प्रासादेन हुनेत्पृथक्।
मधुना पयसा दध्ना शान्त्यर्थं तावदेव हि।।58।।
होमं समाप्य सम्पातं सित्त्वा कुम्भजले जपेत्।
[56]तत्त्वैश्शिष्यं शिवं वापि ध्यात्वा तेनाभिषेचयेत्।।59।।
सकलीकृत्य रक्षां च कृत्वोत्थाप्य च तं शिशुम्।
नवाम्बरधरं शुद्धं देवाग्रे सन्निवेश्य च।।60।।
तस्याधिकारं दत्वा तु मन्त्रतन्त्रजलान्वितम्।
कारयित्वार्चनं शम्भोर्मण्डले तद्गतं विभुम्।।61।।
शिष्यात्मनि समायोज्य सकलीकृत्य पूजयेत्।
गुरुं च पूजयेच्छिष्यः पाद्याद्यैर्विधिपूर्वकम्।।62।।

---

54. देहगता-क
55. शतस्य-क
56. एषा पङ्क्तिः 'क' मातृकायां पूर्णा न वर्तते, सम्पातः कलशे सित्त्वा शिष्यं तेनाभिषेचयेत्-ग

दक्षिणां च पुनर्दत्वा स्वात्मानं च नियोजयेत्।
गुरुणा श्राविताान्सर्वान् समयान्पालयेत्सदा।।63।।

त्रिकालमेककालं वा नित्यमभ्यर्चयेच्छिवम्।
शतं वाथ सहस्रं वा जपेत्पञ्चाक्षरं विभोः।।64।।

चण्डालं वा श्वपाकं वा नावमन्येत योगिनम्।
भक्षयेन्नैव निर्माल्यं नित्यमग्नौ तु होमयेत्।।65।।
न बुद्धिभेदं जनयेद् भक्तानां[57] भगवत्पदे।।66।।

**इति श्रीपाशुपते नन्दिप्रोक्ते पञ्चमः पटलः।।**

**।।चर्याकाण्डं समाप्तम्।।**

57. भक्ताः स्युर्भगवत्पदे-क

# अथ क्रियाकाण्डम्

## अथ षष्ठः पटलः

### नन्दिरुवाच

वास्तुयागमथारभ्य[1] यावत्तीर्थाभिषेचनम्।
क्रियाकाण्डेह निर्दिष्टं सङ्क्षेपात्तद्वदाम्यहम्।।1।।

कर्त्ता च शिल्पिना सार्द्धं भूमिमन्वेषयेद्गुरुः।
स्निग्धा रन्ध्रविनिर्मुक्ता पुष्पद्रुमसमाकुला[2]।।2।।

श्वेतारक्ता च पीता च[3] कृष्णा पूर्वोत्तरप्लवा[4]।
नालिकेरकदम्बाम्रबिल्वचन्दनचम्पकैः।।3।।

अशोकमाधवीपर्णबदरैर्दुग्धभूरुहैः[5]।
शोभिता या मही श्रेष्ठा पशुभिश्च निषेविता।।4।।

ग्रामे वा नगरे वापि पर्वते पत्तनेऽपि वा।
नद्यास्तीरे शुभे देशे यत्र वा रमते[6] मनः।।5।।

खात्वा वटं[7] हस्तमात्रं पांसुं संशोष्य पूरयेत्।
अधिके चाधिका भूमिः समे मध्याऽधमा[8] परा।।6।।

---

1. वास्तुयागमारप्स्ये-क
2. एष श्लोकः 'क' मातृकायां नास्ति।
3. वा-ख, ग
4. मुखा-क
5. दग्ध-क
6. रोचते-ख
7. परं-ख
8. समावरा-क

शरावमाममवटे[9] घृतपूर्णं निधाय च।
वर्त्तीः प्रज्वालयेद्दिक्षु ब्राह्मणादीन् प्रकल्प्य च।।7।।
क्रमात्तत्पुरुषाद्यैस्तु दीपानभ्यर्च्य [10]चावटम्।
[11]आच्छाद्य भूयः सम्पश्येद्याम[12]मात्रमतीत्य च।।8।।
ज्वलितेषु च सङ्ग्राह्या वर्णैः सङ्कीर्त्तिता मही।
यद्दिक्षु दीपितो दीपस्तद्वर्णेषु च सा शुभा।।9।।
निर्वापितेषु दीपेषु सर्ववर्णैर्विनिन्दिता[13]।
गन्धपुष्पाक्षतैः पूर्य तोयावर्तं परीक्षयेत्।।10।।
शोभना दक्षिणावर्ते वामावर्त्ते त्वशोभना।
जन्मतः परिशुद्धा या[14] क्रीता[15] वा शुभलक्षणा।।11।।
गृह्णीयाच्च बलिं दत्वा भूतक्रूरेण तां भुवम्।
पललं रजनीचूर्णं सलाजं दधि सक्तु च।।12।।
भूतक्रूरमिति प्रोक्तं ग्रहेभ्यश्चामुना हरेत्।
देवासुराः सगन्धर्वा यक्षाः पितृगणा अपि।।13।।
नागाश्च राक्षसाः प्रोक्ताः पिशाचाश्चाष्टदिग्गजाः।
भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन।।14।।
ते सर्वे व्यपगच्छन्तु स्थानं कुर्यांत्कपर्दिनः।
महीं प्राकारपर्यन्ता[16]मुन्मीयादाय देशिकः।।15।।
खात्वा पुरुषमात्रं तु जलाश्मान्तमथापि वा।
अश्मभिश्च तथा मृद्दिरापूर्याकोट्यमुद्गरैः।।16।।

9. शरावताममवटे-क
10. खावटम्-क, चावटः-ग
11. अजाद्य-क
12. वाम-ख
13. सर्ववर्णैस्तु निद्रिता-ख, सर्ववर्णैस्तु निन्दिता-ग
14. वा-क
15. त्रिता-क, क्रिया-ख
16. प्राकारपर्येण-ख

वेदिं च सुसमां कृत्वा मध्ये चावटसंयुताम्[17]।
अवटं मृद्भिराच्छाद्य तस्यां वास्तुं प्रसारयेत्।।17।।

कृत्वा दशपुटं क्षेत्रं ब्राह्मं षोडश कोष्ठकैः।
अष्टाष्टौ च चतुर्दिक्षु [18]द्विद्विकैर्विदिशासु च।।18।।

एकैकं परितो बाह्ये विदिक्षु(दिक्षु)तैः क्रमात्।
त्रिपञ्चाशत्तु देवानां स्थानान्येवं प्रकल्पयेत्।।19।।

[19]कृत्वा नवपुटं क्षेत्रं नवभिर्मध्यतस्स्थलम्।
अष्टाष्टैश्चतुर्दिक्षु कल्प्यं क्षेत्रचतुष्टयम्।।20।।

कोणकर्णेष्वथैकैकं पदे स्थानाष्टकं नयेत्।
[20]पदार्द्धे बाह्यकोणेषु नीत्वा स्थानाष्टकं क्रमात्।।21।।

पद[21]द्वन्द्वैस्तथा चाष्टौ स्थानानि परिकल्पयेत्।
एकैकपदयुक्तानि शेषाणि परितो मुने।।22।।

मध्ये चतुष्पदं नीत्वा कोणे सूत्रे प्रसार्य च।
त्रिपदैर्दिक्षु चत्वारि पदद्वन्द्वैस्तु षोडश।।23।।

अन्तर्बहिर्विभागेन पदार्द्धैस्तावदेव हि।
कोणपार्श्वेष्वथैकैकं पदैरष्टौ प्रकल्पयेत्।।24।।

मण्डलस्याष्टदिक्ष्वष्टौ स्थानानि परिकल्प्य च।
नानावर्णैस्तु सम्पूर्य कुशैराच्छाद्य खण्डशः।।25।।

गन्धाद्यैः सम्यगभ्यर्च्य बलिं च विकिरेत्पृथक्।
आसीत् पुराऽसुरः क्रूरः सर्वलोकभयङ्करः।।26।।

जित्वा निपात्य तं देवास्तस्याङ्गे संस्थिताः क्रमात्।
कुशपुष्पाक्षतानद्भिः भूतक्रूरविमिश्रितैः।।27।।

---

17. चाशकोष्ठकैः-क
18. द्विद्विकं-ख
19. 'क' मातृकायां 'ख' मातृकायां च पङ्क्तिरेषा न पूर्णा प्राप्यते।
20. पदार्थे-क
21. द्वन्द्वस्-ख

विकिरेणमतिस्तासां देवतानां नमोऽन्वितैः।
ईशानश्चाथ[22] पर्जन्यो जयन्तः शक्रभास्करौ।।28।।
सत्यो कुशश्चान्तरितः प्रोक्तव्या बाह्यपदस्थिताः।
अग्निः पूषा च वितथो गृहरक्षो यमस्तथा।।29।।
गन्धर्वो भृङ्गराजश्च मृगश्च पितरः क्रमात्।
दौवारिकश्च सुग्रीवः पुष्पदन्तः सरित्पतिः।।30।।
असुरः शोषरोगौ च वायुर्नागस्तथैव च।
मुख्यो भल्लाटकः सोमश्चार्गलश्चादि(संस्थिताः)।।31।।
बाह्यस्थाः कीर्तिताश्चान्तः पुनरीशादिदिग्गताः[23]।
[24]आपश्चैवापवत्सश्च आर्यः सावित्र एव च।।32।।
सविता च विवस्वांश्च इन्द्रश्चेन्द्रजयः परः।
मित्रो रुद्रश्च तज्ञेता भूधरश्च पितामहः।।33।।
शर्वस्कन्दोऽर्यमाह्वश्च जम्भकः[25] पिलिपिञ्जकः।
चरकी च विदारी च पूतना पापराक्षसी।।34।।
दिक् विदिक् संस्थिता बाह्ये वायव्यान्तं क्रमेण च।
ग्रहाः समर्चनीयास्ते मण्डलेष्वष्टदिक्षु च।।35।।
बलिद्रव्याणि सङ्क्षेपान्मत्तः [26]शृणु महामते।
आज्याक्षतैर्यजेदीशमुत्पलादि[27] पताकया।।36।।
रत्नैर्वितानैः कोद्रवैर्माषैर्मांसैः स्रुचानलम्।
लाजैः [28]सुपर्णैर्भूयोऽपि महकैः पिशितैरपि।।37।।

---

22. श्चैव-ख
23. 'ख' मातृकायां 28 श्लोकतः एतावत्पर्यन्तं श्लोकाः न सन्ति।
24. अवश्यैवाप-क
25. जम्भतः विलिपिर्मतः-क
26. शूर्ण-क
27. मूलाद्भिः-क
28. सुवर्णैः-क

गन्धैश्च विग्रजिह्वाभिर्यवैश्च तिलवारिभिः।
दौवारिकं दन्तकाष्ठैः धूपैर्दर्भैस्तु पङ्कजैः।।38।।
सुरया च घृतान्नेन यवैश्च घृतमण्डकैः[29]।
नाशनागप्रसूतैश्च भक्ष्यैर्मुद्गोदनेन च।।39।।
मधुपायसैस्तण्डुलैः शाल्यन्नैर्माषसंयुतैः।
क्षीरेणाज्यमथैशान्यां पदार्थे वा पदद्वये[30]।।40।।
तत्पूर्वे सर्पिषा प्राच्यां लड्डुकैश्च कुशोदनैः।
अग्नौ तद्दक्षिणे [31]पुष्पगुडैररुणचन्दनैः।।41।।
हा रुद्रास्तेन नैऋत्यां [32]चित्रान्नैस्तस्य पश्चिमे।
घृतान्नेन [33]गुडान्नेन वायव्यां तस्य चोत्तरे।।42।।
पक्वमण्डाज्य[34]मांसाद्या माषमुद्गोदनैरुदक्।
मांसैः सहार्पयित्वा[35] तु ब्रह्माणं[36] मध्यतो यजेत्।।43।।
तिलगव्याक्षताज्यान्नैः बाह्ये शर्मादिमान् यजेत्।
पायसैस्तु सरुधिरैर्वसारक्तप्रसूनकैः।।44।।
भक्ष्यमांसैर्मांसपित्तैः दध्यन्नेन तु पूतनाम्।
दुग्धपित्तास्थिमांसान्नैः वायव्यां पापराक्षसीम्।।45।।
द्रव्यालाभे तु तद्योग्यकृत्रिमैश्चेतसापि वा।
वास्तुयागमिति प्रोक्तं सर्वसम्पत्करं गृहे।।46।।
हितं नातः परं किञ्चित् विद्यते स्थापनादिषु[37]।
गणेश्वरमथाभ्यर्च्य कृत्वा भूयो गृहार्चनम्।।47।।

29. घृतमंटकैः-क
30. 'ख' मातृकायां 37 श्लोकतः 40 श्लोकपर्यन्तं पाठो नास्ति।
31. गुलै-क
32. वितानै-क
33. गुलान्नेन-क
34. पक्वामय-क
35. सहार्चयित्वा-ख
36. ब्राह्मणं-ख
37. हस्तेन पात्रे द्रव्याणि सादयेत्-ख

मध्यगर्ते तु संशोध्य धान्यगर्तं निधाय च।
तद्वक्त्रे काञ्चनं पद्मं तन्मध्ये कच्छपं न्यसेत्।।48।।
लिङ्गवादो न विस्तीणस्तदर्धोच्छ्रयसंयुताम्।
आधाराख्यां शिलां न्यस्य नवगर्तसमन्विताम्।।49।।
गर्भगेहं शिलाभिस्तु सुदृढं कल्पयेत्पुनः।
द्वारस्य दक्षिणे पार्श्वे न्यस्तव्याः प्रथमेष्टकाः।।50।।
आयामतस्तालमात्रास्तारेणाष्टाङ्गुलाः क्रमात्।
अष्टौ सङ्कल्पयेदेवमुत्सेधां चतुरङ्गुलाम्।।51।।
चतस्रोऽष्टौ द्वादश वा प्रादक्षिण्येन निर्णयेत्।
(एवं गर्भगृहं कुर्याच्छैवागमप्रमाणतः)।।52।।
(तद्वद्गर्तपरीक्षां च गर्तसंस्कारमाचरेत्।)
(प्रक्षिप्य चन्दनं) तद्वत् सोम्याग्रे प्रोक्ष्य वर्मणा।।53।।
उत्तरे धान्यकूर्चेषु स्थाप्याच्छाद्य सुवाससा।
तदुत्तरे निधायाग्निं कृत्वा चाग्निमुखं पुनः।।54।।
पक्वङ्गुल्या स्वगायत्र्या पञ्चभिर्जुहुयाद्धृतम्।
समिदाज्यं चरुणाज्यं हुत्वा तत्पुरुषेण तु।।55।।
अष्टाधिकशतं पूर्णां हुनेदत्र नवात्मना।
प्रणवेन व्याहृतिभिर्लोकपालैः पृथक्पृथक्।।56।।
अग्नये चैव सोमाय गृहेभ्य इति चैव हि।
नक्षत्रेभ्योऽथ भूतेभ्यो नागेभ्यश्च यथाक्रमम्।।57।।
देवताभ्यश्च सर्वाभ्यो विश्वेदेवेभ्य इत्यपि।
पञ्चार्णव्याहृतीभिश्च तारेणाज्यं हुनेदिति।।58।।
ततः स्विष्टकृतं हुत्वा होमशेषं समाप्य च।
स्थित्वा जप्त्वा च पञ्चार्णमेकादशं समाप्य च।।59।।
इष्टकासु च सम्पातं वह्निमुद्वासयेत्पुनः।
कोष्ठेष्वेषु दिशश्चाष्टौ स्थाप्य सत्यकलाष्टभिः।।60।।
पूर्वादीशानपर्यन्तमिष्टकाः कुशलो गुरुः।

उपानह्यत्प्रयुञ्जीत वर्जयेन्निम्नमुन्नतम्।।61।।
पादुकोपरि विप्राणां नृपतेस्तत्समं भवेत्।
अधस्ताद्वैश्यशूद्राणां मृद्दिरालिप्य वावटम्।।62।।
अद्भिः सम्पूर्य निक्षिप्य गन्धपुष्पाक्षतानि च।
गर्ते परीक्ष्य चावर्तं दक्षिणावर्तमुत्तमम्।।63।।
वामावर्त्ते त्वघोरेण शतमष्टोत्तरं हुनेत्।
इष्टकाधानमुद्दिष्टं तस्मिन्गर्भं निधापयेत्।।64।।
आरूढभित्तिविस्तारमष्टधा विभजेत्पुनः।
बाह्येऽत्र चतुरो भागानन्तर्भागत्रयं त्यजेत्।।65।।
तन्मध्ये स्थापयेद्गर्भं गर्ते प्रासादमानतः।
चतुष्करमथारभ्यैकसप्ततिस्तु पश्चिमम्।।66।।
प्रासादमेकहस्तादि नवहस्तान्तमेव च।
लिङ्गं च गर्भपात्रं तु चतुरङ्गुलमादितः।।67।।
कृपाहस्तान्तमुद्दिष्टं त्रयन्त्रैराशिकं नयेत्।
विस्तारायामतस्तुल्यं तावदेवोत्तरच्छदम्।।68।।
विस्तारार्धेन चोत्सेधं पादहीनोत्तरं शुभम्।
वृत्तं वा चतुरश्रं वा पुष्पान्नं ताम्रजं दृढम्।।69।।
सङ्क्षाल्य पञ्चगव्येन प्राणायामैर्विशोध्य च।
सामुद्रीमृदमादाय तया पात्रे प्रतीनयेत्।।70।।
नवखण्डं भवेद्यद्यत्तथा भूबीजमुच्चरेत्।
विहितं जलवस्त्रार्द्रकुशास्तीर्णे तदुत्तरे।।71।।
स्थण्डिले स्थाप्य तत्पात्रं नवाक्षरधरो गुरुः।
सहिरण्येन हस्तेन पात्रे द्रव्याणि सादयेत्।।72।।
पार्वतीतीर्थजां दिक्षु नादेयीं ह्रदसम्भवाम्।
कुलीरजामथाग्न्यादि वाल्मीकीं[38] खलजां क्रमात्[39]।।73।।

38. वात्मिकीं-क
39. 'ख' मातृकायां 47/1-2 श्लोकतः 73 श्लोकपर्यन्तं पाठो नोपलभ्यते।

कोणेषु दन्तिदन्तोत्थां मध्ये वृषविषाणजाम्।
पद्मस्य चोत्पलस्यापि मूलं च कुमुदस्य च।।74।।
रक्तोत्पलस्य[40] पूर्वादि चतुर्दिक्षु प्रविन्यसेत्।
मनःशिलां हरीतालमञ्जनं श्यामसीसकम्।।75।।
सौराष्ट्रीं रोचनां चैव गैरिकं पारदं तथा।
पूर्वादीशानपर्यन्तं [43]पारदं मध्यमे न्यसेत्।।76।।
वज्रमौक्तिकवैडूर्यशङ्खस्फटिकपुष्यकान्।
चन्द्रकान्तं महानीलं पद्मरागं न्यसेत्क्रमात्।।77।।
शालिनीवरक[44]श्यामं कङ्कुमाषकुलत्थकान्।
निष्पावतिल[45]मुद्गाश्च पाकपूर्णां न्यसेत्क्रमात्।।78।।
सुवर्णं रजतं ताम्रमायसं त्रपुकं क्रमात्।
शूलं पद्मं च कूर्मं च दिक्विदिक्षु हिरण्मयान्[46]।।79।।
खट्वाङ्गं [47]बालचन्द्रं च वृषचापपरश्वधान्।
सुवर्णकल्पितानेतान् ब्रह्मस्थाने प्रविन्यसेत्।।80।।
व्योमव्यापि [48]दशार्णैस्तु मृत्पिण्डञ्च निधापयेत्।
भूयः पुरुषकलाभिर्घोरकलाभिस्तथैव (सा)[49]।।81।।
न्यस्य वामकलाभिर्वा कमलाभिस्तथैव[50] च।
सञ्ज्ञाभिः प्रोक्ष्य गायत्र्या (भूयो[51]) होमयेदुत्तरेऽनले।।82।।

---

40. नीलोत्पलस्य-ख
41. सौराष्ट्रिं-क
42. सारतं-क, पारतं-ख, ग
43. पारतं-क, ख, ग
44. शालिनीलावाक-क, शालिनी नारकश्याम-ग
45. निष्पापतिल-ख, निष्पावरीं च-क
46. हिंमयान्-क, हिरण्मयम्-ख
47. पालचन्द्रं-ख
48. दशार्णेन मृत्पिण्डानि धापयेत्-क
49. सद्भिः-क, 'स' मातृकायां 'सा' इति व्यतिरिक्तः पाठः।
50. तथैशसंज्ञाभिः-ख
51. 'भूयः' इति पाठः 'क' 'ख' मातृकायोः छन्दोदृष्ट्या व्यतिरिक्तः।

इष्टकाहोमवत्सर्वं द्रव्यहोमान्तमत्र तु।
पुनः पञ्चाक्षरेणैव हुत्वा चैकादशाहुतीः।।83।।
नामभिर्लोकपालानां स्वाहान्तप्रणवादिकैः।
शङ्करेभ्यश्च[52] बीजेभ्यः सर्वधातुभ्य[53] एव हि।।84।।
लोकेभ्यः पर्वतेभ्यश्च समुद्रेभ्यः क्रमेण तु।
तीर्थेभ्योऽथ नदीभ्यश्च ह्रदेभ्यश्च सकृत्सकृत्।।85।।
पातालेभ्यश्च नागेभ्यो दिग्गजेभ्यो घृतं पुनः।
वृषेभ्यो व्याहृतीभिश्च प्रणवेन तु होमयेत्।।86।।
ततः स्विष्टकृतं हुत्वा होमशेषं समाप्य च।
सम्पातस्पर्शनं कृत्वा मूलमष्टशतं जपेत्।।87।।
पुण्याहं वाचयित्वा तु मुहूर्त्ते शोभने निशि।
विधायादाय पाणिभ्यामिदं मन्त्रमुदीरयेत्।।88।।
सर्वभूतधरे कान्ते [54]पर्वतस्तनमण्डिते।
समुद्रपरिधाने त्वं देवि! गर्भं समाश्रय।।89।।
गर्भावटं तु संशोध्य गोमूत्रैःक्षाल्य चार्चयेत्।
इष्टकावटमध्ये वा वेश्ममध्ये निधापयेत्।।90।।
[55]ध्यायेद्भूमण्डलं तस्मिन्ससमुद्रं सपर्वतम्।
दिग्गजेन्द्रसमायुक्तमनन्तस्योपरि स्थितम्।।91।।
भूबीजेन समुद्घृत्य (विग्रहं)कारयेत्ततः।
लिङ्गं (च) कल्पयेदादौ तद्योग्यं मन्दिरं पुनः।।92।।
कृत्वास्त्रयागं निर्गच्छेच्छिलार्थं प्रागुदङ्मुखाः।।93।।

**इति श्रीपाशुपते नन्दिप्रोक्ते षष्ठः पटलः॥**

---

52. शङ्कराद्यश्च-क
53. कृत्य-क
54. स्तेन-ख
55. भूमण्डलमनन्तस्थं-ख

# अथ सप्तमः पटलः

## नन्दिरुवाच

गत्वा शिलाकरं मन्त्रं ज्ञात्वा दृष्ट्वा शिलां शुभाम्।
तस्यां पश्चिमतोऽस्त्रेण शतमष्टाधिकं हुनेत्।।1।।

शिल्पिनां शस्त्रवृन्देषु सम्पातं तेन सेचयेत्।
दर्भशय्यां समारूढः शिलायाः पश्चिमे गुरुः।।2।।

स्वप्नमाणवकं जप्त्वा स्वपेदेकाग्रमानसः।
नमः शम्भो त्रिणेत्राय रुद्राय वरदाय च।।3।।

वामाय विश्वरूपाय स्वप्नाधिपतये नमः।
आचक्ष्व देवदेवेश प्रपन्नोऽस्मि तवान्तिकम्।।4।।

स्वप्ने सर्वाणि कार्याणि हृदयस्थानि यानि वै।
एवं विज्ञाप्य मन्त्रं तु जपन्[1] ध्यायन् स्वपेद्गुरुः।।5।।

[2]तारं हिलि हिलि स्वाहा तदन्ते शूलपाणिने।
स्वप्नमाणवकं मन्त्रं द्वादशाक्षरमीरितम्।।6।।

नागराजकृते तल्पे शयनं प्रियया सह।
पश्येत्तां देवतारूढामुज्ज्वलन्तीं शिलां यदि।।7।।

अन्यद्वा शोभना शस्ता सा शिला लिङ्गकर्मणि।
'उद्बुध्यस्वे'ति मन्त्रेण लाञ्छयेत्तत्र[3] तत्र तु।।8।।

---

1. जपेत् ध्यायेज्जपेद्-क
2. ताम्रं-क
3. ञ्रयेत्तत्र-ख

अधोभाग[4]मुखं तस्याः शिलायाः पृष्ठमुत्तरम्।
[5]पूर्वाद्यासु स्थितं यस्याः शिरसा दिक्षु शोभना।।9।।
कोणग्रीवा शिला दुष्टा [6]वातातपहता तथा।
उद्धृत्य संस्थितां तत्र यां दिशं [7]वीक्षते शिला।।10।।
तामेव प्रतिमां गेहे पश्यन्तीं स्थापयेद्दिशम्।
ध्वनिर्घण्टानिभा यत्र दृश्य[8]तेच्छेदभेदने।।11।।
[9]स्फुलिङ्गास्तच्छिरस्तस्यास्तत्र चिह्नं प्रकल्पयेत्।
[10]रथशिल्पिविकारादीन्[11] परिहृत्य[12] च तां [13]शिलाम्।।12।।
आनीय [14]भगवद्गेहं तया लिङ्गं च कारयेत्।
देवयोन्याश्रितं मानं हस्तैरष्टविधं विदुः।।13।।
नवाष्टहस्तं देवानां [15]ह्रासादेकैकपादतः।
दैत्यराक्षसयोर्लिङ्गं सप्तहस्तं च षट्करम्।।14।।
पञ्चहस्तादि विप्राणां ह्रासादेकैकपादतः।
लिङ्गं पञ्चविधं तद्वदन्येषां च त्रयं त्रयम्।।15।।
एकहस्तं च पादोनं[16] प्रतिलोमादि वर्णिनाम्[17]।
[18]भूतरन्ध्राष्टभेदेन गर्भगेहे विभाजिते।।16।।

---

4. अधोगर्भामुखं-क
5. कूर्माद्या-क
6. वटका-ख
7. हीक्षते-ख
8. दृश्यन्ते-क
9. स्थूला-क
10. स्थः-क
11. शिल्पविकारादि-क
12. परिगृह्य-क
13. शिवाम्-ख
14. भगवान्-ख
15. हृदा-क
16. पादानां-क
17. वर्णताम्-क
18. कृतरन्ध्राष्ट-क

वह्निभूतचतुर्भिस्तु कल्पितं त्रिविधं विदुः।
पादाधिकं समस्तं च पादोनङ्गुणभाजिते।।17।।
द्वाभ्यामेकेन[19] निर्दिष्टं द्वारमानेन पञ्चधा।
ध्वजस्थं[20] वृषभस्थं वा गृहाणामनुरूपतः।।18।।
चतुर्विंशतिधा भक्त्वा लिङ्गस्यायाममीरितम्[21]।
वर्धमानं तु मालादि सप्ताष्टनवभिः क्रमात्।।19।।
त्रिभिस्त्रिभिश्चतुर्भागैर्विभक्ते दशधा पुनः।
शिवाधीतमिति प्रोक्तमेकैकेन त्रिधा कृते।।20।।
समांशमेतद्दैर्ध्येण परिणाहं समं भवेत्।
यदि सर्वसमं ह्येतन्नेतत्सूक्ष्मतरं भवेत्।।21।।
कल्पयेल्लिङ्गविस्तारं मार्ताण्डद्वयभाजिते।
अष्टांशैर्मुनिभिः पञ्चयवैः षड्भिश्च पञ्चभिः।।22।।
पञ्च पञ्च यवैः सार्धमाद्य[21]मुत्त्वा प्रकल्पयेत्।
तृतीयं पञ्चभिः सार्धं यवैः पञ्चभिरेव च।।23।।
चतुर्थमेवं विस्तारं कल्पयेद्वा विचक्षणः।
सर्वं समं समांशौ च[22] वृद्ध्युत्तर [23]मथाधिकौ।।24।।
[24]चतुरस्त्रीकृतां कृत्वा शिलां भङ्क्त्वा त्रिधा पुनः।
अष्टांशं[25] कल्पयेन्मध्ये बाहुसूत्रे निधाय च।।25।।
[26]तदन्ते सूत्रमास्फाल्य [27]निम्नमग्रं प्रकल्पयेत्।
[28]षोडशाग्रं तथा कृत्वा वृत्तं भूयस्तथैव च।।26।।

---

19. द्वाभ्यामेतेन-क
20. ध्वजस्थमृषभस्थं-ख
21. मीप्सितम्-ख
22. क्रमात्-क
23. शताधिकौ च-क
24. चतुरश्रीकृतां-क, ख
25. अष्टान्तं-ख
26. ऽस्त्रमास्थाप्य-क
27. निम्नमन्त्रं-ख
28. षोडशांशं-ख

वसुरन्ध्रऋतुद्वन्द्वरुद्रभेदे तु विस्तृते[29] ।
द्वयेकद्वित्रिशतैस्तु वर्तयेल्लिङ्गमस्तकम्।।27।।
सप्तपञ्च[30] महारुद्रनवयुक्तैर्दशांशकैः।
पूजाभागगते दैर्ध्ये विभक्ते कल्पयेत्क्रमात्।।28।।
अंशैः पूर्वोदितैरेव त्रपुषी फलमस्तकम्।
छत्राभं बालचन्द्राभं कुक्कुटाण्डनिभं क्रमात्।।29।।
[31]शाणाभिघर्षयेल्लिङ्गं याति [32]निर्व्रणतां यथा।
[33]पूजाभागं त्रिधा भङ्क्त्वा मुक्त्वा भागमथान्तिमम्।।30।।
[34]कण्ठादिमौलिपर्यन्तं मुखं तस्मिन्व्यवस्थितम्।
शेषाभ्यां लक्षणोद्धारं लिङ्गाकारं समं परम्[35] ।।31।।
तद्ब्रह्मसूत्रमालिख्य[36] विप्राणां तु यवाकृतिम्।
नृपतेरिभनेत्राभं ब्रीह्याकारं स्मृतं विशः।।32।।
शूद्रस्याञ्जलिमुद्राभं सर्वेषां सममेव वा।
पार्श्वद्वये लिखेद्रेखे दक्षिणायां [37]चतुर्मुखम्।।33।।
वामाख्यायां महाविष्णुं[38] मध्यगायां महेश्वरम्[39] ।
द्विभागमष्टधा भङ्क्त्वा मुक्त्वा भागद्वयं त्वधः।।34।।
लिखित्वा मणिरेखान्तां पार्श्वयोस्स लिखेत्पुनः।
रेखे पञ्चमभागस्थे पृष्ठे चैकांशतोपरि।।35।।

---

29. विस्मृते-ख
30. सप्तमं च तथा रुद्र-क
31. शोणादीर्घये'ल्लि-क
32. डाकिनी'ता-क
33. कुब्जा भाग-क
34. कर्णादि-क
35. भवेत्-ख
36. सूत्रमुल्लिख्य-ख
37. चतुर्मुखः-ख
38. महाविष्णुः-ख
39. महेश्वरः-ख

तयोः समागमं रेखाः समनिम्नाः समोन्नताः।
[40]भूताब्धि हुतभुक् पृष्ठगतसूत्रद्वयस्य तु।।36।।
यद्वत्समागमं[41] पृष्ठे कोष्ठैस्तु दशपञ्चभिः।
यवद्वयमथारभ्य वर्धयेल्लिङ्गमानतः।।37।।
लक्षणस्य[42] तु विस्तारं [43]पादोनं द्विगुणं ततः।
विस्तारं मणिरेखायाः खातं चापि [44]यवादितः।।38।।
ब्रह्मसूत्रस्य यत्खातं तदर्धं पक्षसूत्रयोः।
लिङ्गस्य गुणविस्तीर्णां विष्णुभाग[45]समोच्छ्रयाम्।।39।।
लिङ्गायां प्रविस्तीर्णां कल्पयेद्वाथ पीठिकाम्।
उत्सेधं विभजेत्तस्याः समं षोडशधा क्रमात्।।40।।
एकेन [46]पादुकं कुर्यात् पञ्चभिर्जगतीमपि।
कुमुदं [47]पट्टिकां चैव वेदैरेकां[48]शकेन तु।।41।।
द्वाभ्यामेकेन कर्तव्यं गलं च गलपट्टिकाम्।
[49]अङ्गद्वयेन सुदृढं कल्पयेन्मुखपट्टिकाम्।।42।।
लिङ्गावटस्त्रियंशेन शिष्टं भङ्क्त्वाष्टधा क्रमात्।
वलयं वारिमार्गस्य वेदैः[50]खान्तं तदर्धकम्।।43।।

---

40. भूताग्नि-क
41. समग्रं-क
42. लक्षणं च तु-क
43. पादेन-क
44. यवादिकः-क
45. समोच्छ्रया-क
46. पादकं-क
47. कुमुदवद्रि च-क
48. वेदैरेका शतेन तु-क
49. अंशुद्वयेन-ख
50. वेदै खान्तस्तदर्धत-क

खातस्य पार्श्वयोः कुर्याद् [51]बाह्यं चाभ्यां तु मेखलाम्।
प्रणालमुत्तरे कुर्याद्विस्तारायामतः समम्।।44।।
त्रिभागेन तु पीठस्य कृत्वाष्टाश्रं[52] समन्ततः।
तद्दशांशेन [53]खातं स्यात् किञ्चदग्रे तनूकृतम्।।45।।
तरङ्गमूलपार्श्वे तु जगत्याश्चोर्ध्वतोऽर्पयेत्।
[54]षोडशांशेन गमनं पीठमध्यादथैशगम्।।46।।
पुंसा लिङ्गं प्रकर्त्तव्यं स्त्रिया पीठं तु तच्छिलाम्[55]।
नपुंसकेन बिम्बं वा मुखलिङ्गमथापि वा।।47।।
योनयोऽष्टौ समाख्याताः प्रासादस्य प्रमाणतः।
ध्वजस्थमृषभस्थं[56] वा प्रत्यक्पूर्वमुखं भवेत्।।48।।
ध्वजो धूमश्च सिंहश्च शुनको वृषभस्तथा।
खरश्चैव गजश्चैव वायसो वास्तुयोनयः।।49।।
कृत्वा क्षेत्राङ्गुलानां[57] च [58]काराणां [59]घनं पुरा।
भजेत्तदष्टभिः सम्यग् यच्छेषं[60] तद् विचार्य च।।50।।
तत्रैकाद्यष्टपर्यन्ता ध्वजधूमादयः क्रमात्।
आदिप्रभृति चत्वार एकैकान्तरिताः शुभा।।51।।
द्वितीयाद्यास्तथैवान्ये चत्वारश्चाशुभाः स्मृताः।
यवं वा द्वियवं वापि चतुर्यवमथाङ्गुलम्।।52।।

---

51. द्वाभ्यां द्वाभ्यां तु-ख
52. मुत्त्वाष्टात्र-क
53. यात्रां स्यात्-क
54. षोडशाहरणगमन-क
55. एषा पङ्क्तिः 'क' मातृकायां नास्ति।
56. च-ख
57. कृत्वात्रोङ्गुलानां-क
58. करणां-ख
59. पावनं-क
60. च्छेषान्तं-क

आयभागं क्षिपेत्क्षेत्रे यथायः शोभनो भवेत्।
ईशपूर्वाग्नियाम्यस्थं पश्चिमाभिमुखं शुभम्।।53।।
उत्तरानिलवारीशराक्षसस्थं पुरो[61] मुखम्।
[62]पुरादिषु शिवस्येशे प्रासादं कारयेद्बुधः।।54।।
परिहृत्य च मर्माणि पूर्वशास्त्रोक्तवर्त्मना।
प्रासादं कल्पयेद्विद्वान् परिवारगृहाणि च।।55।।
सप्तसीमासमायुक्तं स्थानं सर्वदिवौकसाम्।।56।।

दिव्यन्तरिक्षभौमा पातालनिवासिनश्च तेभ्यो वै नमो नमः स्वाहा। वाहनाय महादेव शैलार्णववञ्चन स्वऋृषभाय नमस्तेऽस्तु सर्वदुष्टप्रशान्तये।। ओम् ऋग्भ्यो नमः नरवाहनाय महाबलाय सौरभेयाय। तद् विं वीरभद्राय नमः। विं वीरभद्राय विद्महे महार्णनाय धीमहि तन्नः शान्तः प्रचोदयात्। तत्-गं गणपतये नमः ओमेकदंष्ट्राय विद्महे गजाननाय धीमहि। तन्नो दन्ती प्रचोदयात्।। तत् ओं व्यों ब्रह्माण्यै नमः ब्रह्मभूतायै विद्महे कुशहस्ताय धीमहि। तन्नो ब्राह्मी प्रचोदयात्।। तत् मं माहेश्वर्यै नमः। रुद्रभूतायै विद्महे शूल-हस्तायै धीमहि तन्नः शाङ्करी प्रचोदयात्। तत् [63]कौं-कौमार्यै नमः। स्कन्दभूतायै विद्महे शक्तिहस्तायै धीमहि तन्नः कौमारी प्रचोदयात्। तत् हैं वैष्णव्यै नमः। विष्णुभूतायै विद्महे चक्रहस्तायै धीमहि। तन्नो वैष्णवी प्रचोदयात्।। तत् हैं वाराह्यै नमः प्रजापतिभूतायै विद्महे गदाहस्तायै धीमहि। तन्नो वाराही प्रचोदयात्।। तत् ओं होमिन्द्राण्यै नमः। इन्द्रभूतायै विद्महे वज्रहस्तायै धीमहि। तन्न इन्द्राणी प्रचोदयात्। तत्-ओं हुं चामुण्ड्यै नमः। रुद्रभूतायै विद्महे शूलहस्तायै धीमहि तन्नश्चामुण्डी प्रचोदयात्। तत्-स्वस्वनाम्ना स्वगायत्र्या स्वस्वपादैः सह मातृणां पञ्चपञ्चोचार्यमाणैः समन्ततः।

---

61. पुरे-क
62. पूरादिषु-ख
63. मां-क

मातृभ्यो लोकमातृभ्य सर्वमातृभ्य एव च।
सर्वमातृगणेभ्योऽन्ते सर्वदिक्षूर्ध्वतोऽमुना।।57।।

नानारूपमातरः प्रतिदिशं व्यवस्थिताः दिव्यन्तरिक्षभौमाः पाताल-निवासिन्यश्चेहायान्तु शिवाज्ञया। मामनुगृह्णन्तु प्रतिगृह्णन्तु पूजां सौम्यधारिण्यः ताभ्यो देवीभ्यो नमो नमः स्वाहा। बलाय नमः बलप्रमथनाय नमः। पराय गोप्त्रे नमः। शास्त्रे नमः शम्बराय नमः। हस्त्यश्वाय नीलाय कालाय कपर्दिने उग्राय रुद्राय सुताय भूतनाथाय विद्महे भवपुत्राय धीमहि तन्नः शास्त्रा प्रचोदयात्। तत् मूलेन नामभिः स्कन्दं यजेत् गायत्र्या सनत्कुमारस्कन्दौ विशाखषष्टिषण्मुखेन- सनत्कुमाराय विद्महे महासेनाय धीमहि तन्नः स्कन्द प्रचोदयात्।। तत्—

इष्ट्वा बहिर्यजेच्चण्डं स्कन्द-वद्गोपुराद्बहिः। (गुरुः)
चण्डश्चण्डेश्वरश्चण्डश्चण्डो निर्माल्यभोगवान्।।58।।

तीक्ष्णदंष्ट्रमृगास्यो हि गोपुरद्वारपालकौ।
अष्टदिक्षु त्रिभिर्मन्त्रैरेकावृत्या [64]बलिर्हरेत्।।59।।

ध्वजमूलेषु तद्बाह्ये ध्वजेशानामनन्तरम्।
ये समस्तं जगद्व्याप्य निष्टाः सद्यो निशाचराः।।60।।

रौद्राः सदसतो विरूपाः विश्वरूपा महारूपा घोररूपा मृगास्या विहगाननाः नानारूपकृतपुष्टिकृतकामदाश्च बलिमिच्छन्ति तेषां बलिं हरद्भ्यः[65] क्षुद्रकेभ्यश्च सर्वेभ्यस्तेभ्यस्ताभ्यो नमो नमः स्वाहा।।

उपस्थाय च नामानि मन्त्रैश्च विकिरेद्बलिम्।
त्रिवारं सप्तवारं वा बलिमुद्रां च दर्शयेत्।।61।।

मुखं च सर्वदेवानां येन हव्यं च नीयते।
येन प्रवर्तते सर्वं नमस्तस्मै हविर्भुजे।।62।।

अग्नये तेजोऽधिपतये रुद्रपार्षदे नमः। तत् पार्षदे नमः। नमो भूतेभ्यः। आग्नेय्यां दिशि शक्तिपाणयः रक्ताः। तेभ्यो नमः।

---

64. बहिर्हरेत्-क

65. हरिदमहत्यः-क

येन सम्भ्रियते सर्वं येन सर्वश्च रक्षते।
यस्माद्बिभेति लोकोऽयं प्रेतनाथ नमोऽस्तु ते।।63।।

यमाय प्रेताधिपतये रुद्रपार्षदे तन् नमो भूतेभ्यः याम्यायां दिशि दण्डपाणयः कृष्णाः ये भूता दक्षिणसदः।।

राक्षसा यातुधानाश्च पिशाचाश्चाश्रयन्ति यं।
तस्मै निऋृतिरूपाय रक्षसां पतये नमः।।64।।

निऋृतये रक्षोऽधिपतये नमः। तन् नमो भूतेभ्य नैऋृत्यां दिशि खड्गपाणयः श्यामाः।

येन प्रसूयते सर्वं यस्मिन्सर्वं प्रलीयते।
अमोघपाशहस्ता च तस्मै वाक्पतये नमः।।65।।

वामदेवाय नमो भूताधिपतये। तत् पार्षदे नमो भूतेभ्यः वारुण्यां दिशि पाशपाणयः शबलाः ये भूताः पश्चिमसदः।

पूर्यन्ते च ह्रयन्ते च येन प्राणादयः क्रमात्।
भूतानां पतयो नित्यं नमस्तस्मै मरुत्पते।।66।।

ओं वायवे प्राणाधिपतये तत् नमो भूतेभ्यः वायव्यां दिशि अङ्कुशपाणयः पीताः।

यत्प्रसादाज्जगत्सर्वं धनेन परिपूर्यते।
यक्षगुह्यकनाथाय धननाथ नमोऽस्तु ते।।67।।

कुबेराय यक्षाधिपतये वैश्रवणाय धनाधिपतये महाबलाय गुह्याधिपतये तत्पार्षदे सोमाय नक्षत्राधिपतये तत्पार्षदे नमो भूतेभ्यः। सौम्यायां दिशि गदापाणयः सिताः ये भूता उत्तरसदः।

येन कालाग्निना लोको युगान्तेष्ववदह्यते।
तस्मै ते ब्रह्मणः पुत्र विरूपाक्ष नमोस्तु ते।।68।।

ऐशानाय विद्याधिपतये तद् नमो भूतेभ्यः ऐशान्यां दिशि शूलपाणयः कपिलाः।

यतो जाताखिला सृष्टिरन्ते यस्मिन्प्रलीयते।
[66]नारायणपुरुषाय नमस्ते ब्रह्मरूपिणे।।69।।

66. नारायिनाम-क

ओं ब्रह्मणे लोकाधिपतये तद् नमो भूतेभ्य ऊर्ध्वायां दिशि पद्मपाणयः सूक्ष्मा ये भूता उपरिषदः।

जगज्जन्मस्थितिध्वंससाधुमोक्षैकहेतवे।
अनन्ताय नमस्तस्मै पुराणपुरुषात्मने।।70।।

अनन्ताय नागाधिपतये रुद्रपार्षदे नमः तत् पार्षदेभ्यो नमः नमो भूतेभ्यः। अधस्ताद्दिशि शिवस्य भगवतो गुणा विषपाणयः धूम्रा धूम्रविलोचनाः नमो नागस्त्रियै उत्सवस्य शिवस्यास्य त्रायस्व सदा नमः।।

बीजानि वापयित्वा तु बलिं च विकिरेन्निशि।
दिवसेष्वध्वराऽर्चां ह्यागमजन्यां च कारयेत्।।71।।

त्रिकालमर्चयेद्देवं बलिं च विकिरेत्तथा।
निवेद्य पायसं [67]प्रातरिष्ट्वा प्रासादविद्यया।।72।।

गौलं नवात्मना मध्यगतेयमणिपञ्चभिः।
नैवेद्यं कृसरं चास्तं मध्यरात्रे नवात्मना।।73।।

सुसितं पायसं स्निग्धं हारिद्रं कृसरं क्रमात्।
गौलं सर्वौदनं दद्यादीशाद्येषु मुखेषु च।।74।।

अलङ्कारैरलङ्कृत्य पत्रच्छेदादिभूषणैः।
परितो दीपमालाञ्च नृत्तं गीतं दिने दिने।।75।।

वाद्यमध्ययनं पूजां स्तुतिं कुर्वीत सर्वदा।
सौवर्णं राजतं ताम्रं कौतुकं हविषाऽपि वा।।76।।

संहृत्योत्पात्य शूलं वाप्याहूय वस्तुमूलतः।
सकलीकृत्य चाभ्यर्च्य मूललिङ्गे च कौतुके।।77।।

ब्रह्मयानेन तन्नीत्वा त्रिकालं विकिरेद्बलिम्।
आरोप्य शिबिकायां वा कुम्भरेखारथेऽपि वा।।78।।

बलिं दत्वा च निर्माल्यं जले सर्वं विसर्जयेत्।
मूललिङ्गे नियोज्येशं भावयित्वार्चयेत्पुनः।।79।।

---

67. चैवं प्रातरिष्ट्वा-क

स्वस्थाने देवतानां च भूतानां नामभिः क्रमात्।
वितीर्य (बलिमेभ्यस्तु दीपदानं समाचरेत्)।।80।।
(भो देवताः! नमस्तेभ्यो भूतेभ्यो नमो नमः।
बलिं गृहाण देवेश! सर्वलोकैकपालक।।81।।
मया दत्तेन दीपेन त्वन्धकारं व्यपोहतु।)
(एवं महोत्सवे नित्य)मुत्सवाख्यं बलिं हरेत्।।82।।
ध्येय[68] [69]ऐन्द्री महाकाली वस्त्रद्वारस्य पालकः।
मन्त्राभ्यामथ नामभ्यां देवेभ्यो विकिरेद्बलिम्।।83।।
प्रासादे दक्षिणे स्वस्य (दक्षिणे च)गजाननः।
सम्पूज्य दक्षिणामूर्त्तिं बलिं दत्वा विधानतः।।84।।
पृष्ठे च कौतुकं दीपा देवदृष्ट्या किरेद्बलिम्।
आद्यन्ते च बलिं दत्त्वा द्वारमुद्धाटयेच्छुचिः।।85।।
नमस्ते वामयुक्ताय शूलहस्ताय धीमते।
दृष्ट्वा निहतदैत्याय शाङ्कराय नमो नमः।।86।।
नमस्ते द्वारियुक्ताय परशुव्यग्रपाणये।
दृष्ट्वा निहतदैत्याय शाङ्कराय नमो नमः।।87।।
दैत्यदर्पविनाशाय सहस्राक्षाय धीमते।
कुलिङ्गव्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो।।88।।

इन्द्राय सुराधिपतये रुद्रपार्षदे नमः। तत् ओं नमो भूतेभ्योऽरिष्टकृद्धयः सद्भ्योऽसद्धयः सदसद्धयः सर्वगणेभ्यो नमो नमः स्वाहा। पूर्वस्यां दिशि शिवस्य भगवतो ये गणा वज्रपाणयःश्वेताश्वेताक्ष्मा दिव्यन्तरिक्षभौमाःपातालनीवारकास्तेभ्यो वै नमो नमश्च स्वाहा।

नाम्ना पशुपतेस्तद्वत् पश्चिमं तु शिवस्य च।
स्नानं नारिकेलस्य नारिकेलजलैः पुनः।।89।।

---

68. ध्येयो-क
69. इन्दी-क

वासुदेवाख्यया गङ्गाद्भिरैशान्यां रुद्रायेति नदाद्भिराग्नेय्यां वामदेवायेति नैर्ऋत्याम् निर्झराद्भिः ईशानायेति मध्ये समुद्राद्भिः उग्रायेति तटाकाद्दि-र्वायव्यामथा शाङ्करभीमायेत्यथ कूपाद्दिः विद्येशानस्य नामभिः चतुष्कान्यपि सर्वाणि प्रादक्षिण्येन पूर्वादिक्रमेण।

यजेत् पार्वतीं शृङ्गस्थां वेदिजां क्षेत्रजामपि।
वलजामपि नादेयीं सामुद्रीं तीर्थजां क्रमात्।।90।।
पार्श्वद्वयचतुष्काणि गन्धाद्दिः स्नापयेत्क्रमात्।
शतं सनवकं पूर्वं पूर्वद्रव्यैस्तु पूर्ववत्।।91।।
[70]पुरतोक्तविधानेन तन्मन्त्रैः स्नापयेच्छिवम्।
त्यक्त्वा पादशतं बाह्ये कृत्वा तु नवकं बहिः।।92।।
दिग्विदिक्ष्वन्तरालेषु द्रव्यैरेभिः प्रपूरयेत्।
क्षेत्रे गोत्रपुटे स्नानमुक्तं पञ्चशतार्धकैः।।93।।
क्षेत्रे कालपुटे मध्ये कृत्वा स नवकं शतम्।
दिग्विदिक्षु क्रमादष्टौ तद्बाह्ये नवकान्यपि।।94।।
तेषामप्यन्तरालेषु त्रीणि त्रीणि शतानि च।
सप्त सप्त च तद्बाह्ये नवकानि चतुर्दिशम्।।95।।
पूरणं स्नपनं पूर्वं त्रिशतं पूर्ववत्स्मृतम्।
कर्पूरवानरतटिच्चन्दनाम्बुरुगायसैः।।96।।
प्राच्यां नवकमध्यस्थकुम्भात्सप्तनरेण च।
देवसूर्यं दक्षिणं नीलं मणिविद्रुमवज्रता।।97।।
मौक्तिकं चाप्यघोरेण तथा मरकताम्बुभिः।
(अश्वत्थवट)पलाशैः प्रसिद्धमथ पश्चिमम्।।98।।
(आम्राशोकशमीप्लक्षजम्बुमालूरदाडिमैः।
कुशोदुम्बरखदिरैरपामार्गस्य पत्रकैः।।99।।
दूर्वाश्रीफलकदलीकपित्थपनसादिभिः।)

70. पूरतोक्त-क

(पत्रैः पृथक् पृथक्) तस्यां तन्मन्त्रेणाभिषेचयेत्।।100।।

पञ्चाधिको पञ्चशतैः पञ्चाधिकसहस्रकैः।
पञ्चविंशतिभिर्द्रव्यैर्मन्त्रैः सम्यगुदाहृतैः।।101।।

यथा सहस्रकलशैः स्नाप्यते भगवान्हरः।
विभज्य नवधा क्षेत्रं कृत्वा स नवकं शतम्।।102।।

नवखण्डेषु भूयोऽपि मध्ये कोणशतेषु च।
यानि लुप्तानि कोणेषु तानि चात्र समर्पयेत्।।103।।

एवमुत्पाद्य सम्पूर्य स्नापयेत्तमुमापतिम्।
प्रतिष्ठान्ते द्विजास्तद्वत् स्नपनान्ते द्विजोत्तमाः।।104।।

जुहुयुश्चाष्टदिक्ष्वष्टौ दिशाहोमो दिशाधिपैः।
उत्सवं च ततः कुर्यात् यथाखिलसुविस्तरम्।।105।।

उत्सवं सप्तरात्रं स्यादार्द्रान्तं मार्गशीर्षके।
[71]पुष्यान्तं कल्पयेत्पौषे[72] माघे [73]मघान्तपश्चिमे।।106।।

चित्रान्तमुत्तरे चैत्रे चित्रान्तं वै यथेच्छया।
वैशाखे तु विशाखान्तमार्द्रान्तं मासि मासि वा।।107।।

ध्वजं घण्टा [74]निबद्ध्वाग्रे स्थापयेदष्टदिक्ष्वपि।
ग्रामान्ते ग्रामपर्यन्ते (ग्राममध्ये तथैव च)।।108।।

पीठिकांश्च पताकांश्च स्नापयेन्मनुनामुना।
ओं नमोऽस्तु पताकायै सर्वलोकस्य रक्षिके।।109।।

(जयप्रदे नमस्तुभ्यं पताकायै नमो नमः।)
(जलेन शुद्धबालेति स्नानं तु कारयेन्मुदा)।।110।।

('पय'श्चेति पयःस्नानं घृतं)श्चेति घृतं पुनः।
[75]मधुवाते' तिमधुनाऽऽप्यायस्वे'ति दध्ना तथा।।111।।

71. पुष्यन्तं-क
72. पुष्ये-क
73. माघान्त-क
74. निभक्त्वाग्रे-क
75. मधुवाताप्यायस्वेति दधि तथा अपि-क

'अपामिति सितास्नानं मानस्तोकेऽथ वारिणा।
अश्वत्थे वस्सुमित्रा न अग्न आयाह्यतः परम्।।112।।
पुष्पवतीः पुष्पतोयं ब्रह्मजज्ञानमेव हि।
हिरण्यवर्णा रत्नानि पुनर्मुक्तोदकेन च।।113।।
समुद्रज्येष्ठा इत्येवं रक्षोगणेन वैद्रुमम्।
ओं अधियावततैवं पितरः सपितामहाः।।114।।
'श्रिये जात'स्तु दूर्वाद्भिरुत्पलाद्भिस्तु कारयेत्।
देवस्य त्वाशुः शिशानो व्योमव्यापी क्रमेण तु।।115।।
अवस्त्रावीततोयेन स्नातव्याश्चाङ्गदेवताः।
दक्षिणा गुरवे कार्या मूर्तिभेदात् पृथक् पृथक् ।116।।
आचण्डालान्तमन्नाद्यं सर्वमन्यं च कारयेत्[76] ।
एतैर्द्रव्यैः क्रियातन्त्रैः बहुधा स्नापयेच्छिवम्।।117।।
तत्पदानां विधिं वक्ष्ये त्वासहस्रमितोर्ध्वतः।
षट् दिक्षु मध्ये नवकं कोणेषु च चतुष्टयम्।।118।।
पञ्चाशत्येकहीने तु क्षेत्रे नवपुटे नयेत्।
मध्ये नवपुटे पद्मं त्रिकमेकं च तद्बहिः।।119।।
एकादशपुटे बाह्ये त्रिकमेकं तु पूर्ववत्।
आरात्कोणेषु चैकैकं द्रव्याधिक्ये समीरितम्।।120।।
एकादश पुटे क्षेत्रे नवानां नवकं नयेत्।
दिक्षु त्रिकालिकी क्षेत्रकोणेषु नवकं नयेत्।।121।।
(एवं पीठं प्रकुर्वीत सर्वदेवमनोहरम्)।
(हेमैर्वा रजतैर्वापि वज्रादिमणिभिः क्रमात्)।।122।।
(स्फटिकमणिना वापि मृद्भिः) काष्ठैरथाम्बुजम्।
त्रिकमेकं तु मध्ये च बाह्ये नवकमष्टकम्।।123।।

76. एतदनन्तरं 'क' मातृकायां 'इति श्रीपाशुपते षोडशः पटलः' इति लिखितं तन्नोचितं तन्त्रेऽस्मिन् षोडशपटलस्याऽभावत्वात्।

अन्तराले त्रिकं चैवं कोष्ठैरेकैरथापरम्।
पञ्चाशत्पद्मदलेषु दलं प्रति कलाष्टकम्।।124।।
पञ्चकं च त्रिकं मध्ये दशकं सप्तकं बहिः।
पुनः षोडशकं तेषामन्तराले त्रिकं त्रयम्।।125।।
अमाध्यर्धशतेऽष्टौ च स्नपनं परिकीर्तितम्।
आक्रम्य त्रिपदं लुम्पेत् चतस्रो रेखया क्रमात्।।126।।
क्षेत्रे धान्यपुटे पञ्चविंशाधिकशतद्वये।
बाह्ये कोणेषु चैकैकं मुक्त्वा दलगतात्घटात्।।127।।
अष्टमोऽष्टाधिकैः प्रोक्तं द्विशतैः कलशैर्विभोः।
क्षेत्रे चात्र पुटे चान्तर्नवानां नवकं नयेत्।।128।।
त्रीणि त्रीणि चतुर्दिक्षु कृत्वा द्वादशकं क्रमात्।
कोणेषु नवकं तद्वत् द्विपञ्चाशच्छतद्वये।।129।।
पञ्चस्तुतिपदैः पद्मं कृत्वा मित्रपुटे भुवि।
नवकं चाष्टकं मध्ये कल्पयेद्दिग्विदिक्षु च।।130।।
दशसप्तकमप्येषामन्तरालेषु षट् द्वयम्।
त्रिशतैः कलशैः स्नानं पूर्वद्रव्यैरिहोदितम्।।131।।
मध्ये नवपुटे पद्मं त्रिकमेकं च तद्बहिः।
नवकं चाष्टकं बाह्ये त्वन्तराले त्रिकं त्रिकम्।।132।।
दिग्विदिक्षु क्रमाद्बाह्ये कल्पयेत् द्वादशाष्टकम्।
त्रीणि त्रीणि चतुष्कोणे कुर्याद् द्वादश पद्मकम्[77]।।133।।
अन्तर्मण्डलमाद्यं स्याद् दण्डार्द्धे जगतीस्थलात्।
तस्मादप्येकदण्डान्ते चान्तहारा गृहं बहिः।।134।।
मूलस्थानाद् द्विदण्डान्ते दीपशाला सुशोभना।
नीचहारान्[78] ततः कुर्याद्[79] दण्डार्धे भित्तिरुज्ज्वला।।135।।

77. 'ख' मातृकायां 56 श्लोकात् 133 श्लोकपर्यन्तं पाठो नोपलभ्यते।
78. नीचहारा-क
79. कार्या-क

मध्यहारं[80] चतुर्दण्डे मर्यादा सप्तसम्मिते।
एकविंशति दण्डान्ते महन्मर्यादभित्तिका।।136।।

अर्धेन पादहीनेन समस्तेनोत्तरेण तु।
अन्तर्मण्डलसूत्राद्यैः हस्तमात्रमतीत्य च।।137।।

[81]मण्डलं [82]पादहीनं स्यात् मूलप्रासादतोऽग्रतः।
अन्तर्मण्डलसीमान्ते लोकेशानां हि पीठिकाः[83]।।138।।

विरिञ्चस्यैशपूर्वेण नैरृत्यां पश्चिमोत्तरे।
अनन्तस्योत्तरे सोमात्कुबेरस्याग्रमण्डले[84]।।139।।

ऋषभस्याथ चण्डस्य गेहं चादितिसन्निभौ।
षण्मुखस्याथ भल्लाटे[85] मातृणां यमसन्निधौ।।140।।

भृङ्गराजपदे चार्याञ्चाम्बादीनां तु पश्चिमे।
तस्याग्नेः पूर्वतः कार्या हविःशाला तथानिले।।141।।

पुष्पगेहं तु नैरृत्यां व्याख्यामण्डल[86]मुत्तमम्।
अल्पगेहमथैशान्यां जीर्णे वाप्यनिले सति।।142।।

पञ्चषट्सप्तदण्डाग्रे कल्पयेद् बलिपीठिकाम्।
दितिपर्जन्ययोर्वापि बीजाङ्कुरगृहं शुभम्।।143।।

प्रासादस्याग्रतः कुर्याद्यान[87]मण्डलमुज्ज्वलम्।
अग्नेय्यामग्निनाभीति'र्याम्ये कर्तुः क्षणान्मृतिः।।144।।

[88]विवासं नैरृते पृष्ठे ब्रह्महत्यादिसम्भवः।
वायव्यान्निर्धनत्वं च सौम्ये वै रोगता भृशम्।।145।।

---

80. मध्यहारा-क
81. मण्डपं-ख
82. पटहीनं-क
83. पीठिकाम्-ख
84. मण्डपे-ख
85. फल्लाटे-ख
86. मण्डप-ख
87. यागमण्डल-क
88. पिपास-ख

[89]ईशे राजभयं भूयोऽप्यन्तरालेषु नेष्यते।
अतिवृष्टिरनावृष्टिर्दुर्भिक्षं राष्ट्रनाशनम्।।146।।
चञ्चलत्वं प्रवासं च स्त्रीविनाशं धनक्षयम्।
मनुष्यकल्पिते स्थाने तस्मादग्रे तु मण्डपम्।।147।।
[90]दिक्कोणस्थितसूत्राणां मध्यान्मध्यं विमुच्य च।
अष्टदिक्ष्वर्चनागारं सिद्धचारणकल्पिते।।148।।
देवैः सङ्कल्पिते स्थाने तत्र वास्तुपदेषु वा।
ईशे भयं स्त्रीचलत्वं विजयं च [91]महच्छ्रियम्।।149।।
प्रतापं [92]धर्मशीलत्वं कलहं च दरिद्रताम्।
दाहं दानफलं नाशं बन्धूनां च धनक्षयम्।।150।।
मृतिं यशश्च शिल्पित्वं पुंस्त्वमायुष्यमेव हि।
संन्यासं कृषिवृद्धिं च द्रव्यावाप्तिं प्रगल्भताम्।।151।।
[93]विरोधं धनसिद्धिं[94] च देवसिद्धिं[95] कृशावताम्।
प्रबोधमतिमानाढ्यं गोधनस्त्रीयशस्करम्।।152।।
सर्वदिक्षु यथाशोभं स्वयं जातस्य शूलिनः।
एकविंशतिहस्तेन निर्मितं सुदिनाह्वयम्।।153।।
स्तम्भैर्विंशतिभिर्भिन्नं द्विकलं[96] त्रिकलं[97] तु वा।
एकोनविंशद्धस्तेन सुप्रतीकं तु तादृशम्।।154।।

---

89. प्रशमीशे-क
90. त्रिकोप-क
91. महाश्रिवम्-क
92. धर्मशीलं च-क
93. वीरो-क
94. दण्डनसिद्धिं-क
95. देवसौम्यं-क
96. द्वितलं-ख
97. त्रितलं-ख

दश सप्तकरैस्तद्वत् सुकलं[98] मण्डलं विदुः।
द्वादशस्तम्भवद्भिन्नं[99] करैर्वैक्रारिकैर्मतम्।।155।।

विपदं द्विपदं ज्ञेयं चतुर्दशकरं तथा।
अविकारं विप्रमुख्यं स्तम्भैर्द्वादशभिर्मितम्।।156।।

नवाष्टादशरुद्राख्यं करैरेककलेन[100] हि।
द्वादशस्तम्भसम्भिन्नं विमानाख्यं सुशोभनम्।।157।।

सप्तषट्पञ्चहस्तेन[101] सुन्मानाख्यं तु मण्डपम्।
चतुष्करैः चतुस्तम्भैः सैंहिकं[102] सर्वकामदम्।।158।।

स्तम्भाष्टकमिदं ज्ञेयमुन्मनाख्यमिहोदितम्।
स्तम्भोत्सेधमथैकेन त्रिधा वेदीं विभज्य च।।159।।

एषामेकतमं ज्ञात्वा सम्यगुत्पाद्य मण्डलम्[103]।
[104]अप्रच्छन्नं चतुर्द्वारैः दिक्क्रमेण विराजितम्।।160।।

लाक्षमौदुम्बरं चैव वटजं[105] पैप्पलं क्रमात्।
तोरणानि चतुर्दिक्षु द्वाराभ्याशे निधापयेत्।।161।।

अर्धहस्तप्रविष्टानि चतुर्हस्तोच्छ्रयाणि[106] च।
तोरणाभ्यन्तरे स्थाप्यास्तोरणद्वितयोच्छ्रयाः।।162।।

अष्टदिक्षु ध्वजामध्ये नवमं शाङ्करेऽथवा।
स पताकास्सदर्भाश्च[107] [108]सपर्णास्तोरणानि च।।163।।

---

98. सुतलं-ख
99. स्तम्भसम्भिन्नं-ख
100. तलेन-ख
101. ऽप्युन्मानाख्यं-ख
102. सहितं-क
103. मण्डपम्-ख
104. सुप्रसन्नं-ख
104. पैप्पलं वटसम्भवनम्-ख
105. चतुर्हस्ताह्वानि च-क
106. पताकाष्टदाश्च-क
107. सुवर्ण-क
108. बीजारोहण-क

बलिपीठमतीत्याग्रे स्थाप्यमादौ महाध्वजम्।
द्वारद्वादशकं मुक्त्वा तावद्दण्डस्य चायतम्।।164।।
द्वाराणां पञ्चविंशद्भिर्विंशद्भिर्वाऽथ सप्तभिः।
सहितैर्दशभिः पञ्च सहितैर्दशभिस्तु वा।।165।।
द्वारपालैर्नवं वापि पूगं वा वृषभाङ्कितम्।
लिङ्गपादेन कर्त्तव्यं दारवं वाथ लोहजम्।।166।।
तस्य वामे पताकां च द्वारमानेन लम्बयेत्।
घण्टामुपरि चालम्ब्य भूषयेद्दर्भपल्लवैः।।167।।
त्रिविधं पात्रमुद्दिष्टं [109]बीजारोपणकर्मणि।
पञ्चविंशाङ्गुलोत्सेधं मुखं षोडशविस्तरम्।।168।।
कण्ठस्य बिलविस्तारमष्टाङ्गुलमतः समम्।
तद्बिलस्य ततोऽधस्तात् षडङ्गुलमुदाहृतम्।।169।।
बिलस्य खातमायामं[110] द्वादशाङ्गुलसम्मितम्।
पादपीठस्य विस्तारमुत्सेधं च षडङ्गुलम्।।170।।
[111]अङ्गुलत्रितयं दैर्ध्यं दण्डं सन्धि(रुर्ध्व)* त्र्यङ्गुलैः।
एवं हि पालिकाः प्रोक्ताः सामान्याः सर्वकर्मसु।।171।।
[112]आयामाद्रत्निविस्ताराद् द्वादशाङ्गुलसम्मिता।
चतुरङ्गुलमानेन दिक्षु मध्ये मुखं भवेत्।।172।।
उत्सेधात्पादपीठस्य[113] विस्तरात् त्रिभिरङ्गुलैः।
सन्धिरेकाङ्गुला दण्डमङ्गुलद्वितयेन तु।।173।।
एवं तु घटिका प्रोक्ता [114]शरावं तद्वदेव हि।

---

109. वातमायामां-क
110. खातमायातं-ख
111. अङ्गुलद्वितयं-ख
112. आचामाद्रत्न-क
113. उत्सेधत्वादपीठस्य-ख
114. शरावन्तं च देव हि-क
* अत्रच्छन्दोदृष्ट्यां वर्ण एकोऽधिकः।

मुक्त्वा [115]वक्त्राणि चत्वारि [116]पालिकाकारवन्मुखम्।।174।।
द्वादशत्रितयैरेषां सङ्ख्या षट्त्रिंशदीरिता।
उत्सवादिषु कालेषु पालिकाः षोडशैव वा।।175।।
विष्णुब्रह्मशिवाधीशाः [117]स्मर्त्तव्याः पालिकादिषु।
गर्भगेहं समं सूत्रैः[118] सप्तधा विभजेत्पुनः।।176।।
ब्रह्मदेवमनुष्याणां पिशाचानां पदानि तु।
क्रमात्पदानि जानीयात् पैशाचे त्वायुधानि च।।177।।
गणानां मानुषे भागे देवानां दैविके पदे।
ब्रह्मस्थाने त्रिमूर्तीनां स्थापनं परिकीर्तितम्।।178।।
ब्राह्मं षोडशधा भङ्क्त्वा मध्यांशं मध्यतस्त्यजेत्।
एवं हि गमनं[119] पृष्ठे पिण्डिकायाः स्थलं तथा।।179।।
पूर्ववन्मध्यमं खण्डं मध्यं त्यक्त्वोत्तरे नयेत्।
लिङ्गमूलं तथा भङ्क्त्वा याम्यपश्चिमसूत्रयोः।।180।।
सन्धिं सङ्कल्प्य चैशे तु भागं त्यक्त्वा निधापयेत्।
लिङ्गमूले गतं मध्यं यच्छिलायाश्च मध्यगाम्।।181।।
गर्तं तु सुसमं नीत्वा लक्षणं तत्र [120]चोल्लिखेत्।
उपलिङ्गं निधायात्र पीठिकामुपवेश्य च।।182।।
दिक्चिह्नानि [121]समुत्कीर्य लिङ्गं तस्माद्विसर्जयेत्।
होमार्थं स्रुक्स्रुवौ [122]कार्यौ स्रुचं चमसमेव च।।183।।

115. पत्राणि-क
116. वाचिका-क
117. तस्याः-क
118. स्ततै-क
119. एवाभिगमनं-क
120. नात्रयोर्लिखेत्-क
121. समुत्तीर्य-ख
122. कार्ष्टौ-क

[123]स्रुवस्य मुखविस्तारमायामं च यवाष्टकम्।
गोष्पदस्तु यथा मग्नमल्पपङ्के तथा भवेत्।।184।।
यवमाना भवेद्रेखा क्रमेण निशिताग्रयोः।
रेखायाः पार्श्वतः खातौ विस्तारौ[124] षड्यवोन्मितौ।।185।।
वक्त्रे तु परितो वप्रं[125] [126]यवार्द्धेन तु विस्तृतम्।
यवं वा द्वियवं वापि विस्ताराद्दैर्ध्यमुच्यते।।186।।
मुखदण्डाग्रसन्धौ च रेखातिर्यग्यवार्धतः[127]।
एकादशाङ्गुलायामं दण्डं वृत्तत्रयं[128] विना।।187।।
चतुरङ्गुलमायामं विस्तारं तु द्वयङ्गुलम्।
यवद्वयं खनेन्निम्नं [129]वेदिकायवविस्तृता।।188।।
पुष्करेण समं दैर्ध्याविस्तारात्तत्रिभागतः।
तत्रिभागेन कुल्याय तावन्निम्नासु शोभना।।189।।
यवार्धेन पुनःसन्धिं दण्डं पूर्ववदेव हि।
चरुहोमस्तया पूर्णां होमकर्मणि कारयेत्।।190।।
[130]स्रुचं तु हस्तमानेन [131]तस्यावर्तं षडङ्गुलम्।
द्वयङ्गुलं तु खनेद्वृत्तं तावन्निम्नं समं ततः।।191।।
यवार्धं मुखतो मुक्त्वा यवमानेन मेखला।
तिस्रः कार्या वहिस्तासां पद्मपत्राणि कारयेत्।।192।।

---

123. स्रुवं च-क
124. न विस्तारात् मध्यवो-क
125. नेष्य-क
126. पाद्येन-क
127. मुखार्धतः-क
128. यवं-क
129. वेदिकाचल-क
130. स्रुवं-ख
131. तस्यवक्त्रं-ख

दलाग्रे मेखला वृत्ता यवमानेन निर्मिता।
यवार्धं कोणनिम्नेषु यवाग्रं[132] चाग्रतोन्नतम्।।193।।
तदधः कमलं कुर्यान्मुखतीव्रं तदर्धतः।
अङ्गुलं कण्ठदैर्ध्यं स्यात्तद्विस्तारं द्वयङ्गुलम्।।194।।
कनीयसीप्रमाणेन बिलं च मुखकण्ठयोः।
विस्तारायामतस्तुल्यं ललाटं वह्निवेश्मवत्।।195।।
पञ्चाङ्गुलं तु विज्ञेयं तदग्रेऽङ्गुलविस्तृतम्।
आज्यकुल्या[133] च तन्मध्ये दर्शनीया बिलानुगा।।196।।
पुष्करस्य त्रिभागेन दण्डं च पशुपुच्छवत्।
ऋषभं दण्डमूलेऽधः [134]पद्मं वा स्रगितीरिता।।197।।

**इति श्रीपाशुपते नन्दिप्रोक्ते लक्षणपटलः सप्तमः[135]।।**

132. बाजनं-क
133. कुल्यायतं-क
134. पटं-क
135. 'ग' मातृकायां सप्तमपटले अत्रत्याद्भिन्ना विषयान्तरश्लोकाः प्राप्यन्ते।

# अथाष्टमः पटलः

## नन्दिरुवाच

वेदिकायां ततो बाह्ये वेदिकायां यथादिशम्।
कुण्डानि[1] नव कुर्वीत सत्ये शोषेऽथवा [2]गुरौ।।1।।

चतुरस्रं भगाकारमर्धचन्द्रं त्रिकोणकम्।
वृत्तं [3]षट्कोणकं पद्म[4]मष्टकोणं क्रमेण च।।2।।

प्राक् प्रत्यक् सूत्रमास्फाल्य मध्यं कृत्वा निधाय च।
सूत्रमध्ये समं पूर्वे पश्चिमे च समं[5] लिखेत्।।3।।

तयोःस्थित्वोत्तरे याम्ये लाञ्छयेन् [6]मत्स्यलाङ्छनम्।
तयोर्मध्यगतं सूत्रं रञ्जयेद्दक्षिणोत्तरम्।।4।।

कुण्डार्थं वाथ पद्मार्थं यावन्मानमभीप्सितम्।
परिमाय च [7]तत्सूत्रं मध्यस्थो दिक्षु लाञ्छयेत्।।5।।

द्वाभ्यां द्वाभ्यां तु तत्रस्थः कोणमध्यात्प्रसाधयेत्।
तेषु सूत्राण्यथास्फाल्य चतुरस्रं प्रकल्पयेत्।।6।।

चतुरस्रं ततः कृत्वा मध्ये मध्ये निधाय च।
कोष्ठयोः सन्धिमारभ्य वारुणीं च द्विधा लिखेत्।।7।।

1. कुण्डावकुर्वीत-ख
2. गुरोः-क, सत्येशेन चाथवा गुरोः-ग
3. षडस्रं-क
4. पद्माभमष्ट-क
5. समुल्लिखेत्-ख
6. मत्स्यलाञ्छनवत्-क, लाञ्छयेत्-ख
7. तन्सूत्रे-ख

यावद्दक्षिणदिक्संस्थां यावदुत्तरगोचराम्।
उल्लङ्घ्य कोणयोः कर्णौ कुण्डात्पादांशमग्रतः।।8।।

लाञ्छयित्वा बहिः सूत्रे पूर्वचिह्ने निधाय च।
दक्षिणे चोत्तरे सन्धौ क्रमादास्फाल्य देशिकः।।9।।

योन्याख्यं [8]कल्पयेत्कुण्डं यथा पिप्पलपत्रवत्।
त्यक्त्वा कुण्डाच्चतुर्भागमुत्तरे पूर्वपश्चिमम्।।10।।

आयतं सूत्रमास्फाल्य बहिस्तस्मिंस्तु लाञ्छयेत्।
कुण्डपादेन मध्यस्थं पूर्वाङ्कात्पश्चिमं लिखेत्।।11।।

[9]प्रादक्षिण्यक्रमात्कुण्डं दशमीचन्द्रवत्स्मृतम्।
प्राक् प्रत्यक् कुण्डपादेन लाञ्छयित्वास्य मध्यतः।।12।

दक्षिणोत्तरयोर्मत्स्यौ तयोः पूर्वाङ्किते त्रिभिः।
[10]सूत्रैरास्फालितैः सम्यक् त्रिकोणमपि साधयेत्।।13।।

कुण्डार्धबाहुसूत्रं तत् कोणे यदतिरिच्यते।
तदर्धं दिशि संस्थाप्य भ्रामितं [11]वर्त्तुलं भवेत्।।14।।

[12]पूर्वाख्यस्थितपञ्चांश[13] मध्याप्तार्णवमीनजैः[14]।
अङ्कद्वन्द्वस्थितैः सूत्रैः भवेत्कुण्डं षडश्रकम्।।15।।

अष्टदिक्शूल[15]पद्मस्य खात्वा मध्यं समन्ततः।
दर्शिताग्रदलानि स्युः पद्माकारं प्रकीर्तितम्।।16।।

मित्रद्वन्द्वांशतश्चिह्नैर्दिक्षुकोणार्धसूत्रकैः।
उत्पन्नवसुमीनस्थ[16]सूत्रैरष्टाश्रकं भवेत्।।17।।

8. कारयेत्-ख
9. प्रदक्षिणक्रमात्-ख
10. नेत्रे-क
11. पत्तलं-क
12. पूर्वाप्य-ख
13. पंचाङ्ग-क
14. नीरजैः-क
15. दल-क
16. पदैः-क

यावत्क्षेत्रं तु कुण्डानां तावन्निम्नं खनेत् क्षितिम्।
तदर्धमथवा पादमुत्त्वा खातं शिलादिषु।।18।।

मेखलाः सर्वकुण्डानां कुण्डाकाराः सुसन्तताः।
कुण्डाकारा भवेदाद्याप्यथवा श्रीकृते [17]परे।।19।।

तत्रार्धशतहोमे तु मुष्टिर[18]त्निप्रमाणकम्।
सहस्रायुतहोमे तु हस्तं हस्तद्वयं क्रमात्।।20।।

स्याल्लक्षायुतहोमे तु षड्हस्तं च[19] चतुष्करम्।
कोटिहोमेऽष्टहस्तं स्यात्तस्मादूर्ध्वं न कारयेत्।।21।।

त्रिमेखलं भवेत् कुण्डमेकमेखलमेव वा।
मुष्टिमात्रस्य कुण्डस्य मेखला याङ्गुलद्वया।।22।।

मेखलाद्वितयं कार्यमङ्गुलार्धाङ्गुल[20] क्रमात्।
रत्निमात्रस्य कुण्डस्य नेमिः [22]स्यादङ्गुलैस्त्रिभिः।।23।।

[23]स्त्रिभिर्नेमिद्वयं चान्यं द्वयङ्गुलाङ्गुलके भवेत्।
हस्तमात्रस्य कुण्डस्य नेमिः स्याच्चतुरङ्गुला।।24।।

अन्यनेमिद्वयं कार्यंत्र्यङ्गुलं द्वयङ्गुलं[24] क्रमात्।
कुण्डस्य द्विकरस्यास्या पूर्वनेमिः षडङ्गुला।।25।।

अन्याङ्गुलिचतुष्केण तृतीया चतुरङ्गुला[25]।
[26]चतुर्हस्तस्य कुण्डस्य पूर्वनेम्यङ्गुलाष्टकम्।।26।।

---

17. वरे-ख
18. मुष्टिरग्नि प्रमाणतः-ख
19. चतुर्हस्तञ्च षट्करम्-ख
20. तस्मादर्धं-क
21. द्वया-ख
22. स्यात्तदङ्गुलैः-क
23. पूर्वाह्ने................श्चान्यदद्वयङ्गुलाङ्गुलतो भवेत्-ख
24. कार्यमङ्गुलात्यङ्गुलं-क
25. तृतीयाङ्गुलैस्त्रिभिः-क
26. त्रिभिश्चतुर्हस्तस्य-ख

षड्भिरष्टाङ्गुलैः कार्या चतुर्भिरपराङ्गुलैः।
दशाष्टषड्भिः षड्वस्तैर्वसुहस्ते हि मेखला।।27।।

द्वादशाङ्गुलिभिश्चाद्या[27] दशाष्टाङ्गुलिभिः क्रमात्।
एकहस्तस्य कुण्डस्य सर्वा वा[28] चतुरङ्गुला।।28।।

मेखलानां तु विस्तारं यावत्तासां समुन्नतिम्।
मेखलायां भवेद् योनिर्मेखलाश्चाङ्गुलाद्बहिः।।29।।

दशाङ्गुला भवेद्योनिस्तन्नावं[29] चतुरङ्गुलम्।
मूलमध्याग्रविस्तारं त्रिद्व्यैकाङ्गुलैः[30] क्रमात्।।30।।

अष्टाङ्गुलैस्तथा षड्भिः [31]चतुर्भिर्द्वयङ्गुलैः।
[32]योनेर्विस्तारमुद्दिष्टं किञ्चित् कुण्डे निवेशिते[33]।।31।।

योनेर्दैर्घ्यं च विस्तारं मेखलानां समं नयेत्।
अष्टाविंशतिधा भक्त्वा चतुरश्रं चतुष्करम्।।32।।

षट्त्रिंशत्कोष्ठकैः पद्मं पञ्चपीठमथैकया।
[34]पङ्क्तिभ्यां परितो वीथीं तद्बहिः स्वस्तिकाष्टकम्।।33।।

क्रमात्षोडशकोष्ठैस्तु मध्ये तेषां पृथक् पृथक्।
पङ्क्तिभ्यां कल्पयेत् द्वारमन्तश्चत्वारि लोपयेत्।।34।।

अविभेदेन तद्बाह्ये द्वारं शुक्लेन पूरयेत्।
त्रीण्येकमन्तर्बाह्ये तु शोभां रक्तेन पूरयेत्।।35।।

द्वारं तद्विपरीतं तु पुनः शोभामथान्यया।
अन्यथैवोपशोभान्तु सम्यक् पीतेन पूरयेत्।।36।।

27. चान्या-क
28. च-ख
29. नादं-क
30. त्रिद्विकैकाङ्गुलैः-क
31. स्त्रिद्व्यन्तरम्-ख
32. योगैः-क
33. निवेशिता-क
34. पङ्क्तिभ्यामथ वीटिका-क

अन्तस्त्रीणि बहिस्त्रीणि कोणं कृष्णेन पूरयेत्।
द्वाराणि दिक्षु चत्वारि मुख्यान्यष्टाव[35]राणि च।।37।।
[36]षोडशैवोपशोभाः स्युरष्टाव[37]त्रोपशोभिताः।
लतावितानपत्राद्यैर्भू[38]षयेद्वीथिकामपि।।38।।
अन्तरेकं बहिस्त्रीणि कोष्ठानि [39]विमृजेत्क्रमात्।
पूरयेच्चतुरङ्गैस्तु नन्द्यावर्तस्य पुष्पवत्।।39।।
गात्रं दिक्षु चतुष्कोष्ठैः पूरयेदरुणेन च।
विदिशासु त्रिभिः कोष्ठैः पादं शुक्लेन पूरयेत्।।40।।
व्योमवद्व्योमरेखां तु गात्रान्तश्चाम्बुजं[40] लिखेत्।
[41]पदार्द्धे द्वादशांशेन कल्पयेद्[42] व्योममण्डलम्।।41।।
[43]चतुर्धा तु समं भङ्क्त्वा लिखेद्रेखाः पृथक् पृथक्।
कर्णिकानिलयं भौमं केसराख्यं तु वारुणम्।।42।।
दलानां सन्धिसञ्ज्ञं यत् तत्क्षेत्रं चानलं विदुः।
दलक्षेत्रं तु वायव्यं दलाग्रं व्योममण्डलम्।।43।।
सूत्राणि दिक्षु कोणेषु पातयेद्दलसिद्धये[44]।
सन्धिसूत्राण्यथास्फाल्य दलसूत्रे निवेश्य[45] च।।44।।
सन्धिसूत्रात्सन्धिसूत्रं यावत्तावत् समुल्लिखेत्।
संस्थाप्य व्योमरेखायां पार्श्वे बाह्यभ्रमेण तु।।45।।

35. मुख्यान्यष्टापराणि-क
36. षोडशैवेह शोभाः-ख
37. रष्टपत्रोप-ख
38. दूषयेद्-क
39. विमृशेत्-ख
40. चाम्बु संल्लिखेत्-ख
41. नन्द्यार्धं-क
42. दिपयोद्व्योम-क
43. चतुर्धासु-क
44. सन्धये-ख
45. निधाय-ख

दलाग्रमुल्लिखेद्विद्वानत्यन्तनिशितं यथा।
केसरे तु लिखेद्द्वौ द्वौ पत्रे पत्रे समन्ततः।।46।।

कर्णिका पीतवर्णा स्यात् सुसितानि दलान्यपि।
पीतारुणसि[46]तामूलमध्याग्राः केसराः पृथक्।।47।।

श्यामेन वाथ कृष्णेन दलसन्धींस्तु पूरयेत्।
तत्कोणमरुणेनैव नानावर्णैस्तु वीथिकाम्।।48।।

नाम्नातपमयोद्दिष्टमनन्तविजयाम्बुजम्।
अत्यन्तदुर्लभं लोके भुक्तिमुक्तिप्रदं नृणाम्।।49।।

पद्मं पीठं तथा वीथीं[47] पूर्ववद्भद्रकं लिखेत्।
प्रान्तचत्वारि कोष्ठानि द्वारार्थं दिक्षु लोपयेत्।।50।।

पदैः षोडशभिद्र्वारं शोभां चैवोपशोभिकाम्[48]।
कोणमेवं समुद्दिष्टं सर्वदैवार्चनाविधौ।।51।।

कर्तुः शिवस्यानुकूले सुमुहूर्त्ते शुभेऽहनि।
द्वादशान्नवमाद्वापि सप्तमात्पञ्चमाद्गुरुः।।52।।

प्रागेव दिवसा[49]द्रात्रे दिवा वा शशिबृंहणे।
बीजाङ्कुरार्पणं कुर्याच्छङ्खतूर्यरवान्वितम्[50]।।53।।

सूत्रेण दर्भदाम्ना च वेष्टयित्वा सकृद्गृहम्।
सम्मार्ज्यालिप्य[51] सिद्धार्थान्विकीर्य परिमार्ज्य च।।54।।

प्रागग्राण्युदग्राणि पञ्च तद्विगुणानि च।
पातयित्वात्र सूत्राणि रजोभिः पूरयेत् पृथक्।।55।।

व्रीहिभिः पीठिकां कृत्वा तेषु पात्राणि विन्यसेत्।
सङ्क्षाल्य तन्तुनावेष्ट्य मृद्वालुककरीषकैः।।56।।

46. सिक्ता-क
47. पीठं-क
48. शोभिताम्-ख
49. रात्रौ-ख
50. कूर्च रवान्वितम्-क
51. लिख्य-क

पृथक् कूर्चात् प्रविन्यस्य[52] पूरयेदुत्तरोत्तरम्।
अग्न्यादीशानपर्यन्तं त्रिपङ्क्तिकमपि[53] न्यसेत्।।57।।

पूर्वेण पालिकास्थानं घटिकामध्यभूमिषु।
शरावं पश्चिमे भागे तेषु बीजानि वापयेत्।।58।।

तिलनिष्पावरक्षोघ्नमुद्गमाषकुलुत्थकान्।
शालिप्रियङ्गुश्यामाख्यान् विशुद्धान्नाढकीयुतान्।।59।।

पात्रे निक्षिप्य सङ्क्षाल्य तोयेन पयसा क्रमात्।
पुण्याहं [54]वाचयेत्पश्चान्मङ्गलाङ्कुरदेवताः।।60।।

त्र्यम्बकाय च शर्वाय शङ्कराय शिवाय च।
सर्वलोकप्रधानाय शाश्वताय नमो नमः।।61।।

अनेन चार्चयित्वा तु सिञ्चेद्धारिद्रवारिणा।
तेनैवाभ्युक्ष्य सम्पूज्य निवेद्य सवनत्रये।।62।।

निशाधिपानां विकिरेत् गणेभ्यो
निशासु सद्द्रव्ययुतैः शुभान्नैः।
दिक्षुक्रमान्मण्डलकेषु मन्त्री
प्रातः पुनः कर्मदिने प्रदद्यात्।।63।।

कुशपुष्पाक्षताम्भोभिर्भूते क्रूरेण चापरम्।
इन्द्रवल्लिरसासक्तदधिक्षीराज्यसक्तुभिः।।64।।

गोक्षीरवैणवान्नेन पुष्पमिश्रितसर्पिषा।
तुषकम्बुनिशारक्तकुसुमारुणचन्दनैः।।65।।

तिलमाषनिशालाजमधुमत्स्यान्नमांसकैः।
ब्रह्मभूतेन्द्रगन्धर्वयक्षरक्षःपिशाचकाः[55]।।66।।

---

52. प्रपञ्चस्य-क
53. त्रिपङ्क्तिकृतवि-ख, त्रिपङ्क्तीकृत्य-ग
54. वाच्या-ख, वाचयेद्वाच्यं-ग
55. पिशाचकैः-ख

एते बलिभुजस्तत्र ग्रहाः सप्तविधाः स्मृताः।*
गौलेन वैष्णवं वैध्नं बलिं च मधुरत्रयैः।।67।।
[56]स्कान्दं दध्याज्यसंसक्तं नालिकेरपयोऽन्धसा।
क्षौद्रं[57] दधिनिशाचूर्णंकृसरान्नेन दापयेत्।।68।।
शैवमन्त्यबलिं दद्यात् घृतमिश्रपयोऽन्धसा[58]।
द्रव्यालाभे शिवोद्दिष्टद्रव्येण दिवसेषु वा।।69।।
आपत्सु रक्षयेन्मासं दत्वा शैवबलिं निशि।
वापयेदेषु पात्रेषु षण्मासं वत्सरं तु वा।।70।।
तावन्न[59] वापयेद्विद्वान् पुनरप्सु विनिक्षिपेत्।
मृन्मयानि च सङ्क्षाल्य लौहपात्राणि सङ्ग्रहेत्।।71।।
शान्तिहोमं च कर्त्तव्यं पुनः कर्म समाचरेत्।
अङ्कुराश्चोर्ध्वगाः पीताःश्वेता वा सर्वसिद्धिदाः।।72।।
कृष्णा रक्ता प्रारूढाश्च श्यामास्तिर्यग्गतानि[60] च।
उत्सवेषु प्रतिष्ठायां महास्नपनकर्मणि।।73।।
सिद्धये वापयित्वैवं स्नायाद्दत्वा बलिं गुरुः।
लिङ्गादानं ततः कुर्यात्सर्वमङ्गलसंयुतम्।।74।।
संशोध्य मण्डलं[61] कृत्वा पूर्वपश्चिममायतम्।।
तस्मिन् शय्यां समास्तीर्य तस्मिन् लिङ्गं तु शाययेत्।।75।।
मूर्ध्नि सिद्धार्थकान्क्षिप्त्वा श्वेतपुष्पाक्षतान्वितान्।
अनेन पातयेत्सूत्रं लक्षणोद्धरणाय च।।76।।

---

* अत्र 55 पद्यतः 66 1/2 पद्यं यावत्पाठः 'ग' मातृकायां षष्ठपटले प्राप्यते।

56. कृन्दं-क

57. रौद्रं-क

58. पयेन्धसा-क

59. तावन्नावापयेद्-ख

60. तिर्यग्गता न च-क

61. मण्डपं-ख

ओं नमो भगवते रुद्राय हिरण्यरेतसे महात्मने शिवाय शिव रुद्ररूपाय उमाप्रियाय नमो नमः।

स्वर्णपात्रे समायोज्य पुनश्च मधुसर्पिषी।
मधुवातेति तेनैव रेखाः सम्पूरयेत्क्रमात्।।77।।

सुवर्णसूच्या सूचिं च पात्रं शय्यां च शिल्पिने।
दक्षिणां च पुनर्दत्वा गृह्णीयात्तत्कराद्गुरुः[62]।।78।।

आज्येन मधुनालिप्य त्वद्भिर्मृद्भिश्च भस्मना।
पूर्णैर्दर्भैः [63]समाघृष्य क्षालयेदस्त्रवारिणा।।79।।

गन्धेनालिप्य वस्त्राभ्यां वेष्टयित्वा रथेन तम्।
नीत्वा तीर्थजले[64] ध्यात्वा ज्वलन्तं ब्रह्मपञ्चभिः।।80।।

तेजोमयं तु [65]तत्तोये लिङ्गं [66]मूलेन शाययेत्।
फलकायां ध्वजं[67] छत्रं स्थाप्य[68] रक्षां विधाय च।।81।।

दीपमप्यहतं स्थाप्य रक्षार्थं परिचारकान्।
कल्पयेत्पञ्चरात्रं वा वस्तव्यं तु दिनत्रयम्।।82।।

एवमेव विभोः पीठं नपुंसकशिलामयम्[69]।
न्यग्रोधोदुम्बराश्वत्थपनसाम्र[70]शिरीषिणाम्।।83।।

ब्रह्मबिल्वमधूकानां कषायं [71]त्वग्रसैः स्मृतम्।
आभिः करीषयुक्ताभिर्दग्धं भस्म च वह्निना।।84।।

---

62. गृह्णीयादक्षताद्गुरुः-ख
63. समाकृष्य-ख
64. तीर्थं जलं-ख
65. ततस्तोये-ख, तत्तोयं-क
66. लिङ्गमूले तु-ख
67. ध्वजिञ्चित्रं-ख
68. स्मार्य-क
69. मपि-क
70. शिरीषकम्-ख
71. च ग्रसैः-क

सदोषाभिः कृतं पिष्टमालेपनविधौ स्मृतम्।
[72]इभगोदन्तयोरग्राद्वल्मीकाच्च चतुष्पथात्।।85।।
नदीवेदिमहातीर्थपर्वतेभ्यो हरेन्मृदम्।
यवशालिनिशाचूर्णस्वर्णगोधूममुद्गयुक्।।86।।
चूर्णमुद्वर्तने प्रोक्तं गन्धमष्टाङ्गमुच्यते[73]।।87।।

**॥ इति श्रीपाशुपते नन्दिप्रोक्तेऽष्टमः पटलः॥**

72. इह-क
73. 'ग' मातृकायामष्टमपटले भिन्नाः श्लोकाः प्राप्यन्ते। तेषु खल्वनेके श्लोका अत्र नवमपटले प्राप्यन्ते।

# अथ नवमः पटलः

## नन्दिरुवाच

सन्ताड्य मुक्तमात्रे तु शिल्पीनादाय[1] देशिकः।
अस्त्रेणालोड्य सम्मार्ज्य सङ्क्षाल्यालिप्य मन्दिरम्।।1।।

त्रिगुणीकृतसूत्रेण त्रिधा संवेष्ट्य वर्मणा।
अस्त्रेण दर्भदाम्ना च सकृत्संवेष्ट्य मार्जयेत्।।2।।

पलाशशाखादर्भैस्तु कृत्वा मुष्टित्रयं [2]पुनः।
वायुनान्तर्बहिस्तद्वद् गोमयेनोपलिप्य च।।3।।

वारुणेनास्त्रजप्तांश्च सिद्धार्थान्विकिरेत्पुनः।
सम्मार्ज्य गन्धतोयेन चालिप्यापः पुनन्त्विति।।4।।

पञ्चगव्येन सम्प्रोक्ष्य विकिरान्विकिरेत् त्रिधा।
अक्षतानि च माल्यानि दर्भान्धूपं सदीपकम्।।5।।

सर्वं मूलेन कृत्वा तु पूरयित्वा घटं भृशम्।
अघोरास्त्रेण चाग्नेय्यां सम्पूज्याच्छाद्य वाससा।।6।।

रक्षोघ्नसूत्रमसकृज्जप्त्वा तालत्रयं पुनः।
पुष्पास्त्रमोचनं कृत्वा होमकर्म समारभेत्।।7।।

अग्निं निधाय घोराग्निं ध्यायन्नग्निमुखं चरेत्।
रक्षोगणादिमन्त्राभ्यां पक्वं[4] द्वाभ्यां च होमयेत्।।8।।

---

1. शिल्पिनादाय-ख
2. पृथक्-ख
3. कल्पयेत्-क
4. पञ्च-क

कृणुष्वाष्टादशैराज्यं ये देवा इति पञ्चभिः।
दुर्गाभिर्व्याहृतीभिश्च हुत्वा द्रव्याणि होमयेत्।।9।।
अपामार्गसमित्सर्पिरन्नमाज्यं शतं शतम्।
अष्टाधिकं महास्त्रेण पूर्णान्द्रव्यान्तरे हुनेत्।।10।।
होमं समाप्य सम्पातं हुतभस्मसमन्वितम्।
प्रणीताजलसंयुक्तमपामार्गरसा[5]न्वितम्।।11।।
अघोरास्त्रेण सम्मन्त्र्य हुतमन्त्रैस्तु मार्जयेत्।
पलाशाश्वत्थशाखाभिः बहिरन्तश्च तद्गृहम्।।12।।
तमेवाग्निमथाध्वर्युः [6]शर्वकोणे निधाय[7] च।
वास्तोष्पतिमनुस्मृत्य हुत्वा चाग्निमुखं क्रमात्।।13।।
व्रीहिभिः पीठिकां कृत्वा तण्डुलैश्च तदग्रतः।
वस्त्रेणास्तीर्य [8]दूर्वाभिः शमीपर्णैः कुशैरपि।।14।।
उपर्युपरि संस्तीर्य [9]तण्डुलैः सलिलैः क्रमात्।
पूरयेत्पश्चिमं[10] कुम्भं कुर्याद् [11]होमन्तु पूर्वगम्।।15।।
शान्तिमावाहयेत्तोये 'शं नो देवी'रितिब्रुवन्।
वास्तोस्पतेति मन्त्राभ्यां पक्वमाज्याहुतीर्हुनेत्।।16।।
वास्तोष्पते ध्रुवेत्याद्यैः षड्भिः सद्यादि पञ्चभिः।
शन्नवर्गैः शमीवृक्षैःसमिद्भिर्गोघृतेन च।।17।।
चरुणाज्येन गव्याक्तै[12]र्दूर्वाभिः शान्तिविद्यया।
अष्टोत्तरशतं हुत्वा पूर्णां पूर्ववदत्र तु।।18।।

5. समन्वितम्-क
6. शट्कोणे-क
7. निधापयेत्-ख
8. मृद्भिः-क
9. कज्जलैः-क
10. पश्चिमे कुम्भे-ख
11. हेमन्तपूर्वगम्-क
12. मूर्वाभिः-ख

हुतशेषं कुशेष्वग्रे नमो रुद्राय इत्यपि।
आज्यशेषमपां शेषं पञ्चगव्यं समस्तकम्।।19।।
निषिच्य शान्तितोये तु जत्त्वा सम्प्रोक्षयेद्गृहम्।
त्वं विप्रयजुषा[13] गेहे वास्तोः पुण्याहमाचरेत्।।20।।
होमावसाने वास्तोस्तदुत्तरे विकिरेद्बलिम्।
भूण्डलमनन्तस्थं कृत्स्नं ध्यात्वा तु मण्डलम्।।21।।
बलिं [14]दत्त्वा पुनर्ध्यायेत्प्राकारान्तां निरन्तराम्।
हितं नातः परं किञ्चित् स्थानं सङ्कल्पनादिषु।।22।।
ऋषभं च पताकां च स्थाप्याग्रे गुरुमूर्तिपान्।
नन्दी च ऋषभश्चैव प्रधानध्वजदेवताः।।23।।
पुण्याहं वाचयित्वा तु प्रोक्षयेत्सलिलैर्ध्वजम्।
अवटेन तमभ्यर्च्य सम्मुखं स्थापयेत् ध्वजम्।।24।।
द्वारोत्सेधं त्रिधा कृत्वा वेदिकायाः समुच्छ्रयम्।
एकेनैव तु विस्तारं द्वाभ्यामेवं[15] प्रकल्प्य च।।25।।
अमुना त्रिकालमभ्यर्च्य मन्त्रेण विकिरेद्बलिम्।*
नमस्तेऽस्तु त्रिणेत्राय[16] ध्वजाधिपतये नमः।।26।।
नन्दिने तु नमस्तुभ्यमुत्सवस्य प्रसिद्धये।
वितानेनोर्ध्वमाच्छाद्य स्तम्भान्वस्त्रेण वेष्टयेत्।।27।।
वेदिकां च तथा[17]लिन्दं प्राङ्कणं परिशोध्य च।
त्रिगुणीकृतसूत्रेण दर्भदाम्ना च वेष्टयेत्।।28।।

---

13. विप्रियङ्कु गेहं-क
14. ध्वात्वा-क
15. द्वाभ्यामेकं-ख
16. तिनेत्राय-ख
17. तथाद्रींश्च-क
* छन्दोदृष्ट्याऽत्रैकाक्षराधिक्यं वर्तते।
18. पादपांस्तोरणे-ख

योगे योगेति मन्त्रेण पादका[18]स्तोरणे न्यसेत्।।
देवस्य त्वेति यजुषा शूलान्यग्रे निवेश्य च।।29।।

उत्तिष्ठेति समुद्धृत्य स्थिरो भवेति चोत्क्षिपेत्।
ओषधीरिति मन्त्रेण[19] भूषयेत्कुशपल्लवैः।।30।।

बृहस्पतेति [20]वस्त्रैस्तु नामभिः पूजयेत्क्रमात्।
प्रमोदाभयशान्ताख्यमहान्तस्तोरणेश्वराः।।31।।

भृङ्गीशश्च महासेनो वृषो नन्दी क्रमेण च।
[21]पञ्चमोऽथ महाकालः कुम्भोदर[22]महोदरौ।।32।।

वीरभद्रः पुनर्ब्रह्मा क्रमादेते ध्वजाधिपाः।
पुनर्द्वारं समासाद्य वेदाद्यैः स्थाप्य दिक्क्रमात्।।33।।

[23]द्वाराधिदेवतानां हि पूजयेन्नामभिः क्रमात्।
कुम्भभद्रादिकर्णौ च श्वेतगौ पूर्वकर्णकौ।।34।।

महोदरमहाकायौ [24]प्रागादिद्वारपालकौ।
महाकण्ठमहोरस्कौ [25]दक्षिणद्वारपालकौ।।35।।

अग्निजिह्वोऽग्निनेत्रश्च पश्चिमद्वार[26]पालकौ।
विरूपाक्षो विशालाक्षः सर्वे सम्यक् प्रकीर्तिताः।।36।।

दक्षिणोत्तरपार्श्वेषु द्वाराणां कलशेष्वपि।
द्वारपालान्समाहूय सम्यक् सम्पूजयेत्क्रमात्।।37।।

सहस्रवीची विमला शतधारा प्रमोदिनी।
नद्यस्तोरणमूलेषु स्थाप्याः कुम्भेष्वनुक्रमात्।।38।।

---

19. मन्त्रैः दूषयेत्-क
20. मन्त्रैस्तु-क
21. पञ्चमेन-ख
22. रम्भोदर-क
23. द्वारादि देवतानां-ख
24. प्राग्वारि-ख
25. दक्षिणेपश्चिमे पुनः-ख
26. उत्तरद्वारपालकौ-ख

प्रमोदादिसमाख्या[27]तासम्यक् सम्पूज्य देशिकः।
विकिरेच्च बलिं तेषां शङ्खतूर्यरवान्वितम्।।39।।
दर्भैः पलाशशाखाभिः कृत्वा मुष्टित्रयं पुनः।
शिवादिमार्जयेद्भूमिं वायुबीजेन मुष्टिना।।40।।
गालितैर्गोमयजलैर्वारुणे[28] चोपलिप्य च।
उदीच्यान्तं च सिद्धार्थान्निकिरेदस्त्रमुच्च[29]रन्।।41।।
सम्मार्ज्य मुष्टिनादाय पात्रे संरक्षयेच्च तान्।
आपः पुनन्त्वित्यालिप्य पूर्ववद्गन्धवारिणा।।42।।
विकिरान्विकिरेत्तद्वन्मूलमन्त्रेण च त्रिधा।
सम्मार्ज्य पात्रे निक्षिप्य पात्रगैः सह रक्षयेत्।।43।।
आलिप्या[30]वोक्ष्य गव्येन सद्याद्यैः पञ्चभिर्भुवम्[31]।
अक्षतान्मूलमन्त्रेण इषे त्वेति कुशानपि।।44।।
पुष्पं धूपं तथा दीपं दत्वा पुष्पास्त्रमोचनम्।
कृत्वा संशोध्य सूत्राणि पातयेत्कुशलो गुरुः।।45।।
पुनरष्टदलं पद्मं पीठान्तं[32] परिकल्प्य च।
ईशे वा यदि पर्जन्ये वेदिकायां गुरुः स्वयम्।।46।।
गन्धतोयेन कुम्भेशं पूरयेद्हेमनिर्मितम्।
हेमरत्नानि निक्षिप्य पीठन्यासक्रमेण तु।।47।।
तस्मिन्नावाहयेत्तत्त्वं[33] तत्त्वत्रयसमन्वितम्।
आत्मतत्त्वं न्यसेदादौ विद्यातत्त्वमनन्तरम्।।48।।

---

27. समाख्यानात्-क
28. वारुणेनोपलिप्य-क
29. मुच्चरेत्-ख
30. आलिप्यापोक्ष्य-ख
31. र्भवम्-क
32. पीठं तं-ख
33. तस्मिन्नाहूय तत्तत्त्वं-ख

सदाशिवाख्यमूर्ध्वे तु ध्यात्वा देवं [34]त्रियम्बकम्।
पाद्याद्यैरर्चयेद्देवं[35] ध्यात्वा सपरिवारकम्।।49।।

निवेद्या[36]भ्यर्च्य तं कुम्भं राजतं ताम्रमेव वा।
वस्त्राभ्यां वेष्टयित्वा तु वर्धनीं तस्य दक्षिणे।।50।।

अघोरास्त्रेण सम्पूज्य[37] वस्त्रेणाच्छादयेच्च ताम्।
वर्धनीं भ्रामयेदग्रे समादाय गुरुःस्वयम्।।51।।

अच्छिन्नधारया सिञ्चेत्कुड्य[38]श्लेषं प्रदक्षिणम्।
तन्मार्गेण घटं नीत्वा विकीर्णान्पात्रगैः सह।।52।।

विकिरान्पङ्कजे क्षित्वा तस्मिन्कुम्भं निधाय च।
सिद्धार्थोपरि संस्थाप्य पुनः सम्पूजयेद्घटौ।।53।।

एवं परिगृहीते तु यागक्षेत्रे महात्मनः।
वह्निमुत्पादयेत्पश्चात्कृत्वा वै षोडश क्रियाम्।।54।।

मण्डलस्योत्तरे पार्श्वे वैशान्यां[39] स्नानमण्डपम्।
व्रीहिभिः पीठिकां कृत्वा पदेषु सुसमाहितः।।55।।

तेषु संसाद्य[40] कलशान् प्रोत्तानी[41]कृत्य पूरयेत्।
हेमरत्नाष्टगन्धाद्भिः पूरयेन्मध्यमं घटम्।।56।।

कषायं[42] पञ्चगव्यं च भस्मोदं माक्षिकं जलम्।
दिक्षु कोणेषु गोमूत्रं क्षीरं दधि कुशोदकम्।।57।।

---

34. त्र्यम्बकम्-क
35. रर्चयेदीशं-ख
36. निवेद्याभ्यर्चितं-ख
37. सम्पूर्य-ख
38. कुल्य-क
39. प्येशे वा-ख
40. सं साद्य-क
41. प्रोक्तानी-क
42. कषाया-क

अन्तः पद्मदलेष्वष्टौ पूरयेज्जलधीन्क्रमात्।
व्यस्तैर्गन्धैश्च सम्पूर्य शुद्धोदैरपरान्घटान्।।58।।

होमं कृत्वा निषिच्याज्यमाच्छाद्य [43]सुसिताम्बरैः।
व्रीहिभिः स्थण्डिलं पद्मे पूर्वपश्चिममायतम्।।59।।

आस्तीर्योपरि वस्त्रेण तण्डुलैश्च तिलैरपि।
वस्त्रेणाच्छाद्य देवस्य शयनं तत्र [44]कल्पयेत्।।60।।

मध्वाज्यदिग्धान्सिद्धार्थान् परितो विकिरेत्पुनः।
मङ्गलानि तथाष्टौ च शङ्खं चक्रं वृषं ध्वजम्।।61।।

दर्पणं मत्स्ययुगलं चामरं च तथाङ्कुशम्।
अष्टदिक्ष्वष्टकुम्भेषु ध्यात्वा विद्येश्वरान्यजेत्।।62।।

शिरःस्थाने तु सौपर्णं पूरयेद्गन्धवारिणा[45]।
अभिमन्त्र्य पयस्वत्यां शान्तिमावाह्य [46]पूजयेत्।।63।।

अन्याभ्यामर्घ्यपाद्यौ च पादस्थानस्य पार्श्वयोः।
पयःपूर्णं घटं ताम्रं [47]मधुपूर्णं च राजतम्।।64।।

बीजाङ्कुरपात्राणि तु धान्यराशिषु[48] विन्यसेत्।
[49]घटमासाद्य निर्गच्छेत्तीर्थं कर्ता समूर्तिपः।।65।।

तोयस्थं लिङ्गमादाय तीर्थं [50]संहृत्य देशिकः।
वस्त्रेणावेष्ट्य यन्त्रे वा ब्रह्मयानेन [51]तन्नयेत्।।66।।

---

43. सुसितां चरेत्-क
44. संस्तरेत्-ख
45. पूरयेच्छुद्धवारिणा-ख
46. पूरयेत्-क
47. मधुपर्कं-क
48. धान्यराशिं प्रविन्यसेत्-ख
49. एवमापाद्य-ख
50. तीर्थान् सङ्गृह्य-ख
51. तान् नयेत्-क

[52]घनापनद्धसन्तानसुषिरादिमहास्वनैः।
स्वस्तिशाकुन[53]सूक्ताभ्यां क्ष्वेलास्फोटनजृम्भणैः।।67।।
नयेत्प्रदक्षिणं [54]गत्वा स्नानगेहं निशामुखे।
भद्रं कर्णेति चोच्चार्य भद्रपीठे निवेशयेत्।।68।।
आलिप्य कलशद्रव्यैस्तन्मन्त्रैरभिषेचयेत्।
कषायपूर्णकलशं यज्ञायज्ञेत्यृचं पुनः।।69।।
ब्रह्मभिः पञ्चभिर्गव्यं भूतिश्रीभस्मवारिणा।
भूतिः श्रीः पिङ्गलो बभ्रु[55]भूतिर्विष्णुः सनातनः।।70।।
अग्निमारुतयोर्भूतिः भूतिः सेन्द्राश्च देवताः।
मृत्तिकेति च मृत्तोयैर्मूत्रं गायत्र्या पशोः।।71।।
आप्यायस्वेति च[56] क्षीरं दधिक्राव्णेति वै दधि।
देवस्य त्वेति कौशेयं जलधीन्ज[57]लसंस्थितान्।।72।।
समुद्रज्येष्ठवर्गेण[58] मध्यस्थ[59]व्योमविद्यया।
गन्धेनालिप्य घोरेण वस्त्रेणावेष्ट्य वर्मणा।।73।।
पुष्पैरीशेन [60]सम्पूज्य धूपं दत्वा नरेण च।
गन्धप्रलिप्त[61]हस्ताभ्यां स्वस्वगायत्र्या संस्पृशेत्।।74।।
आवाह्य सकलीकृत्य देवदेवमुमापतिम्।
पाद्यमर्घ्यं तथाचामं मधुपर्कं प्रदाय च।।75।।

---

52. घनाववद्ध-ख
53. स्वस्तिकासन-क
54. कृत्वा-ख
55. बभ्रुः-क
56. वै-ख
57. दल-क
58. गर्गेण-क
59. जलधिं-क
60. सत्पूज्य-ख
61. गन्धप्रदिग्ध-क

स्नानं वस्त्रोपवीतं च भूषणैश्चाङ्गुलीयकम्।
कुण्डलं गन्धपुष्पं च पादुकं यानमेव च।।76।।
छत्रं च दर्पणं दत्वा पुनः पुण्याहमारभेत्।
न्यस्त्वा मूर्ध्न्यच्छकुसुमं नीराज्या[62] स्त्रेण दिक्क्रमात्।।77।।
उत्तिष्ठेति समुत्थाप्य ब्रह्मयानेन शङ्करम्।
रथे[63] तिष्ठन्निति[64] नयन् कृत्वा तत्र प्रदक्षिणम्।।78।।
पाद्यमर्घ्यं प्रदायान्तर्मूलेनेशं प्रवेशयेत्।
अप्रमादेन मतिमानुदुत्यं[65] जातवेदसम्।।79।।
[66]आसत्येन रजसेति द्वाभ्यां समवतारयेत्।
सकलीकृत्य मूलेन गुह्येनेशं तु शाययेत्।।80।।
प्राक्शिराः शाययेल्लिङ्गं [67]प्रासादाभिमुखं तु वा।।
उपास्यापर[68] सन्ध्यां स कुर्यादत्राधिवासनम्।।81।।
आत्मशुद्धिं पुरा कृत्वा मन्त्रन्यासमथार्चनम्।
अन्तर्यागं हि हृत्पद्मे विचिन्त्य[69] परमेश्वरम्।।82।।
मूर्ध्नि चान्द्रमसं ध्यात्वा बिम्बादमृतधारया।
कल्पयित्वाष्टकुसुमं ज्ञानरूपेण चेतसा।।83।।
प्रणवद्वितयं चोक्त्वा पुष्पेणेशं समर्चयेत्।
मन्त्रामृतसमुत्सङ्गात् पूर्णाद्वा [70]परिबृंहितम्।।84।।

---

62. नीराजास्त्रेण-क
63. तिष्ठेन्निति-ख
64. यत्-क
65. नुदित्यं-ख
66. सत्येन-ख
67. प्रासादादि-क
68. उपास्य पादसन्ध्यां-ख
69. निचिन्त्य-क
70. पूर्णात्मा परिवृंहिता-ख

प्रीतिश्च सन्निधानं च नित्यं पुंसि करोत्यसौ।
तप्तोपलं यथा सिक्तं तद्वत् प्रतिलयं स्मरेत्।।85।।

उद्धाता[71]वृत्तिभिः पूर्वं मण्डलाग्निं विशोध्य च।
लिङ्गाभिमानिनं जीवं संहृत्यात्मनि योजयेत्।।86।।

संहृत्योत्पाद्य[72] लिङ्गं हि पूर्वसंहृतसंयुतम्।
शिवतत्त्वं हि संयोज्य तत्र शक्तिं विचिन्तयेत्।।87।।

ध्यात्वा सदाशिवं देवं पुरोदितविधानतः।
उत्पाद्य विन्यसेद्विद्वान् षडध्वानमनन्यधीः।।88।।

प्रासादरूपिणं ध्यात्वा पुनः पञ्चाक्षरात्मकम्।
पञ्च [73]ब्रह्ममयं भूयो व्योमव्यापिशिवं स्मरेत्।।89।।

एभिर्मन्त्रैश्च तं [74]स्पृष्ट्वा जप्त्वाभ्यर्च्य निवेदयेत्।
यथा विभवविस्तारं दिक्ष्वनेन किरेद्बलिम्।।90।।

ओम् देवं रुद्रं पुरस्कृत्येमं बलिं प्रतिगृह्णन्तु। सर्वभूतानि पैशाचान्तं यजामहे।

त्वगादि सलिलैः पीठं संशोध्य सलिलैः पुनः।
मूलमन्त्रेण तद्बीजैर्नवकं गन्धवारिभिः।।91।।

पूरयित्वा हुनेदग्नौ समिदादि शतं शतम्।
सम्पाताज्यं निषिच्योमां कलशैरभिषेचयेत्।।92।।

सम्पूज्य शयने तस्मिन् प्रासादे चाधिवासयेत्।
यच्छिलां पञ्चगव्येन क्षालयित्वाऽधिवासयेत्।।93।।

रत्नानि शयने न्यस्त्वा गन्धपुष्पैस्समर्चयेत्।
वेदांश्च चतुरो विप्रा जयेयुर्दिक्षु (संस्थिताः)।।94।।

कर्मज्ञा ब्राह्मणास्तद्वत्कोणेषु शिवसंहिताः।
ततो होमञ्च कुर्वीत गुरुरेव समूर्त्तिपः।।95।।

---

71. उत्खाता वृत्तिभिः-क
72. संहृत्यापाद्य-क
73. ब्रह्मत्रयं-ख
74. दृष्ट्वा-क

'सप्त ते अग्न' इत्यादावु (पज्वाल्य)च पावकम्।
'अग्निमीळे'ति पूर्वाग्निमग्निः पूर्वेति चानिलम्।।96।।
'अग्निं होत्रे'ति वै याम्यं 'यदङ्गे'ति च नैऋतम्।
'उप त्वाग्ने'ति पाश्चात्य'मनः पित्रे'ति चानिलम्।।97।।
[75]'अग्निं दूतं'तु कौबेर'मग्नि मग्नि'न्तु शाङ्करम्।
ऋग्भिराभिर्विहृत्याग्निं कृत्वा चाग्निमुखं गुरुः।।98।।
[76]पलाशोदुम्बरोऽश्वत्थतिला व्याहृतिभिः क्रमात्।
क्षीराज्यमधुसंसिक्ताश्चाष्टाधिकसहस्रकम्।।99।।
वीराख्यमनुभिः पश्चान्मूलमन्त्रैश्च मूर्त्तिभिः।
अङ्गैर्विद्येश्वराणाञ्च गणेशान्नामभिः क्रमात्।।100।।
लोकेशानाञ्च हेतीनां घृतं हुत्वा सकृत्सकृत्।
जुहुयात्सर्वकुण्डेषु पक्वं तत्पुरुषेण तु।।101।।
अधिवासनिकान् होमान् पुनश्च गुरुमूर्त्तिपाः।
मध्यादिदिक्ष्वथैशादि ब्रह्मभिर्यजनक्रमात्।।102।।
अङ्गैः कोणेषु तन्मन्त्रैर्जुहुयुर्विहरेच्च वा।
पलाशखदिराश्वत्थप्लक्षन्यग्रोधबिल्वजाः।।103।।
औदुम्बराश्च काश्मर्यो दिक्षु मध्ये पलाशजाः।
समिदाज्यचरूँल्लाजान् सर्षपांश्च तिलान् यवान्।।104।।
ब्रीहीन् सक्तून् पुनश्चाज्यं जुहुयुः सर्ववह्निषु।
मृत्युञ्जयेन ते सर्वे जुहुयुः शास्तिमादरात्।।105।।
दध्ना च मधुनाज्येन साष्टाधिकशतं शतम्।
द्रव्यान्तरे दशार्णेन पूर्णा सर्वत्र दर्शिताः।।106।।
(होमं) समाप्य सम्पातं स्पृष्ट्वा[77] दर्भाग्रपाणयः।
हुतमन्त्राञ्जपेयुस्ते पुनस्सम्पूज्य देशिकः।।107।।

---

75. अग्निन्दूतेन्तु-ख
76. पालाश्योदुम्बरोश्वत्थ-ख
77. स्पृष्ट्या-ख

निवेद्य पायसं विप्रान् भोजयेद्(यज्ञ) कल्पिताम्।
हिरण्यं दक्षिणां दद्याद् वदेयुस्ते च मङ्गलम्।।108।।
वेदादीनां बहिर्दिक्षु गणेभ्यो विकिरेद् बलिम्।
पीठिकायास्ततो होममभिषेकोक्तमार्गवत्।।109।।
अष्टाविंशतिसङ्ख्यं वा पृथगष्टोत्तरं शतम्।
वामादिभिर्दशद्रव्यैश्चतुर्भिर्वा षडात्मना।।110।।
वज्रलेपे तु संस्पृश्य सम्पातं नवशक्तिभिः।
देवतास्तास्समाख्याताः पुण्याहं तत्र कारयेत्।।111।।
सिकतोपलकार्पासलाक्षाचूर्णं समं स्मृतम्।
एषामेकद्विभागन्तु हरीतक्यास्तु चूर्णकम्।।112।।
हरीतकीद्विभागं तु चूर्णं सर्जरसस्य तु।
शङ्खचूर्णं त्रिभागं तु किञ्चिदामलकान्वितम्।।113।।
षडात्मना समित्सर्पिरन्नं सिद्धार्थकाच्छतम्।
अग्नये ब्रह्मणे चैव नमो रुद्राय विष्णवे।।114।।
स्कन्दाय गणराजाय गणमातृभ्य एव च[78]।
इन्द्रादिलोकपालेभ्य आदित्येभ्यः सकृत्सकृत्।।115।।
वसुभ्यश्चाथ रुद्रेभ्यो विश्वेदेवेभ्य इत्यपि।
अश्विभ्यां व्याहृतीभिश्च हुत्वाज्यं च समापयेत्।116।।
देवताहुतमन्त्रोक्ताः पुण्याहं वाचयेद्गुरुः[79]।
सम्पातस्पर्शनं कृत्वा रत्नान्यादाय विन्यसेत्।।117।।
ग्रहयागं पुराकृत्वा [80]सच्छिलां स्थाप्य देशिकः।
त्वमेव परमा शक्तिस्त्वमेवासनधारिका।।118।।
शिवाज्ञया त्वया देवि[81] स्थातव्यमिह सर्वदा।
स्थितं चराचरं यस्य रत्नानां निधिरव्ययः।।119।।

78. अत्र 93 श्लोकतः 114-1/2 श्लोकपर्यन्तं पाठः 'क' मातृकायां नोपलभ्यते।
79. गुरुम्-ख
80. यच्छिलां-ख
81. देव-क

सा त्वं ब्रह्मशिला रूपा तिष्ठात्र धरणी स्थिरा।
[82]रत्नानि मध्यगर्ते तु सद्यादिब्रह्मपञ्चभिः।।120।।

[83]तत्तत्कलाहिरण्यानि यथायोगं प्रविन्यसेत्।
पद्मरागं च वज्रं च मौक्तिकं पुष्यरागकम्।।121।।

इन्द्रादिनीलं स्फटिकं वैडूर्यं[84]मरक्ताह्वयम्।
नीलमेवं हि रत्नानि धातून्येवं प्रविन्यसेत्।।122।।

मनःशिलां हरीतालं [85]सौराष्ट्रीं विद्रुमं पुनः।
[86]गोरोचनं प्रवालं च व्यञ्जनं माक्षिकं रसम्।।123।।

पूर्वं मध्ये रसं न्यस्त्वा पुनः सिद्धार्थकानपि।
शालयो यवगोधूमकङ्कुमाषतिलास्तथा।।124।।

नीवाराः श्वेतनिष्पावः सौवर्णं पङ्कजं पुनः।
वृषं परश्वधं मालां शूलं दिक्षु हिरण्मयान्।।125।।

मध्ये कोणेषु सौवर्णरूप्यायस्त्रपुसीसकम्[87]।
एवं तु सुसमं न्यस्त्वा पुनः पीठं समर्चयेत्।।126।।

वाससा गर्तमाच्छाद्य कवाटमभिधाय च।
उत्तिष्ठेति समुद्धृत्य पाद्यमर्घ्यं प्रदाय च।।127।।

विद्येश्वरं [88]घटाम्भोभिरभिषिच्य समन्ततः[89]।
आलिप्य [90]गन्धपिष्टेन वस्त्राभ्यां परिवेष्ट्य च।।128।।

---

82. रत्नादि-ख
83. तत्तत्काल-ख
84. मरकाताह्वयम्-क, मरकाह्वयम्-ख, मारकाह्वयम्-ग
85. सौराष्ट्रिं-क
86. गोरोचनां-क
87. त्रपुकाम्रकम्-ख
88. बटाभोभि-क
89. च ततस्ततः-क
90. गन्धिपिष्टेन-क

पुण्याहं वाचयित्वा तन्नीराज्यास्त्रेण देशिकः।
शाकुनस्वस्तिसूक्ताभ्यां [91]नयेद्गेहात्प्रदक्षिणम्।।129।।
अच्छिन्नधारयाप्येको नयेदग्रे तु वर्धनीम्।
कुम्भेशमपि[92] तत्पृष्ठे शान्तिकुम्भं स्पृशेद्गुरुः।।130।।
लिङ्गपृष्ठे स्मरन्नीशं कर्ता मित्रैरलङ्कृतः।
पाद्यार्घ्यौ पार्श्वयोरग्रे नयेन्नीराजनादिकम्।।131।।
बीजाङ्कुरघटच्छत्रमङ्गलक्ष्वेल[93]जृम्भणैः।।
भेरीमृदङ्गतालादिजयशब्दैर्नयेद्गृहम्।।132।।
द्वारि पाद्यं पुनश्चार्घ्यं दत्वा गर्भगृहं नयेत्[94]।
[95]श्वभ्रस्य पृष्ठे विन्यस्य फलकोपरि देशिकः।।133।।
मौहूर्त्तिकोपदिष्टे तु [96]मुहूर्त्ते स्थापयेच्छिवम्।
[97](नक्षत्रतिथिवाराणां) सुकाले स्थापयेच्छिवम्[98] ।।134।।

**इति श्रीपाशुपते नन्दिप्रोक्ते नवमः पटलः॥**

---

91. गेहं-ख
92. कुम्भेशमभि-ख
93. क्ष्वेलन-ख
94. कालादि-क
95. तस्य-क
96. काले-क
97. 'ख' मातृकायामेषा पङ्क्तिर्नास्ति, 'क' मातृकायामर्धपङ्क्तिरेव दृश्यते।
98. 'ग' मातृकायामेतद्भिन्नाः श्लोकाः सन्ति नवमे पटले।

# अथ दशमः पटलः

## नन्दिरुवाच

[1]सद्येनादाय [2]पद्मेन [3]प्रवेश्याघोरविद्यया।
सुदृढ़ं स्थाप्य वक्त्रेण प्रणम्य शिवविद्यया।।1।।
गन्धपुष्पैः समभ्यर्च्य ध्यात्वाध्वानं[4] प्रकल्पयेत्।
[5]औमेयेन च वामेन ध्रुवा द्यौरिति पीठिकाम्।।2।।
रत्नैर्हेम्ना च सम्पूज्य वालुकैर्नवशक्तिभिः।
सुदृढं वज्रलेपेन निच्छिद्रं बन्धयेत्पुनः।।3।।
ध्रुवा द्यौरिति जप्त्वास्य[6] [7]मूर्ध्नि विन्यस्य काञ्चनम्।
शुद्धबुद्धमनन्तं तं शिवसञ्ज्ञं परात्परम्।।4।।
सुषुम्नारन्ध्रमार्गेण श्वासेन व्योमविद्यया।
आवाह्य सकलीकृत्य पूर्ववत्परिचिन्त्य च।।5।।
पाद्यमर्घ्यं तथाचामं मधुपर्कं प्रदाय च।
कुम्भेशशान्तिकुम्भाभ्यां स्नापयित्वा[8] प्रमार्ज्य च।।6।।

---

1. सद्यो नादाय-ग
2. वामेन-ख, ग
3. प्रवेश्याधार-क, प्रवेश्याघोर-ख
4. ध्वात्वाध्यानं-क
5. ऊमेयेन-ख
6. जप्त्वाद्य-क
7. मूर्ती-क
8. प्लावयित्वा-क

मधुना पयसा पूर्णघटाभ्यां तस्य मूर्धनि।
नीराज्यास्त्रेण नीराज्य देवं पाशुपतात्मना।।7।।

परिधाय च वस्त्राभ्यां दत्वा चैवोपवीतकम्।
[9]भूषणानि विचित्राणि गन्धपिष्टेन लेपयेत्।।8।।

पुनश्च मालामन्त्रेण कुर्यादावाहनादिकम्।
यस्य [10]सिंहा रथे युक्ता व्याघ्रभूतास्तथानुगाः।।9।।

ऋषयो लोकपालाश्च देवस्कन्दस्तथा वृषः।
[11]प्रयोगाणामन्तरश्च सोमो [12]विष्णुः पितामहः।।10।।

नागा[13] रक्षाः सगन्धर्वा ये च दिव्या नभश्चराः।
तमहं त्र्यक्षमीशानं शर्वं रुद्रमुमापतिम्।।11।।

आवाहयामि सगणं सपत्नीकं वृषध्वजम्।
आगच्छागच्छ भगवन् स्थिरो भव शिवो भव।।12।।

ध्रुवो भव प्रसन्नो भव नमोऽस्तु ते। ओं हौं नमः शिवाय ओं [14]जूं सः शिवशर्व-सर्वदात्र सान्निध्यं कुरु। अधिष्ठायाधिष्ठाय स्वाहा। निरोधनो भव पूजां प्रतिगृह्णातु भगवन् मन्त्रपूतमिममर्घ्यमिदं पाद्यमिदमाचमनीयमेतदासनं ब्रह्मणा निर्मितं स्वयमों स्वाहा।

ध्यायेत्तं सकलं देवं त्रिणेत्रं चन्द्रशेखरम्।
[+]मौलिगङ्गाधरं सौम्यं पञ्चवक्त्रं शुचिस्मितम्।।13।।

चतुर्बाहुं प्रियायुक्तं स्वालङ्कारैरलङ्कृतम्।
दत्त्वा पाद्यं पुनश्चार्घ्यं नत्वा नीराजयेत्पुनः।।14।।

---

9. भूषितानि-ख
10. संमो-क
11. प्रियागणामाकरश्च-क
12. यो मौलीषु-क
13. नागादि यक्षाः-क
14. जं-ख
\+ मौलिलिङ्गधरं-ग

शिवहस्तं निधायास्यां मूलमन्त्रगणं जपेत्।$
*हृद्बीजमङ्गसंयुक्तं पञ्चाङ्गं साङ्गमेव च।
ब्रह्माणि पञ्च साङ्गानि व्योमव्यापि शिवं तथा।।15।।

मन्त्रं त्रैयम्बकं रुद्रं पुनः पाशुपतं परम्।
#श्रीकण्ठं [15]चापि हृदयं वज्रं श्रीसूक्तमेव च।।16।।

*शाकुनं स्वस्तिसूक्तं च शिवसङ्कल्पमेव च।
स्वेषु स्थानेषु देवस्य परिवाराः समन्ततः।।17।।

स्थातव्याः पुनरेवान्तः प्रविश्य परमेश्वरम्।
पूजयित्वा विधानेन निवेद्यान्नं चतुर्विधम्।।18।।

अग्नौ हुत्वा बलिं दत्वा विसृज्यान्नं निवेदितम्।
अष्टाङ्गं प्रणमेद्भूमौ कर्ता स्मृत्वा महेश्वरम्।।19।।

देवस्य कल्पयित्वा तु पूजार्थं साधनानि #च।
दक्षिणां गुरवे दत्वा [16]मूर्त्तिपेभ्यः क्रमेण $च।।20।।

होमाध्ययनकर्तृणां सदस्यानां [17]द्विजातिनाम्।
प्रीत्यर्थमन्न[18]पानाद्यैः दक्षिणाभिर्विशेषतः।।21।।

त्रिधा कृत्वात्मनो वित्तं भागं देवाय दापयेत्।
दक्षिणार्थं पुनर्भागतृतीयं स्वयमेव हि।।22।।

---

$ मू ध्नि मन्त्रं जपेत्स हि-ग

* प्रासादभङ्गसंयुक्तं पञ्चार्णं स्वाङ्गमेव च-ग

# श्रीकण्ठं बीजमुख्यं च क्षुरिका वज्रमेव च-ग

15. चाग्नहृदयं- क
    * श्रीसूक्तं स्वस्तिसूक्तं च शाकुनं पौरुषं तथा।
    तथाथर्वशिरश्चान्ते शिवसङ्कल्पमेव हि।।-ग

    # पूजोपकरणानि च-ग

16. मुक्ति चेभ्यः-क
    $ मूर्त्तिपेभ्यस्स्वशक्तितः-ग

17. विजातिनम्-क
    कर्तृभ्यः सदस्येभ्यः प्रयत्नतः-ग

18. प्रीत्यर्थमनवानाद्यैः-क

गृह्णीयाद्गृहयात्रार्थं प्रतिष्ठातो मयेरिता।
पुनः पुष्पाञ्जलिं दद्यान्मूलेन प्रणवेन वा।।23।।
दीपमप्यहतं स्थाप्य गच्छेद् द्वारं [19]पिधाय च।
नोद्घाटयेत्त्रिरात्रं तत्तस्य पूजा[20] द्विजार्चनम्।।24।।
निधाय पावकं दिक्षु कृत्वा चाग्निमुखं क्रमात्।
बह्वेर्दक्षिणपार्श्वेषु घटात्सम्पूर्य नामभिः।।25।।
पक्वं च जुहुयुस्सर्वे मन्त्रैरेभिस्तु मूर्तिपाः।
इन्द्रक्रतुमिति प्राच्यामग्निं दूतं हुताशने।।26।।
नाके सुपर्णं याम्यायां नैर्ऋत्यां मोषुणः परा।
यं रक्षन्तीति वारुण्यां वायव्यां हि तु वायवे।।27।।
सोमं राजानमित्येवं सौम्ये [21]शार्वे त्रियम्बकम्।
पञ्चतारान्पुरोऽनूच्य द्रव्यमन्त्रांस्ततश्छृणु।।28।।
इन्द्रस्तु मरुतो देवः सर्वदेवाधिपो महान्।
वज्रहस्तो महासत्त्वः तस्मै नित्यं नमो नमः।।29।।
रक्तवर्णो महादीप्तः सर्वदेवमयोऽ[22]व्ययः।
ध्रुवकेतुरनाधृष्यस्तस्मै नित्यं नमो नमः।।30।।
यमश्चाञ्जनवर्णाभः[23] [24]पुरुषो दण्डभृन्महान्।
धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः।।31।।
निर्ऋतिः पुरुषश्चास्मि सर्वरक्षाधिपो महान्।
खड्गहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः।।32।।
वरुणः शबलो जिष्णुः पुरुषो निम्नगाधिपः।
पाशहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः।।33।।

---

19. विधाय-ख
20. पूजाद्विरार्चनम्-ख
21. चैश-क, सौम्योशान्ये त्र्यम्बकम्-ग
22. देवमया महान् व्ययः-क
23. पर्णाभिः-क
24. पूरुषो-ख

पीतवर्णो महावायुः सर्वगन्धवहः शुभः।
पुरुषो ध्वजहस्तश्च तस्मै नित्यं नमो नमः।।34।।
पुरुषश्च गदाहस्तः श्वेतवर्णो [25]महाबलः।
नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः।।35।।
ईशानः कपिलः शुद्धः सर्वविद्याधिपो महान्।
शूलहस्तो विरूपाक्षः तस्मै नित्यं नमो नमः।।36।।
[26]अधिवासोदितैर्द्रव्यैः पूर्णां मूलेन दापयेत्।
आहूय स्नापयेत् पीठे सम्पातकलशैः पृथक्।।37।।
हविषा पात्रलग्नेन सम्पूज्य विकिरेद्बलिम्।
सर्वेषां स्वस्वगायत्र्या पक्वहोमो[27] विधीयते।।38।।
द्रव्यहोमं स्वमूलेन पूर्णं चैव विजानता।
मूलेन स्थापनं प्रोक्तं पूजां मूलाङ्गलोकपैः।।39।।
देवस्य परिवाराणां निवेद्यं बलिमेव च।
तृतीयदिवसे रात्रौ स्थापितस्य जगत्पतेः।।40।।
पञ्चविंशतिभिर्द्रव्यैः सम्पूज्य कलशान् गुरुः।
पञ्च वा नव वा होमं जुहुयुर्गुरुमूर्तिपाः।।41।।
सेचयेत्कलशेष्वाज्यं[28] द्रव्यैः सप्तदशैस्तु वा।
द्वारं च वायुनोद्घाट्य निर्माल्यमपनीय च।।42।।
तैलस्नानं पुरा कृत्वा पीठमभ्यर्च्य शूलिनः।
आवाह्य सकलीकृत्य ध्यात्वा ध्यानं [29]पुरोदितम्।।43।।
अङ्गन्यासं पुनः कृत्वा पाद्यमर्घ्यं प्रदाय च।
मधुपर्कं च सिद्धार्थान्मूर्ध्नि दूर्वाक्षतैः सह।।44।।

---

25. महाजलः-ख
26. अग्निवासोदितै-ख
27. पक्वगोमो-क
28. द्वाभ्यां-क
29. परोदितम्-ख, ध्यात्वा ध्वानं पुरोदितम्-ग

न्यस्त्वा शिष्यैस्तु कलशा[30] नानीयानीय देशिकः।
[31]संस्नाप्योद्वर्त्त्य वस्त्रेण भूषयित्वा समर्चयेत्।।45।।
उत्सवं तीर्थयात्रां च सर्वं कुर्यादनन्तरम्।
लिङ्गं यदि भवेज्जीर्णं दग्धं पतितमेव वा।।46।।
चलितं [32]चालितं नष्टं स्फुटितं [33]शकलीकृतम्।
एवमादिविकारेषु लिङ्गोद्धारं समारभेत्।।47।।
पूर्वद्वारे तु पाश्चात्यद्वारमीशे गृहं भवेत्।
नैऋत्यां पश्चिमद्वारे प्राङ्मुखश्चानिले तु वा।।48।।
विभक्ते [34]सुषिरैर्लिङ्गे भवने [35]पूर्वनिर्मिते।
अल्पलिङ्गं[36] नवं गेहं भूतांशैः परिकल्पयेत्।।49।।
वेश्ममण्डपयोश्शुद्धिर्भूषणानि च पूर्ववत्।
रत्नन्यासादिसकलं मुक्त्वा संस्थाप्य [37]पच्छिलाम्।।50।।
लिङ्गं संशोध्य संस्थाप्य तद्रूपां पीठिकामपि।
मूलप्रासादमासाद्य शोधयित्वा गुरुः स्वयम्।।51।।
रक्षोघ्नं वास्तुहोमं च कृत्वा [38]वास्तोर्बलिं पुनः।
स्वदक्षिणे महादेवं यथा दीक्षाविधौ शिशुम्।।52।।
[39]कल्पयित्वाऽग्निमुत्पाद्य तत्त्वहोमं लयक्रमात्।
हुत्वा सञ्छिद्य कलशैश्शिवतत्त्वन्नियोजयेत्।।53।।

---

30. कलशानानीयानि च-क
31. सुसंस्नाप्योद्वत्र्य-क
32. चापि तन्नष्टं-ख
33. शकठीकृतम्-क
34. सुतरोल्लङ्गं-ख
35. भवनं पूर्वनिर्मितम्-ख
36. अल्लिंगं-क
37. वच्छिला-क, विन्यस्य पच्छिलाम्।
38. वास्तुबलिं-ख, ग
39. कल्पयेत्-क

यात्राहोमं पुनः कृत्वा दक्षिणे पुरतोऽपि वा।
[40]कनिकर्मादि [41]षड्भिस्तु [42]घृतं स्वस्त्यादिपञ्चभिः।।54।।
पुंसात्र समिदादीनि [43]पक्वं सर्वत्र तेन हि।
अक्षतोपरि कूर्चेषु स्थापयेत्कलशं विभोः।।55।।
अग्रे हिरण्मयं स्निग्धमष्टरत्नाम्बुपूरितम्।
सर्वाध्वसंयुतं तस्मिन् ध्यात्वा देवं प्रपूजयेत्।।56।।
तारं नादं च पञ्चार्णं व्योमव्यापि दशाक्षरम्।
व्योमव्यापि शिवं साङ्गं साङ्गं हि ब्रह्मपञ्चकम्।।57।।
एवं मन्त्रगणं जप्त्वा वस्त्राभ्यां [44]वेष्टयेद् घटम्।
कृत्वैवमथ निष्क्रम्य कर्ता कृत्वा प्रदक्षिणम्।।58।।
देवं विप्रान्नमस्कृत्य शनैर्विज्ञापयेदिदम्।
मन्त्रलिङ्गमिदं शम्भोःस्थापितं पूर्वसूरिभिः।।59।।
अनेन दूषणेनाद्य[45] दूषितं त्वेह[46] वर्तते।
दुष्टलिङ्गस्य चोद्धारः कर्तव्य[47] इति शासनम्।।60।।
आगमस्य[A] वयं कर्तुं व्यवसायमुपास्महे।
तत्रैवं यदि कर्तव्यमागमार्थतया भवेत्।।61।।
भवन्तो नोऽनुजानन्तु[48] [49]भवेदाज्ञाकरा वयम्।
क्रियतामिति [50]निश्शङ्कमनुज्ञातो द्विजोत्तमैः।।62।।

---

40. तानि क्रमानि-क
41. पद्भि-क
42. व्रत-क
43. सत्त्वं-क
44. रिवेष्टयेत्-क
45. दूषणेनामन्यद्दूषितं-क
46. चेह-ख, ग
47. चोद्धारं कर्त्तव्यमिति-क, ग। A. लयं-ख
48. राजानं तु-क
49. भूपमाज्ञा-क
50. निश्शङ्काम्-ख

निवेदयेत्पुनश्चै[51] तत्तेभ्यो लोकहितेच्छया[52] ।
[53]यथैवं देवपूजायां विनियुक्तमनिन्दितम्।।63।।

द्रव्यं पुष्पादिकं [54]पश्चान्निर्माल्यमिति निन्द्यते।
एवं लिङ्गम[55]दुष्टं यत् पूजायां विनियुज्यते।।64।।

तदेव दूषितं पश्चान्निर्माल्यमिति निन्द्यते।
तस्माद्दुष्टमिदं लिङ्गं भवद्भिर्मुक्तसंशयैः।।65।।

निर्माल्यबुध्या त्यक्तव्यमिति शास्त्रस्य शासनम्।
[56]ततश्चाघोषयेयुस्ते ब्राह्मणा[57] मुक्तसंशयाः[58]।।66।।

कर्ता चाभिहितं कालं व्रतं तस्यातिभीषणम्।
ब्राह्मणानामनुज्ञां च मूर्ध्नादाय गृहं व्रजेत्।।67।।

जीर्णंलिङ्गमिदं देवं सर्वदोषावहं[59] नृणाम्।
अस्योद्धारे [60]कृते शान्तिरित्येवं भाषितं त्वया।।68।।

तत्त्वयाधिष्ठितो देव [61]उद्धरामिति चाज्ञया।
तदुपक्रान्तमस्माभिस्त्वमनुज्ञातुमर्हसि।।69।।

अभिषिच्य लयं ध्यायंस्तत्त्वकुम्भोदकेन[62] तम्।
तस्माज्ज्योतिर्मयं[63] तत्त्वं महाकुम्भे नियोजयेत्।।70।।

---

51. चेदं-ख, ग
52. हितेप्सया-ख
53. तथैव-ख
54. पश्यन्-क
55. लिङ्गमदृष्टं-ख
56. तत्राघोषयेयुस्ते-क
57. ब्रह्मणं-क
58. मुक्तशंशयम्-ख
59. सर्व दोषापहं-ख
60. तु ते-क
61. अद्भुतासि-ख
62. कुम्भेदयेन-ख
63. ज्योतिर्मुखं-ख

तत्र बद्धासनो मौनी प्राङ्मुखो वाप्युदङ्मुखः।
प्रणवाद्यन्तरुद्धैस्तु बीजनादान्तदीपितैः।।71।।
पञ्चब्रह्माभिरेकैकमावाहनविधिर्नयेत्।
लिङ्गात्प्राकारपर्यन्तां भूमिं ध्यायेद्गुणात्मिकाम्।।72।।
तं[64] चैव [65]गुणबीजेन लिङ्गबिम्बा[66]त्मके नयेत्।
वागुरेण यथा मत्स्यान् पुनर्बिन्दुं [67]रवात्मनि।।73।।
नादं शक्त्या पुनः [68]शक्तिं विलाप्य परमात्मनि।
छित्वा[69] ज्ञानकुठारेण तत्परं कलशे नयेत्।।74।।
ततः सूक्ष्मशरीरस्थं भावयित्वा घटे यजेत्।
शङ्खतूर्यादिनिर्घोषैः गच्छेदादाय शङ्करम्।।75।।
गेहं प्रदक्षिणीकृत्य मूर्ध्नि संस्थाप्य तद्घटम्।
मण्डपे शयने स्थाप्य सकलीकृत्य पूजयेत्।।76।।
नव वा पञ्च वा तत्र होममेकमथापि वा।
अभिषेकविधानेन [70]जीवावाहनकर्मणि।।77।।
लिङ्गे नियोज्य पूर्वोक्तमर्चनादिकमाचरेत्।
सङ्क्रान्तस्य विनाशेऽपि कर्तव्यं मूलनाशवत्।।78।।
सौवर्णलाङ्गलाग्रेण वज्रलेपं विमुच्य च।
पीठिकामपि लिङ्गं च पच्छिलां रत्नमेव च।।79।।
गो वा रज्वा समं [71]बध्वा मन्त्रैरावाहनोदितैः।
उद्धृत्य होतृभिश्चाप्सु होमयेदनलेऽपि[72] वा।।80।।

---

64. तां-क
65. गणबीजेन-क
66. लिंगे विद्यात्मके-ख
67. पुनर्विन्दुरपात्मनि-क
68. शक्ती-क
69. हित्वा-क
70. जीवावहनकर्मणि-ख
71. सम्बध्य-क
72. दनिले-क

ब्राह्मणान्भोजयेत्पश्चात्तेभ्यो दद्याच्च दक्षिणाम्।
पूर्ववत्सर्वमुत्पाट्य शयने शाययेच्छिवम्।।81।।

पूर्ववत्सकलं कृत्वा कुम्भे संयोज्य पूर्ववत्।
शिरस्थाने तु लिङ्गस्य शयने स्थापयेद्घटम्।।82।।

[73]अधिवासनिकान् होमान् कृत्वा पृष्ठे नयेद् घटम्।
[74]जीवावाहनकाले तु जीवद्भिरभिषेचयेत्।।83।।

कृत्वा[75] दिशाहोममनन्तरञ्च
प्रासादबाह्ये भुवि दक्षिणस्याम्।
बह्निं समुत्पाद्य च पञ्चकुण्डे-
ष्वाचार्ययुक्तां जुहुयुः क्रमेण।।84।।

चतुरश्रं धनुर्वक्त्रं वृत्तं पङ्कजसन्निभम्।
दिक्क्रमाद्धिहरेद्वह्नि[76]मुपस्थाय [77]शिवानलम्।।85।।

अग्निं दूतमिति प्राच्यामग्निना रयिमित्यृचा।
त्वमग्ने द्युभिरित्येवमग्निमग्निं ततोत्तरे।।86।।

पक्वं च जुहुयुः सर्वे पूर्ववन्मुखविद्यया।
ईशानाद्यैस्त्रिसाहस्रं हुत्वा तैर्बह्वभिर्घृतम्।।87।।

समिधः क्षीरिणां दिक्षु मध्ये [78]पालाश्य एव हि।
ततः समिद्घृतव्रीहितिललाजसहस्रकम्।।88।।

क्रमात् पञ्चाक्षरेणैव जुहुयुः सर्व [79]एव ते।
पालाशीनां घृताक्तानां समिधां [80]द्वादशोत्तरम्।।89।।

---

73. अधिवासनकान्-ख
74. रज्वावाहन-क
75. रुद्धा-क
76. दृग्भिरुपस्थाय-ख
77. च पावकम्-ख
78. पालाश्च-क
79. सर्ववह्निषु-ख
80. च दशोत्तरम्-क

जुहुयुश्च शतं सर्वे पूर्णां [81]द्रव्यान्तरं तथा।।90।।
क्षीरेण दध्ना मधुना घृतेन
साष्टाधिकं तेषु शतं शतं च।
[82]सावित्रिया चैव समाप्य होमं
सम्पातमाज्यं च समर्पयेच्च।।91।।
कुम्भेषु तेषामपि दक्षिणां च
दत्वा च कुम्भैरभिषिच्य देवम्।
भूयोऽभिषेकं च [83]महोत्सवं च
तीर्थाभिषेकं सकलं विदध्यात्।।92।।
यस्यां दिशि समाश्रित्य तिष्ठेल्लिङ्गं प्रतिष्ठितम्।
तां तां शान्तिं पुनः कृत्वा तां तां दद्याच्च दक्षिणाम्।।93।।
[84]अधस्ताद् गमिते लिङ्गे शान्तिमीशेन गोपतिम्।
दद्याच्चगुरवे पुंसां पूर्वे मातङ्ग[85]मण्डलम्।।94।।
सुवर्णं हृदयेनाग्नौ घोरेण महिषीं यमे।
[86]शिखामन्त्रेण नैर्ऋत्यां गजं सद्येन वारुणे।।95।।
मुक्ताफलं हि वायव्यां पित्तलं वर्मणा च गाम्।
सोमे वामेन रौप्यं च दक्षिणा शिरसा शिवे।।96।।
समं संस्थाप्य पूर्वोक्तं कारयेत्सकलं पुनः।
[87]भग्नं यदि समुद्धृत्य गजेनाप्सु विनिक्षिपेत्।।97।।
[88]पक्षमन्त्रेण सन्दह्य प्रतिष्ठां [89]पुनराचरेत्।
पीठिकाया विनाशे तु कुम्भे चावाह्य पूर्ववत्।।98।।

---

81. द्रव्यान्तरे-ख
82. सावित्र्या-ख
83. सहोत्सवं-ख
84. अथस्ताद्-ख
85. मातङ्गमुज्ज्वलं-ख
86. शिवा-क
87. भग्ना-ख
88. वाक्ष-क
89. पुनरारभेत्-ख

पीठिकां स्थाप्य संशोध्य बन्धयित्वाभिषेचयेत्।
एकं वाप्यथ वा पञ्च प्रायश्चित्तानि कारयेत्।।99।।
अष्टबन्धे विशीर्णे तु लिङ्गे संयोज्य [90]तद्गताम्।
बन्धयित्वा च तां शक्तिं पूर्ववत्परिकल्पयेत्।।100।।
[91]अल्पगेहगते लिङ्गे पूर्ववत्तन्नियोज्य च।
प्रासादं पूर्ववत्कृत्वा [92]लिङ्गमुद्धृत्य पूर्ववत्।।101।।
शुद्धौ कृतायामाहूय मूललिङ्गेऽभिषेचयेत्।
विनाशे सन्निधानस्य तत्र कुर्यान्न विक्रियाम्।।102।।
यात्राहोमं पुरा[93] कृत्वा संयोज्य कलशे शिवम्।
कुम्भं तु शयने स्थाप्य संहृत्योत्पाद्य शङ्करम्।।103।।
षडध्वन्याससंयुक्तं कृत्वा तत्राधिवासनम्[94]।
वेश्मशुद्धिं पुराकृत्वा लिङ्गशुद्धिं यथाविधि।।104।।
पुनः शिवं [95]घटाद्भिस्तु जीवेन सह [96]सेचयेत्।
दिशाहोमादि कर्तव्यं यावत्तीर्थाभिषेचनम्।।105।।
एकरात्रं तु कलशे त्रिरात्रं हृदये गुरोः।
तदूर्ध्वं कौतुके मासं पक्षत्रयमथापि वा।।106।।
मासादूर्ध्वं द्वादशाब्दादर्वाक् चैवाल्पमन्दिरे।
मूले तु द्वादशाब्दं तु विभोः सङ्कोचमिच्छति।।107।।
तदूर्ध्वं सर्वगं ध्यायेदशक्तः कर्तुमञ्जसा[97]।।108।।

**इति श्रीपाशुपते नन्दिप्रोक्ते दशमः पटलः॥**

90. तद्गदाम्-ख
91. अष्ट-क
92. लिङ्गादुद्घृत्य-क
93. पुनः-ख
94. तत्राधिवासने-ख
95. वटाद्भिस्तु-क
96. वेनः सह नियोजयेत्-क
97. 'ग' मातृकायामस्य दशमपटलस्याऽनेके श्लोकाः अष्टमपटले प्राप्यन्ते।

# अथैकादशः पटलः

## नन्दिरुवाच

उत्पातेषूपजातेषु भूयो दोषैश्च दूषिते।
प्रायश्चित्तानि वक्ष्यामि शुद्धिं च स्थानलिङ्गयोः।।1।।
प्रासादस्थे मृते वापि [1]प्राङ्गणे रुधिरोत्क्षिते[2]।
प्रसूते [3]पुष्पिते स्त्रीणां संयोगे श्लेष्मपातने।।2।।
[4]श्वशृगालादिदुष्टानां जननं मरणं तथा।
एवमादिभिरन्यैश्च दूषिते भगवद्गृहे।।3।।
न पूजयेच्छिवं देवमकृत्वा निष्कृतिं बुधः।
अधोरास्त्रेण तां [5]भूमिं खात्वा हस्तप्रमाणतः।।4।।
पांसून् सङ्गृह्य[6] पात्रेऽस्मिन् नैर्ऋत्यां प्रक्षिपेद्बहिः।
अधोरास्त्रेण सन्दह्य दर्भान् निक्षिप्य चावटम्।।5।।
पुनः संशोध्य गोमूत्रैर्विप्रपादोदकैः शुभैः।
पञ्चगव्यैस्तु सम्पूर्य कृत्वा वै गोनिवासनम्।।6।।
[7]नादेयीं कुशमूलस्थां क्षेत्रजां पार्वतीं मृदम्।
आदाय मृद्भिः सम्पूर्य तत्र कृत्वा तु मण्डपम्।।7।।

---

1. प्राङ्कणे-क, ख, ग
2. रुधिरोषिते-ख
3. पूष्पितै-ख
4. सृगालादि-क, ख
5. भूयः-क
6. संहृत्य-ख, ग
7. अत्र 5-7 श्लोकाः 'क' मातृकायां कीटदंशाः सन्ति।

एकादशापरान्विप्रान् भोजयेद्धृतपायसम्।
उच्छिष्टं तत्र निक्षिप्य निरस्यैवोपलिप्य च।।8।।

अघोरास्त्रेण सम्मार्ज्य गोमयेनोपलिप्य च।
सिद्धार्थान्विकिरेत्तेन गव्यैः सम्प्रोक्ष्य पञ्चभिः।।9।।

लिखित्वा पङ्कजं तत्र शिवं साङ्गं प्रपूजयेत्।
प्रासादं तन्तुनावेष्ट्य भूषयित्वा [8]समर्च्य च।।10।।

रक्षोघ्नं वास्तुहोमं च तद्बलिं चाङ्कुरार्पणम्।
ध्वजं संस्थाप्य लिङ्गस्य शुद्धिं कुर्यात्तु देशिकः।।11।।

एकविंशतिदर्भैस्तु कृत्वा मुष्टित्रयं पुनः।
आलभेत्सप्तधा [9]तूष्णीं भूयो घोरेण सप्तधा।।12।।

पुनः पाशुपतास्त्रेण सपीठं [10]क्षालयेज्जलैः।
[11]तल्पं मृदा त्रिधालिप्य [12]त्वक्पिष्टैर्भस्मना तथा।।13।।

[13]ततो द्रव्यैः समायुक्तं सलिलैःक्षालयेत्पृथक्।
निर्दिष्टं क्षालनं [14]पात्रं कुशोपरि निधाय च।।14।।

गन्धपुष्पाक्षतकुशैः सकूर्चं पूरयेज्जलैः।
निधायाभ्यर्च्य सम्पूज्य प्लावयेत्तैरमन्त्रकम्।।15।।

एवं हि प्लावनं प्रोक्तमेवं सम्पूर्य तां स्मरेत्।
आदायादाय पात्रेण स्नापयेच्छान्तिवारिभिः।।16।।

एवं कृत्वा कुशाग्रैस्तं [15]प्रोक्षयेयुश्च मूर्तिपाः।
अब्लिङ्गैः पावमानीभिः ब्रह्मभिश्चाथ होतृभिः।।17।।

8. समर्प्य-ख
9. तुष्टिं-ख
10. शालयेज्जलैः-क
11. तद्वन्-ख
12. तच्छिष्टै-ख
13. तत्तद्-ख
14. प्रोक्तं-क
15. प्रक्षयेयुश्च-ख

दधि च मार्जनं प्रोक्तं पुनर्धारां वदामि ते।
संस्थाप्य तैजसं पात्रमैशान्यां धान्यराशिषु।।18।।
पीठन्यासक्रमेणैव पूरयेद् गालितोदकैः।
सौवर्णौ सुशुभौ मत्स्यौ राजतौ वापि कच्छपौ।।19।।
समृणालां सपुष्पां च [16]सवर्णां [17]पद्मिनीं क्षिपेत्।
आवाह्य वरुणं तस्मिन् साङ्गावरणमर्चयेत्।।20।।
ध्रुवा सुत्वेति मन्त्रेण मन्त्राङ्गानि प्रकल्पयेत्।
क्षीरिणां वेदपादस्थं [18]धारापात्रं तु लोहजम्।।21।।
हेम्ना सम्बध्य सुषिरं स्थापयेत् प्रतिमोपरि।
कूर्चं विन्यस्य वेदाद्यैः पादानिष्ट्वा समाहितः।।22।।
तारेण पात्रमभ्यर्च्य पूरयेद्वारुणेन हि।
वारुणात्तोयमादाय पात्रात्पात्रेण देशिकः।।23।।
धाराच्छिद्रा तु कर्तव्या [19]याममात्रं दिने दिने।
न चाल्यं वारुणं पात्रं त्रिरात्रं यत्र जप्यते।।24।।
हृत्वाम्भः पुनरापूर्य धारा भूयः प्रकल्पयेत्।
प्रणवव्याहृतीः सप्तगायत्रीं च शिरोयुताम्।।25।।
वेदादींश्च सकृद्रुद्रं स्पृष्ट्वा दर्भाग्रपाणयः[20]।
होतारं पावमानं च जपेयुर्दर्भपाणयः[21]।।26।।
उद्वास्य वरुणं चान्ते देवमीशं समर्चयेत्।
कोशं वाक्षं प्रतिष्ठाय माषपिष्टेन बन्धयेत्।।27।।
गव्यैर्व्यस्तैः [22]समस्तैश्च गन्धतोयैर्दिने दिने।
अवगाहं प्रकर्तव्यं जपहोमसमन्वितम्।।28।।

---

16. सपर्णा-क
17. पद्मिनीति चेत्-क
18. धारापातं-ख
19. चात्ममात्रे-क
20. वारिणा-क
21. दर्दु-क

तारन्नादं च पञ्चार्णं व्योमव्यापि शिवं पुनः।
पञ्चब्रह्मात्मकं मन्त्रं रुद्रमेकादशापरम्[23] ।।29।।
शतञ्च जुहुयादाज्यं बह्निभिः समिदादिकम्।
बहुरूपेण होतव्यमष्टाधिकशतं शतम्।।30।।
निर्माल्यमपनीयाभिः क्षालयित्वा यजेच्छिवम्।
कलशान्पूरयेत्पञ्च दिक्क्रमाद्ब्रह्मपञ्चभिः।।31।।
तैरेव स्नापयेदीशमभिषेकमिति [24]स्मृतम्।
[25]शुद्धिरेवं कृते जाता सर्वदोषैश्च दूषिते।।32।।
एवं कृतेऽल्पलिङ्गान्तामाहूय स्थाप्य पूजयेत्।
प्रायश्चितं ततः कुर्याद्वेदाध्ययनमेव च।।33।।
खण्डेषु [26]सदृशे कुण्डे दक्षिणस्यां हि वेश्मनः।
शाङ्करं वह्निमुत्पाद्य कृत्वा चाग्निमुखं गुरुः।।34।।
पञ्चतारान्पुरोऽनूच्य पक्वं वक्त्रेण होमयेत्।।35।।
औदुम्बरोत्थाः समिधः सहस्त्रं
हुनेदघोरेण घृतावसिक्ताः।
भूयोऽप्यपामार्गसमित्सहस्त्रं
सद्येन वामेन [27]घृतं सहस्त्रम्।।36।।
[28]पत्रेण चान्नैः जुहुयात्सहस्त्र-
मन्यांश्च सर्वान् जुहुयाच्च [29]पुंसाम्।।

---

22. समस्तेन-क
23. मेकादशावरम्-ख
24. विधि........ता-क
25. शुद्धिमेवं-ख
26. सदृशात् कुण्डं-क
27. वृतं-क
28. वक्त्रेण-ख, वस्त्रेण-ग
29. पुंसा-ख, तेन-ग

तिलान्विशुद्धान्सितसर्षपांश्च
मुद्गांश्च शालींश्च यवान्क्रमेण।।37।।
शतं शतं चाष्टयुतं सहस्त्रं
दूर्वात्रिकैः स्तन्य[30] घृतावसिक्तैः।
मृत्युञ्जयेन दधिमाक्षिकमाज्यमग्नौ,
प्रत्येकमष्टसहितं जुहुयाच्छतं च।।38।।
होमं समाप्य कलशेषु निषिच्य [31]गव्यं
मन्त्रैरमीभिरुदितैः स्नपयेदुमेशम्[32]।
अन्नाद्यमुच्चैरनिवारितञ्च
दत्त्वा च दत्त्वा गुरुदक्षिणाञ्च।।39।।
सम्पूज्य हुत्वा विकिरेद्बलिं च,
रात्रौ गणेभ्यो विकिरेद्बलिं च।।40।।
छत्राकमधुबाल्मीकस्वेदकीटादिसम्भवे।
दग्धे वाशनिना वापि क्रूरपक्षिमृगाकुले।।41।।
प्रायश्चित्ते त्वविज्ञाते चिरलुप्ते च पूजने।
अद्भुतेषु समस्तेषु शान्तिमीशे शिवानले।।42।।
पक्वं हुत्वा स्वगायत्र्या पीठाख्यमनुभिः क्रमात्।
प्रासादेन च पञ्चार्णैः व्योमव्यापि[33] शिवेन च।।43।।
स्वस्वाङ्गैर्ब्रह्मभिश्चाङ्गैः विद्याधिपगणेश्वरैः।
दिशाधिपैस्तदस्त्रैश्च स्वाहात्मप्रणवादिकैः।
नामभिर्जुहुयादाज्यं ततः पुंसा चतुर्दश।।44।।
द्रव्याण्यपि सहस्त्रं वा [34]शतमष्टाधिकं क्रमात्।
समिद्भिः क्षीरिणामाज्यै[35] रत्नैश्च मधुरप्लुतैः।।45।।

30. स्तेन-क, ग
31. हव्यं-क
32. बलिं च-क
33. मध्यापि-क
34. शतं वाष्टाधिकं-ख
35. माज्य मन्यैश्च-क

[36]दूर्वाभिर्लाजसिद्धार्थैः तिलैश्च यवशालिभिः।
सक्तुभिश्च घृतैरेवं हुत्वा होमं समापयेत्।।46।।
सम्पातकलशेनेशं [37]स्नाप्य सम्प्रोक्षयेत्स्थलम्।
यत्र मध्वादिसम्भूतं दक्षिणाङ्गं [38]सतर्णकाम्।।47।।
'यत इन्द्रादि'मन्त्राभ्यां पक्वं द्वाभ्यां तु होमयेत्।
'वास्तोष्पते वास्तोष्पते' 'शन्नो देवी'रितीत्यृचा।।48।।
'इन्द्राग्नी रोचना भूयः' 'कयानश्चित्र' इत्यपि।
'को अद्य युङ्क्ते'ति हुत्वा 'भवतन्न' [39]इतीत्यृचा।।49।।
षड्भिः कनिक्रदाद्यैश्च भूयः स्वस्त्यादि [40]पञ्चभिः।
वास्तोष्पते ध्रुवेत्याद्यैष्षड्भिर्जातादिपञ्चभिः [41]।।50।।
जातवेदादिभिस्तावच्छन्नवगैश्च पौरुषैः।
व्याहृतीभिः क्रमाद्धुत्वा सम्पातविधिना घृतम्।।51।।
ततो ब्रह्मसमिच्चान्न[42]लाजसिद्धार्थकांस्तिलान्।
यवान्मुद्गान्क्रमादेतैः पृथगाज्यान्तरे हुनेत्।।52।।
[43]हुत्वा चतुर्दशद्रव्यैरष्टोत्तरशतं पृथक्।
होमं समाप्य तस्याग्रे शमीपर्णेषु दापयेत्।।53।।
हुतशेषं विधानेन 'शन्नो देवी'रिति ब्रुवन्।
हुतमन्त्रैश्च संस्नाप्य सम्पातकलशेन तम्।।54।।
प्रोक्षयित्वा च तत्स्थानं दक्षिणां गां प्रदाययेत्।
महद्बहुषु चाग्रेषु निमित्तेषु भयं स्मृतम्।।55।।

---

36. पूर्वाभिर्वाज-क
37. स्थाप्य-ख
38. दक्षिणां सकर्णकाम्-क
39. भक्तन्नयीति क्रमात्-ख
40. चाष्टभिः-ख
41. एषा पङ्क्तिः 'क' मातृकायां नास्ति।
42. राज-ख
43. पुंसा-ख

[44]अल्पमेकतमं वापि प्रायश्चित्तमथानयोः।
एकं वाप्यथ वा पञ्च पूर्वोक्तमतिदारुणम्[45] ।।56।।

सर्वदोषविनाशाय सान्निध्यकरणाय च।
[46]शिवादीन् [47]सम्यगुद्वास्य सर्वतत्त्वैस्तु होमयेत्।।57।।

[48]तत्त्वसम्पातकुम्भा[49]द्भिरभिषिच्य सुरेश्वरम्।
पूजयित्वा निवेद्यान्नं हुत्वा विप्रांश्च भोजयेत्।।58।।

दक्षिणां गुरवे दत्वा महास्नपनमारभेत्।
तन्तुवेष्टनमारभ्य यावद्भूमिपरिग्रहम्।।59।।

कृत्वा सूत्राणि चास्फाल्य[50] पदानि परिकल्पयेत्।
विभज्य सप्तधा क्षेत्रं चतस्रो वीथयोऽर्पयेत्।।60।।

मध्ये नवपुटैः पद्ममेकैकं दिग्विदिक्षु च।
तेषु सप्तदशद्रव्यैः शुद्धोदकसमन्वितैः।।61।।

पञ्चविंशतिभिर्द्रव्यैः कुम्भान् संस्थाप्य पूरयेत्।
दिक्षु त्रिकं विदिक्ष्वेकं नवान्तं [51]पञ्चविंशकम्।।62।।

ततः सप्तदशद्रव्यैः शुद्धोदकसमन्वितैः।
पञ्चविंशतिभिर्द्रव्यैः केवलैर्वा प्रपूरयेत्।।63।।

सर्वत्र मध्यखण्डस्थपटैः सङ्कल्प्य पङ्कजम्।
व्यत्ययात् पञ्च [52]वर्णैस्तु पदानि परिशोभयेत्।।64।।

---

44. अद्वेक्ष्येकतमं-क
45. दारुणे-ख
46. शिवाधीं च-क
47. समुत्पाद्य-क
48. ततस्-ख
49. कुम्भाभिः-ख
50. चास्थाप्य-क
51. नवान्तः पञ्चविंशकौ-क
52. पञ्च पञ्चार्णैस्तु-क

[53]ब्रीहिभिः पीठिकां कृत्वा कर्णिकायां च तण्डुलैः।
अखण्डिताग्रौ निर्गर्भौ कुशौ हस्तेन[54] विन्यसेत्।।65।।
अस्त्रेण [55]क्षालयेत्पात्रं [56]वर्मणावेष्ट्य तन्तुना।
गन्धेनालिप्य सन्धूप्य सादयेत्तानधोमुखान्।।66।।
वह्निमुत्पाद्य हुत्वाज्यं नरेणाष्टाधिकं शतम्।
सम्पाताज्येन तान्सिक्त्वा दर्भानुपरि विन्यसेत्।।67।।
शुद्धाद्भिः प्रोक्षयेत्सर्वा'नापोहिष्ठादिभि'स्त्रिभिः।
निरस्य दर्भान् सन्दश्य कुम्भमुद्रां हृदा पुनः।।68।।
उत्तानीकृत्य विन्यस्य पृथक्कूर्चाननन्तरम्।
अथ बद्धासनो मौनी प्राङ्मुखो वाप्युदङ्मुखः।।69।।
सोष्णीषः सोत्तरीयश्च कृतन्यासःस्वलङ्कृतः।
पीठमभ्यर्च्य गन्धाद्यैः शिवकुम्भं प्रपूरयेत्।।70।।
आवाह्य सकलीकृत्य मूर्त्त्यङ्गपरिवारकैः।
सम्यक् समं[57] समभ्यर्च्य वस्त्राभ्यां वेष्टयेद्धटम्।।71।।
सौवर्णान् राजतांस्ताम्रान् मृण्मयांश्च घटान्नवान्।
आढकीजलसम्पूर्णान्निर्व्रणान्पूरयेत्क्रमात्।।72।।
सम्पूरितान्ततः [58]सद्यः पल्लवैश्चोपशोभयेत्।
अपिधायाक्षतोपेतचक्रिकाभिः[59] पृथक् पृथक्।।73।।
वस्त्रैः [60]संवेष्टयेत् सर्वान् खण्डशः केशवर्जितैः।
हृत्स्थायी[61] भगवाञ्छक्त्या व्याप्य सर्वत्र संस्थितः।।74।।

53. लिङ्गिभिः-क
54. हंसेन-क
55. भालयेत्-क
56. चर्मणा-क
57. सह-क
58. पूरितान्पूरितात्-क
59. पतिताभिः-क
60. संवेष्ट्य-क
61. हृत्स्थोऽपि-ख

सर्वाध्वपञ्जरे देहे तथा मध्यघटे स्थितः।
स्वकीयरश्मिजालाख्यमूर्त्यङ्गपरिवारितैः[62] ।।75।।
भावनारूपभेदेन पृथक् कुम्भेषु संस्थितः।
अर्चयेत् गन्धपुष्पाद्यैः कलशेषु च तं पृथक्।।76।।
[63]रक्तपुष्पाष्टगन्धाद्भिः पूरयेन्मध्यमं पुरा।
पञ्चगव्यं बहिः प्राच्यामाग्नेय्यां क्षीरमेव च।।77।।
याम्यायां दधि नैर्ऋत्यामाज्यं क्षौद्रं तु वारुणे।
रत्नोदकं च वायव्यां सौम्ये कौशं तु शाङ्करे।।78।।
गन्धोदकं[64] च जलधीनन्तः पद्मदलेष्वपि।
क्षारं गोलं सुरामाज्य दध्याख्यं क्षीरसञ्ज्ञकम्।।79।।
स्वा(दू)दं गर्भजलधिं प्रादक्षिण्येन पूरयेत्।
ईशानश्चाथ सावित्री सोमो रुद्रो हुताशनः।।80।।
स्कन्दश्च धनदस्सप्त ऋषयो जम्भकान्तकाः।
वरुणो जलधीनां हि देवताः परिकीर्तिताः।।81।।
स्मर्तव्या द्रव्यविन्यासे क्रमात्कुम्भेषु देवताः।
सद्यादि ब्रह्मभिर्गव्य'माप्यायस्वे'ति वै पयः[65] ।।82।।
[66]'दधिक्राव्णो'ति वै दध्ना तेजो धीति सर्पिषा।
[67]'मधुना मधुवाते'ति रत्नाद्भिः स्थापयेत् पुनः।।83।।
'आसत्येन रजसे'ति देवस्य त्वा कुशाम्बुना।
'गन्धद्वारे'ति गन्धाद्भिः [69]सामुद्रैः स्नापयेच्छिवम्।।84।।

---

62. परिवारकैः-क
63. रत्नपुष्पाष्टगन्धाभिः-ख
64. शुद्धोऽदकं च-ख
65. एषापङ्क्तिः 'क' मातृकायां कीटेन दंशिता।
66. एषा पङ्क्तिः 'क' मातृकायां नास्ति।
67. 'क' मातृकायामेषा पङ्क्तिर्नास्ति।
68. कुशाम्बुभिः-ख
69. समुद्रैः-क

समुद्रज्येष्ठ[70] वर्गेण मध्यमं व्योमविद्यया।
आद्यन्तेषु च मन्त्राणां तारं पञ्चाक्षरं नयेत्।।85।।

पाद्यमाचमनं चार्घ्यं पञ्चगव्यं घृतं मधु।
क्षीरं दधि पुनश्चान्तं दिक्विदिक्षु प्रपूर्य च।।86।।

ऐक्षवं फलतोयं च कषायं सक्तुवारि च।
गन्धं पुष्पं सुवर्णं च रत्नाम्भो दिग्विदिक्क्रमात्।।87।।

मौक्तिकं विद्रुमं तोयं यावकं च तिलोदकम्।
दूर्वाम्भश्चोत्पलं कौशं [71]प्रोक्तं शान्त्युदकं क्रमात्।।88।।

पूर्ववत् ब्रह्मकुम्भं तु पूरयित्वा पुरान्पुनः।
दृशादि चान्तरालेषु जयन्तान्तं प्रपूरयेत्।।89।।

पूरणे द्रव्यविन्यासे मन्त्रं पञ्चाक्षरं स्मृतम्।
रत्नगन्धसुवर्णाद्भिर्मध्ये शान्त्युदकं न्यसेत्।।90।।

दूर्वाप्रवालसिद्धार्थैः पाद्यं [72]मृत्सागरे स्मृतम्।
लवङ्गजातितक्कोलद्रव्यैराचमनीयकम्।।91।।

कुशसर्षपदध्यम्बुयवक्षीरतिलाक्षतैः।
अर्द्धं मूत्राच्छकृच्चार्धं क्षीरं [73]सप्तगुणं दधि।।92।।

गुणाधिकं समं सर्पिरुद्दिष्टं गव्यपञ्चकम्।
कदलीबीजपूरा[74]म्रधात्रीपनसबिल्वजैः।।93।।

सनालिकेर[75]द्रव्योत्थैरष्टाङ्गं तु[76] फलोदकम्।
न्यग्रोधोदुम्बराश्वत्थपनसब्रह्मभूरु[77]हाम्।।94।।

70. ज्योति-क
71. मौक्तं-क
72. मृत्सागिरे-क
73. सप्ताधिकं-ख
74. नालिकेराम्र-क
75. भव्योत्थैः-ख
76. हि-ख
77. भूरुगाम्-क

शिरीषाम्रमधूकानां कषायं कथितं [78]त्वचम्।
सेव्यात्व्यम्बुजटास्रायोमुरशीतैस्तु गन्धकम्।।95।।
पद्मं सौगन्धिकं जातिमल्लिकाबकुलं तथा।
चम्पकं नन्दिकावर्त्तद्वयं च कुसुमोदकम्।96।।
मणिमौक्तिकगोमेदवज्रवैदूर्यनीलकम्।
पुष्परागेण रत्नाख्यं तोपं मरकतान्वितम्।97।।
ईशानः पितरस्वाहा वाक् सावित्री हुताशनः।
स्कन्दः सोमस्तथा रुद्रो दुर्गा देवी गजाननः।।98।।
विघ्नेश्वरो[79] पुनर्ज्येष्ठा जिष्णुर्विष्णुः पितामहः।
कुबेरो वरुणः सूर्यो वायू रक्षोद्यमा रमाः।।99।।
माभूः सप्तर्षयः प्रोक्ता विश्वेदेवाश्च देवताः।।100।।
शुद्धौ कृतायां भगवद्गृहं वा
देवस्य लिङ्गं कलशं स्पृशन्तः।
वेदैस्त्रिभिर्वाप्यथवा चतुर्भिः
द्विजोत्तमास्तत्र च [80]नादयेयुः।।101।।
कृत्वाधिवासं कलशेषु सिक्त्वा[81]
सम्पातमाज्यं परिपूज्य देवम्।
मध्यस्थदेवाय निवेद्य चान्नं
बाह्ये गणेभ्यो विकिरेद्बलिं च।।102।।
सम्मार्ज्यालिप्य रथ्यासु स्थापयेन्मङ्गलाङ्कुरान्।
नृत्तगीतजपस्तोत्रपुराणार्थकथादिभिः।।103।।
निशायां[82] जागरं कुर्युः प्रातस्तात्कालिकीमपि।।104।।

78. वचः-क
79. विघ्नेश्वराः-ख
80. नाम धेयः-ख
81. सिक्ता-क
82. निशाजागरणं-ख

अस्त्रेण लिङ्गं सलिलैः सपीठं
सङ्क्षाल्य पीठं परिपूज्य शम्भोः।
कृत्वा[83] च मन्त्रैः सकलीक्रियां च
दूर्वाक्षतानोमिति लिङ्गमूर्ध्नि।।105।।
गोमये[84]न दिशापानां कृत्वास्त्राण्युज्वलान्यपि।
न्यस्त्वाश्वत्थदले तानि ताम्रपात्रे[85] प्रविन्यसेत्।।106।।
शरावं नारिकेरं वा स्थाप्य मध्येऽक्षतोपरि।
[86]प्रज्वालयेयुर्दीपांश्च तेन नीराजयेच्छिवम्।।107।।
आनीयानीय कलशान् मूर्तिपैरभिषेचयेत्।
शिरीषपिष्टेनोद्वर्त्त्य क्षालयेत्स्नेहरञ्जिते।।108।।
द्रव्यान्ते द्रव्यमन्त्रेण तत्र शुद्धोदकान्वितैः।
सकलीकरणं कुर्यान्निवेद्य ध्यानमर्चनम्[87]।।109।।
नीराजनञ्च मूलेन खण्डशः प्रणवेन च।
पाद्येन स्नापयेत्पूर्वमिदं विष्णुरिति ब्रुवन्।।110।।
'आपः पुनन्त्वि'त्याचाम'मापो हिष्ठे'ति पश्चिमम्।
'अग्निमीले'ति वै गव्य'मिषे त्वे'ति घृतं पुपः।।111।।
'मधु वाताप्ययस्वे'ति 'दधिक्राब्ण'स्तथा दधि।
'कृत्वाग्ने' रसञ्चेक्षो'र्मानस्तोके' फलोदकम्।।112।।
'अश्वत्थे वस्'सुमित्राणं 'अग्न आयाहि' वैपरात्।
'पुष्पावतीः' पुष्पतोयं ब्रह्मजं ज्ञानमेव हि।।113।।
'हिरण्यवर्णा' रत्नाद्भिः पुनर्मुक्तोदकेन च।
'समुद्रज्येष्ठा' इत्येवं 'रक्षोगणेन' वैद्रुमम्।।114।।

---

83. दत्त्वा-ख
84. होमये न-क
85. कालमात्रे-क
86. तस्मिन् प्रज्वालयेद्-ख
87. 'क' मातृकायां 109-117 पर्यन्तं श्लोकाः न सन्ति।

ओषधीर्यावकं तैलं पितरस्सपितामहाः।
'श्रिये जात'स्तु दूर्वाद्भिरूत्पलाद्भिस्तु दुर्गया।।115।।
'देवस्य त्वा' शुश्शिशानो व्योमव्यापिक्रमेण तु।
अवस्रावितितोयेन स्नातव्याश्चाङ्गदेवताः।।116।।
दक्षिणां गुरवे कार्यं मूर्त्तिपेभ्यः पृथक् पृथक्।
आचण्डालान्तमन्नाद्यं सार्वजन्यं प्रदापयत्[४४] ।।117।।

**इति श्रीपाशुपते नन्दिप्रोक्ते एकादशः पटलः॥**

४४. 'ग' मातृकायां नवमपटले कतिपये श्लोका अस्यैकादशपटलस्य प्राप्यन्ते।

## अथ द्वादशः पटलः

### नन्दिरुवाच

एतैर्द्रव्यैः क्रियामद्भिर्बहुधा स्नापयेच्छिवम्।
तत्त्वदानां विधिं [1]वक्ष्ये त्वां सहस्रमितोर्ध्वतः।।1।।

षड्दिक्षु मध्ये नवकं कोणेषु च चतुष्टयम्।
पञ्चाशदेक[2]हीने तु क्षेत्रे नवपुटे नयेत्।।2।।

मध्ये नवपदैः पद्मं त्रिकमेकञ्च तद्बहिः।
एकादशपुटे बाह्ये त्रिकमेकं तु पूर्ववत्।।3।।

अन्तरालेष्वथैकैकं द्रव्याधिक्ये समीरितम्।
एकादशपुटे क्षेत्रे नवानां नवकं नयेत्।।4।।

दिक्षु त्रिकं विदिक्ष्वेकं नवान्तं दिग्विदिक्षु च।
षट्कं चतुष्टयं बाह्यं त्वन्तराले द्विकं द्विकम्।।5।।

एकाशीतिघटेष्वेवमष्टोत्तरशते पुनः।
पञ्चदशपुटे क्षेत्रे नवकोष्ठैरथाम्बुजम्।।6।।

त्रिकमेकञ्च परितो बाह्येन नवकाष्टकम्।
अन्तराले त्रिकन्त्वेवं कोष्ठैरेतैरथाचरम्।।7।।

पञ्चविंशतिभिः पद्मं दलेषु कलशाष्टकम्।
पञ्चकञ्च त्रिकं मध्ये दशकं सप्तकं बहिः।।8।।

---

1. विधिर्वक्ष्ये-ख
2. पञ्चाशत्येकहीने-ख

पञ्चविंशतिभिर्द्रव्यैरित ऊर्ध्वं वदाम्यहम्।
सप्तदशपुटे क्षेत्रे नवकोष्ठैरथाम्बुजम्।।9।।
दिक्षु त्रिकं विदिक्ष्वेकं नवान्तनवकं बहिः।
पुनष्षोडशकं तेषामन्तराले त्रिकं त्रिकम्।।10।।
ऊनाध्यर्द्धशतेष्वेवं स्नपनं परिकीर्तितम्।
(मध्ये मध्ये च जायन्ते सुरम्या)वीथयः क्रमात्।।11।।
क्षेत्रे धान्यपुटे पञ्चविंशाधिकशतद्वये।
ब्राह्मकोणेषु चै(तेषु) (संस्थाप्य तद्)गतान् घटान्।।12।।
स्नानमष्टाधिकैः प्रोक्तं द्विशतैः कलशैर्विभोः।
क्षेत्रे पात्रपुटे चान्तं नवानां नवकं नयेत्।।13।।
त्रीणि त्रीणि चतुर्दिक्षु कृत्वा द्वादशकं क्रमात्।
कोणेषु नवकं तद्वद्द्विपञ्चाशच्छतद्वये।।14।।
पञ्चकृतिपदैः पद्मं कृत्वा मित्रपुटे भुवि।
नवकं चाष्टकं मध्ये कल्पयेद् दिग्विदिक्षु च।।15।।
दशसप्तकमेषामप्यन्तरालेषु षड्द्वयम्।
त्रिशतैः कलशैःस्नानं पूर्वद्रव्यैरिहोदितम्।।16।।
मध्ये नवपुटैः पद्मं त्रिकमेकञ्च तद्बहिः।
नवकञ्चाष्टकं बाह्ये त्वन्तराले त्रिकं त्रिकम्।।17।।
दिग्विदिक्षु क्रमाद्बाह्ये कल्पयेद् द्वादशाष्टकम्।
त्रीणि त्रीणि चतुष्काण्यप्यन्तरालेषु दिक्क्रमात्।।18।।
प्राग्वा दशकमध्यस्थकुम्भं तैलेन पूरयेत्।
पूर्वादिदिग्गतां तोयैराग्नेयादिविदिग्गतान्।।19।।
तत्प्राच्यां मध्यमं याम्यमन्तरं शर्वविद्यया।
एवं तद्दक्षिणे कुम्भे तत्रस्थान् पूर्ववज्जलैः।।20।।
नाम्ना पशुपतेस्तद्वत्पश्चिमं तु भवाख्यया।
पयसा नालिकेरस्य नालिकेरजलैः पुनः।।21।।

महादेवाख्यया सौम्यं तीर्थाद्भिश्चानलं घटम्।
रुद्रायेति सरित्तोयैरीशानायेति नैर्ऋतम्।।22।।
इन्द्रायेति तटाकाद्भिर्वा[3] यव्यामथ शाङ्करम्।
भीमायेत्यथ कूपाद्भिर्विद्येशानां स्वनामभिः।।23।।
चतुष्काण्यपि सर्वाणि प्रादक्षिण्येन पूरयेत्।
पार्वतीं वृषशृङ्गस्थां वेदिजां क्षेत्रजामपि।।24।।
खलजामपि नादेयीं सामुद्रीं तीर्थजां क्रमात्।
पार्श्वद्वयचतुष्काणि गन्धाद्भिः पूरयेत्क्रमात्।।25।।
शतं सनवकं पूर्वं पूर्वद्रव्यैस्तु पूर्ववत्।
[4]पुराणोक्तविधानेन तन्मन्त्रैः स्नापयेच्छिवम्।।26।।
त्यक्त्वा द्वादशकं बाह्ये कृत्वा तु नवकं बहिः।
दिग्विदिक्ष्वन्तराले तु त्रीणि त्रीणि त्रिकाणि च।।27।।
सप्त सप्त च तद्बाह्ये नवकानि चतुर्दिशम्।
पूरणं स्नपनं सर्वं त्रिशतं पूर्ववत्स्मृतम्।।28।।
कर्पूरवानरावात[5]चन्दनाम्बुरुहायसैः।
प्राच्यां नवकमध्यस्थकुम्भात् सप्त नरेण च।।29।।
वैडूर्यं दक्षिणे नीलं मणिविद्रुमवज्रकान्।
मौक्तिकञ्चाप्यघोरेण तथा [6]मरकताम्बुभिः।।30।।
न्यग्रोधपिप्पलशिरीषपलाशविल्व-
प्लक्षाम्रसिद्धमथ पश्चिमतोऽप्यजेन।
गोधूमशालियवमुद्ग[7]तिलप्रियङ्गु-
निष्पावबीजनिकराण्यथ गुह्यकेन।।31।।

---

3. व्यायव्यामथ-ख
4. पूराणोक्त-ख
5. वानरतिदिच्चन्दन-ख
6. मरतकाम्बुभिः-ख
7. मुल्ग-ख

द्रव्यं सम्पूर्य खण्डस्य परितस्संस्थितान् घटान्।
शुद्धाद्भिर्नवकं न्यायात्तन्मन्त्रेणाभिषेचयेत्।।32।।
पञ्चाधिकैः पञ्चशतैः स्नानं कुर्यादुदाहृतम्।
पञ्चविंशतिभिर्द्रव्यैर्मन्त्रैस्सम्यगुदाहृतैः।।33।।
यथा सहस्रकलशैस्स्थाप्यते भगवान् हरः।
विभज्य नवधा क्षेत्रं कृत्वा सनवकं शतम्।।34।।
नवखण्डेषु भूयोऽपि मध्ये कोणगतेषु च।
यानि लुप्तानि कोणेषु तानि चात्र समर्पयेत्।।35।।
एवमुत्पाद्य सम्पूर्य स्नापयेत्तमुमापतिम्।
प्रतिष्ठान्ते यथा तद्वत् स्नपनान्ते द्विजोत्तमाः।।36।।
जुहुयुश्चाष्टदिक्ष्वष्टौ दिशाहोमान् दिशाधिपैः।
उत्सवञ्च ततः कुर्याद् यथा विभवविस्तरम्।।37।।
उत्सवं सप्तरात्रं स्यादार्द्रान्तं मार्गशीर्षके।
पुष्यान्तं कल्पयेत्पुष्ये (मघान्तं माघ) पश्चिमे।।38।।
[8]उत्तरान्तोत्तरे चैत्रे चित्रान्तं वा यथेच्छया।
वैशाखे तु विशाखान्तमार्द्रान्तं मासि मासि वा।।39।।
ध्वजं (पीठेषु) तं चाग्रे स्थापयेदष्टदिक्ष्वपि।
ग्रामान्ते ग्रामपर्यन्ते रथ्यासु [9]प्राङ्गणे पुनः।।40।।
पीठिकाञ्च पताकाञ्च स्थापयित्वाऽमुनार्चयेत्।

‘‘ओन्नमः पताकायै सर्वलोकस्य धात्र्यै। उत्सवस्य शिवस्याऽस्य त्रायस्व सदा नमः।।’’

बीजानि वापयित्वा तु बलिञ्च विकिरेन्निशि।।41।।
दिवसेष्वेषु चान्नाद्यं सार्वजन्यं प्रदापयेत्।
त्रिकालमर्चयेद्देवं बलिञ्च विकिरेत्ततः।।42।।

---

8. उत्रान्तमुत्तरे-ख
9. प्राङ्कणे-ख

निवेद्यं पायसं प्रातरि(ष्ट्वा) प्रासादविद्यया।
गौलं पञ्चात्मना मध्यङ्गते (स्यान्) मणिपञ्चभिः।।43।।
निवेद्यं कृसरं [10]वामे मध्यरात्रे नवात्मना।
सुसितं पायसैः स्निग्धं हारिद्रं कृसरं क्रमात्।।44।।
गौलं सर्वोदनं दद्यादीशाद्येषु मुखेषु च।
अलङ्कारैरलङ्कृत्य पत्रच्छेदादिभूषणैः।।45।।
परितो दीपमालाञ्च नृत्तं गीतं दिने दिने।
[11]वाद्यमध्ययनं पूजां स्तुतिं कुर्वीत सर्वदा।।46।।
सौवर्णं राजतं ताम्रं कौतुकं हविषापि वा।
संहृत्योत्पाद्य शूलं वाप्याहूयास्मिंस्तु मूलतः।।47।।
सकलीकृत्य चाभ्यर्च्य मूललिङ्गे च कौतुके।
ब्रह्मयानेन तन्नीत्वा त्रिकालं विकिरेद्बलिम्।।48।।
आरोप्य शिविकायां वा कुञ्जरे वा रथेऽपि वा।
बलिं दत्त्वाऽथ निर्माल्यमपनीय च कौतुकात्।।49।।
मूललिङ्गे नियोज्येशं भावयित्वार्चयेत्पुनः।
स्वस्थाने देवतानाञ्च भूतानां नामभिः क्रमात्।।50।।
विकीर्य बलिपीठे तु बलिशेषं समापयेत्।
एष नित्यबलिः प्रोक्तस्तथा च पार्षदैस्सह।।51।।
गणेभ्यो भूतकूरेण बाह्ये भूतबलिः स्मृतः।
स्वस्ति[12]सूक्तं गुरुर्जप्त्वा कौतुके स्थाप्य शङ्करम्।।52।।
सर्वोपकरणैः सार्द्धं तमा[13]दाय बलिं हरेत्।
ध्येयौ नन्दीमहाकालावन्तद्र्वारस्य पालकौ।।53।।

10. चास्तं गते पदं चात्मना रवौ-ग
11. पाद्य-ग
12. वाचयित्वा गुरुः स्वस्तिं-ग
13. मुत्सवाख्यं-ग

मन्त्राभ्यामथ नामभ्यामनयोर्विकिरेद् बलिम्।
प्रासादे दक्षिणस्यां वै दिश्यलिन्दे गजाननम्।।54।।

सम्पूज्य दक्षिणामूर्त्तिं बलिं दत्त्वा बहिर्व्रजेत्।
पृष्ठे च कौतुकं नीत्वा देवं दृष्ट्वा किरेद् बलिम्।।55।।

आघट्य च बलिं दत्त्वा द्वारमुद्घाटयेच्छुचिः।
नमस्ते द्वारियुक्ताय शूलहस्ताय धीमते।।56।।

दृष्ट्या निहतदैत्याय शङ्कराय नमो नमः।

तत्पारिषदेभ्यो नमः।

नमस्ते द्वारियुक्ताय परशुव्यग्रपाणये।।57।।

दृष्ट्या निहतदैत्याय शङ्कराय नमो नमः।

शूलपाणये परशुपाणये नमः।

दैत्यदर्पविनाशाय सहस्राक्षाय धीमते।।58।।

कुलिशव्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो।
इन्द्राय वज्रहस्ताय सुराधिपतये रुद्र (पार्ष)दे नमः।।59।।

तत्पारिषदेभ्यो नमः। नमो भूतेभ्यो भूतकृद्भ्यो भूतिकृद्भ्योऽरिष्टकृद्भ्यो नमः। सद्भ्यो सर्वगणेभ्यो नमो नमः। पूर्वस्यां दिशि दक्षमिच्छन्ति तेषां बलिं हरामि, मद्भ्यः क्षुद्रकेभ्यस्सर्वेभ्यस्तेभ्यस्तेभ्यो नमः।

उपस्थाय च नामादिमन्त्रैश्च विकिरेद् बलिम्।
त्रिवारं सप्तवारं वा बलिमुद्राश्च दर्शयेत्।।60।।

मुखं यस्सर्वदेवानां येन हव्यञ्च नीयते।
येन प्रवर्त्तते सर्वं नमस्तस्मै हविर्भुजे।।61।।

ओमग्नये तेजोऽधिपतये रुद्रपारिषदे नमः। तन्नमोभूतेभ्यः, आग्नेय्यां दिशि शक्तिपाणयः।

येन संह्रियते सर्वं येन धर्मश्च रक्ष्यते।
तस्माद् विभेति लोकोऽयं प्रेतनाथ नमोऽस्तु ते।।62।।

यमाय प्रेताधिपतये रुद्रपारिर्षदें नमः। तद् याम्यायां दिशि दण्डपाणयः। कृष्णाय भूतदक्षिणसदम्।।

राक्षसा यातुधानाश्च पिशाचाश्चाश्रयं त्रयम्।
तस्मै निऋतिरूपाय रक्षसां पतये नमः।।63।।

ओम् निऋतये रक्षोऽधिपतये रुद्रपारिषदे नमः। तन्नमो नैऋत्यां दिशि खड्गपाणयः श्यामाः।।

येन प्रसूयते सर्वं यस्मिन् सर्वं प्रलीयते।
अमोघपाशहस्ताय तस्मै वां पतये नमः।।64।।

वरुणाय जलाधिपतये रुद्रपारिषदे नमः। तद् ओम् वारुण्यां दिशि पाशपाणयः शबलाः, ये भूता पश्चिमसदः।।

पूर्यन्ते च ह्रियन्ते च येन प्राणादयः क्रमात्।
भूतानां पतये नित्यं नमस्तस्मै मरुत्वते।।65।।

वायवे प्राणाधिपतये रुद्रपारिषदे नमः। तन्नमो भूतेभ्यो वायव्यां दिशि अङ्कुशपाणयः पीताः।।

यत्प्रसादाज्जगत्सर्वं धनेन परिभूयते।
यक्षगुह्यकनाथाय धननाथ नमोऽस्तु ते।।66।।

कुबेराय यक्षाधिपतये रुद्रपारिषदे नमः। वैश्रवणाय धनाधिपतये नमः महाबलाय गुह्याधिपतये नमः। तद् ओम् सोमाय नक्षत्राधिपतये रुद्रपारिषदे नमः। तन्नमो भूतेभ्यः सौम्यायां दिशि गदापाणयः सिताः, ये भूता उत्तरसदः।।

येन कल्पाग्निना लोको युगान्तेष्ववदह्यते।
तस्मै ते ब्रह्मणः पुत्र विरुपाक्ष नमो नमः।।67।।

नमो भूतेभ्य ऐशान्यां दिशि शूलपाणयः कपिलाः।

यतो जाताऽखिला सृष्टिरन्ते याऽस्मिन् प्रलीयते।
नारायणात्मपुरुषाय नमस्ते ब्रह्मरूपिणे।।68।।

ब्रह्मलोकाधिपतये रुद्रपारिषदे नमः। तन्नमो भूतेभ्य ऊर्ध्वायां दिशि पद्मपाणयः। सूक्ष्मा ये भूता उपरि सदः।।

जगज्जन्मस्थितिध्वंसबन्धमोक्षैकहेतवे।
अनन्ताय नमस्तस्मै पुराणपुरुषात्मने।।69।।

अनन्ताय नागाधिपतये नमः पातालाधिपतये रुद्रपारिषदे नमः। तन्नमो भूतेभ्यः अधस्ताद् दिशि भगवतो ये गणा [14]विषिखपाणयः।।धूम्रा धूम्राक्षा धूम्रलोहिताः दिव्यन्तरिक्षभौमाः पातालनिवासिन्यश्चेहायान्तु शिवाज्ञया मामनुगृह्णन्तु प्रतिगृह्णन्तु पूजां सौम्यरूपधारिण्यस्ताभ्यो देवीभ्यो नमो नमः।।

स्वाहावाहनाय महाशम्भो शैलार्णवघनस्वनः। ऋषभाय नमस्तेऽस्तु सर्वदुष्टप्रशान्तये। ऋषभाय महाबलाय सौरभेयाय नमः। तद्वीरभद्राय नमः। वीरभद्राय विद्महे महाननाय [15]धीमहि तन्नः शान्तः प्रचोदयात्। तद्गणपतये नमः। एकद्रष्ट्राय विद्महे गजाननाय [16]धीमहि तन्नो दन्तिः प्रचोदयात्।। तद् ब्यों ब्रह्माण्यै नमः। ब्रह्मभूतायै नमः।। (ब्रह्मभूतायै विद्महे) कुशाहस्तायै [17]धीमहि तन्नो ब्रह्माणि प्रचोदयात्। तन्माहेश्वर्यै नमः, रुद्रभूतायै विद्महे शूलहस्तायै [18]धीमहि, तन्नस्शाङ्करी प्रचोदयात्।। तद् मं कौमार्यै नमः। स्कन्दभूतायै विद्महे शक्तिहस्तायै [19]धीमहि तन्नः कौमारी प्रचोदयात्।। तत् ह्रें वैष्णव्यै नमः। विष्णुभूतायै विद्महे चक्रहस्तायै [20]धीमहि, तन्नो वैष्णवी प्रचोदयात्।। तद् ह्रें बाराह्यै नमः। प्रजापतिभूतायै विद्महे गदाहस्तायै [21]धीमहि, तन्नो बाराही प्रचोदयात्।। तद् इन्द्राण्यै नमः। इन्द्रभूतायै विद्महे वज्रहस्तायै [22]धीमहि। [23]तन्न इन्द्राणी प्रचोदयात्। तच्चामुण्ड्यै नमः। चण्डभूतायै विद्महे पाशहस्तायै [24]धीमहि तन्नश्चामुण्ड्यै प्रचोदयात्।। तत्-

---

14. विषपाणयः-ख
15. धीमहे-ख
16. धीमहे-ख
17. धीमहे-ख
18. धीमहे-ख
19. धीमहे-ख
20. धीमहे-ख
21. धीमहे-ख
22. धीमहे-ख
23. तन्नो-ख
24. धीमहे-ख

स्वस्वनाम्ना स्वगायत्र्या स्वस्वपारिषदैः सह।
मातृणाञ्च बलिं दत्त्वा वक्ष्यमाणैश्च नामभिः।।70।।

समन्ततो मातृभ्यो नमः, लोकमातृभ्यो नमः, सर्वमातृगणेभ्यो नमः।। सर्वदिक्षूर्ध्वतोऽमुना नानारूपा मातरः प्रदिष्टास्ता व्यवस्थिताः। दिव्यन्तरिक्षभौमपाताल-निवासिन्यश्चेहायान्तु शिवाज्ञया मामनुगृह्णन्तु प्रतिगृह्णन्तु पूजां सौम्ये रूपधारिण्यस्ताभ्यो देवीभ्यो नमो नमः स्वाहायै तन्नमः पराय गोप्त्रे नमः। शास्त्रे शम्बरकुमाराय हस्त्यश्वाय नीलाय कालाय कपर्द्दिने रुद्रसुताय भूतनाथाय भवपुत्राय [25]धीमहि तन्नः शास्ता प्रचोदयात्।। तन्मूलेन नामभिः स्कन्दं यजेद् गायत्र्या गुहम्। सनत्कुमाराय विद्महे भवपुत्राय [26]धीमहि तन्नः स्कन्दः प्रचोदयात्। तत्-

इष्ट्वा बहिर्व्रजच्चण्डं स्कन्दवद् गोपुराद् बहिः।
गुरुश्चण्डेश्वरश्चण्डश्चण्डो निर्माल्यभोगवान्।।71।।

तीक्ष्णदंष्ट्रमृगास्यौ हि गोपुरद्वारपालकौ।
अष्टदिक्षु त्रिभिर्मन्त्रैरेकावृत्या बलिं हरेत्।।72।।

ध्वजमूलेषु तद्बाह्ये ध्वजेशानामनन्तरम्।
ये समस्तं जगद् व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः।।73।।

रुद्रपारिषदास्सर्वे गृह्णन्तु बलिमुत्तमम्।

नमो भूतेभ्यो भूतकृद्भ्योऽरिष्टकृद्भ्योऽरिष्टकृद्भ्यो सद्भ्यस्सदसत्सर्व-गणेभ्यस्तेभ्यस्ताभ्यो नमो नमः[27]।।

गृह्णन्तु बलिमेतत्तु बाह्यस्था विहगाननाः।।74।।
पातालाश्चैव मातङ्गा हीनाहीनाश्च ये गणाः।

तेषां सर्वेषां बलिं हरामि महद्भ्यः क्षुद्रकेभ्यस्तेभ्यस्तेभ्यस्तेभ्यो नमः

नन्दी चैव महाकालो भूतनाथो महीधरः।।75।।

पर्वतेशो गुहेशश्च कालपाशकपालिनौ।
दिक्पालबलमाश्रित्य दिक्पालानां पृथक् पृथक्।।76।।

25. धीमहे-ख
26. धीमहे-ख
27. द्वादशपटलप्रारम्भादेतावत्पर्यन्तं पाठः 'क' मातृकायां न प्राप्यते।

विंशद्भूतगणाः सन्ति तेषां भूयः शतं शतम्।
तेषां सहस्रमयुतं लक्षं [28]कोटिस्ततस्ततः।।77।।

तेषां भृत्यश्च भृत्यांश्च सर्वास्तान् परिचिन्त्य च।
विंशद्गणेभ्य इत्युक्त्वा दशदिक्षु बलिं हरेत्।।78।।

अधस्ताद्बलिमष्टाभ्यो विकीर्य नवमाय च।
प्रक्षिपेद्धरसेनाय बलिपीठस्य मध्यतः।।79।।

भूतिदो दुर्निरीक्ष्यश्च भीमरूपः सुलोचनः।
सुमुखश्च महाबाहुस्त्रिशिरास्त्रिभुजः क्रमात्।।80।।

पिङ्गलो हरसेनश्च स्वाहान्ताः प्रणवादिकाः।

हरसेनाय विद्महे महाबलाय धीमहि[29]। तन्नः शक्तिः प्रचोदयात्। दशमूर्तिपार्षदेभ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यस्सर्वगणेभ्यो नमो नमः स्वाहा। [30]असङ्ख्याकोटिगणाधिपाःभवन्तु संहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः।

एवं दत्त्वा बलिं पीठे गणेभ्यः सर्वदिक्षु च।।81।।

समस्तदिवसेष्वेवं दद्यात् कालत्रये बलिम्।
पूर्वेद्युस्तीर्थ[31]यात्रायां बलिमेवं प्रदाय च।।82।।

ऋषभं वाहनं ध्यात्वा तस्मिन्नारोप्य शङ्करम्।
ग्रामेषु विकिरेद्रात्रौ [32]भूतानि नामभिर्गुरुः।।83।।

[33]रथ्यासु देवायतनेषु चाप्सु
ग्रामावसानेषु चतुष्पथेषु।
[34]चैत्यद्रुमाणां भुवि पीठिकासु
द्विजक्षये वा ध्वजसन्निधौ च।।84।।

---

28. कोटी-ख
29. धीमहे-क
30. असंख्यातादि-क
31. नीत-क
32. नमो-ख, नमो भूतादिना गुरुः-ग
33. दक्ष्येषु-ग
34. चैत्यां-क

एवं ग्रामबलिं दत्वा मूले संयोज्य देशिकः[35]।
कौतुकं बन्धयित्वा तु शाययेदग्रमण्डपे।।85।।
एवं रुद्रपञ्चभ्यां मध्यरात्रे जयाबलिम्।।86।।
प्रासादमन्त्रेण च पञ्चमन्त्रैः
पञ्चाक्षरेणैव यजेत्त्रिकालम्।
निवेद्यमत्रापि च पायसान्नं
गौलं विशुद्धं कृसरान्वितं च।।87।।
पूर्वोदितं चेह निवेद्यमिष्टं
वक्त्रेषु विप्रान्परि[36]भोजयेच्च।।
अतीत्य रात्रौ विकिरेच्च यामं।
समापनं ब्राह्ममये मुहूर्त्ते।।88।।
त्रिंशत्प्रस्थैस्तु सम्पूर्णतण्डुलैश्च गुणाधिकैः।
निवेद्यं देवदेवस्य भोजनं बलिमेव हि।।।89।।
किञ्चिद्वैशेषिकं वक्ष्ये चोत्सवाख्यं जयाबलेः।
किरेन्नन्दीमहाकाल विघ्नेशानान्तु पूर्ववत्।।90।।
नमस्ते द्वारपालाय परशुव्यग्रपाणये।
नमस्ते द्वारपालाय त्रिशूलव्यग्रपाणये।।91।।

दृष्ट्या शूलपाणये परशुपाणये तद् (रुद्र) पार्षदेभ्यः दैत्यदर्पविनाशाय इन्द्राय सुराधिपतये। तद्-

नमो भूतादिमन्त्रेण दत्त्वा दत्त्वा पृथक् पृथक्।
बलिमप्यन्तरालेषु दण्डवच्छिद्रवर्जितम्।।92।।
सोमस्य च बलिं दत्वा पुनर्वैश्रवणाय च।
[37]तानन्तर्मातृशास्त्राणां पूर्ववन्मृगसन्निधौ।।93।।

---

35. कौतुकात्-ख
36. परिपूजयेच्च-ख
37. कानन्तमातृशां तृणां-ख

चाम्बादीनां बलिं दद्यान्मन्त्रेणानेन देशिकः।
चाम्बादीनां गणाः सर्वे कोटिकोटिगणाधिपाः।।94।।
भवन्तु सहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः।
दुर्गादेवीं गुहं चण्डं पूर्ववच्चैव गोपतिम्।।95।।
द्वारं पिधाय निर्गच्छेद्दण्डमार्गं प्रपूर्य च।
द्वारपालौ समभ्यर्च्य मन्त्रेणाघोष्यदिक् क्रमात्।।96।।
नद्यादिभ्यो बलिं दद्यात् विंशद्भूतगणैः सह।

ये समस्तं जगन्नन्दिने विंशद्गणेभ्यः।

पूर्वस्यां दिशि शिवस्य पर्यायेण च दिक्[38] क्रमात्।।97।।
दशदिक्षु बलिं दद्याद् भूतकूरेण पूर्ववत्।
बलिपीठं समासाद्य दिक्ष्वेशान्यां बलिं हरेत्।।98।।
त्रिः सप्तकृत्वः प्रत्येकं ये देवा[39] इति पूर्ववत्।
पुरःसराद्युपर्यन्तं पर्यायेण च पूर्ववत्।।99।।
पूर्ववद्बलिपीठे तु ग्रहेभ्यः पूर्ववद्बहिः।
गृह्णन्तु बलिमित्येवं ग्रहाणां बलिकर्मणि।।100।।
बलिप्रक्षेपणं कुर्यादितश्चोर्ध्वं च सर्वतः।
उत्तरे क्षेत्रपालाय पात्रशेषं निवेदयेत्।।101।।
एवं जयाबलिः प्रोक्तश्चोत्सवाख्या[40] दनन्तरम्।
पुण्याहं वाचयित्वा तु देवमावाह्य कौतुके।।102।।
मुक्ताफलं च सिद्धार्थान् हेमशुल्कांश्च वाससी।
क्षौमे निधाय सम्बध्य कौतुकं बन्धयेत्पुनः।।103।।
ऊर्णासूत्रेण हस्तस्य ध्यात्वाघोराख्यविद्यया।
शयने शाययेदग्रे मण्डपे वामविद्यया।।104।।

38. यदि-क
39. तामिति-ख
40. द्याद-क

शयने पूर्ववत्कल्प्यं[41] बीजाङ्कुरघटान्वितम्।
तां रात्रिं क्षपयेद्विद्वान् नृत्तगीतरवान्वितम्।।105।।
क्रियां तात्कालिकीं प्रातः कृत्वा मूले प्रयोजयेत्।
देवमभ्यर्च्य हुत्वाग्नौ बलिं च विकिरेत्पुनः।।106।।
घृतेन मधुनाभ्यज्य [42]चूर्णैरुद्वर्तयेच्छिवम्।
सुवर्णं राजतं ताम्रं कौसुम्भं शालितण्डुलम्।।107।।
यवं मुद्गं तथा माषमष्टगन्धं तु चूर्णयेत्।
उद्वर्त्याग्निं हृदा चूर्णं भक्तानां मूर्ध्नि निक्षिपेत्।।108।।
पुण्यं पापहरं तेषां तच्चूर्णं मूर्ध्नि संस्थितम्।
सङ्क्षाल्य सकलीकृत्य सम्पूज्यान्नं निवेदयेत्[43]।।109।।
यात्राहोमं पुनः कृत्वा स्वस्तिसूक्तं पठेद्गुरुः।
जगन्निर्माणसंहारस्थित्यनुग्रहकारकाः[44]।।110।।
देवानामीश्वरा देवाः मङ्गलं प्रदिशन्तु नः।
इत्युच्चार्य बहिर्गच्छेत् कौतुकस्थं वहन् विभुः।।111।।
यागोपकरणं सर्वं पालिकाद्याः सुमङ्गलाः।
आदाय च नदीं गच्छेत् पूर्वोत्तरदिशं गताम्।।112।।
एकावृत्या ददेदन्तरेका[45]वृत्या तथा बहिः।
देवानामथ भूतानां यथा प्राप्तं बलिं तथा।।113।।
अभूतकूरं देवानां भूतानां तेन दापयेत्।
भेरीशङ्खरवैः सार्धं ब्राह्मणानामनुज्ञया।।114।।
[46]गजैर्यानैर्द्विजैर्भूपैः विशूद्रैः [47]वनिताजनैः।
गेहं प्रदक्षिणीकृत्य यानं ध्यात्वा वृषं गुरुः।।115।।

---

41. कर्त्तव्यं-क
42. पूर्णै-ख
43. एषा पङ्क्तिः 'क' मातृकायां नास्ति।
44. एषा पङ्क्तिः 'क' मातृकायां न वर्तते।
45. रेता वृत्त्या-क
46. ध्वजैर्यागै-ख
47. वनितानर्नैः-क

अर्वाग्योजनतो गच्छेत् तीर्थमारोप्य शङ्करम्।
वेदिं कृत्वा तु तत्पार्श्वे स्नाप्य वेद्यां निवेश्य तम्।।116।।

पालिकाद्यैर्ध्वजैश्चित्रैः भूषयित्वाथ पञ्चभिः।
इष्ट्वा तं ब्रह्मभिस्तत्र कृत्वा चाग्निमुखं पुनः।।117।।

पक्वं [48]गायत्रिया [49]चाज्यं शतं सद्यादिपञ्चभिः।
सम्पातस्पर्शनं कृत्वा 'इमं मे गङ्ग'इत्यृचा'।।118।।

तीर्थमावाह्य संस्नाप्य कृत्वा पुण्याहमादरात्।
पञ्च [50]ब्रह्मार्ध्यमन्त्रैस्तु प्रोक्षयेयुश्च मूर्तिपाः।।119।।

लिङ्गस्नानं [51]गुरुः कुर्यान्मूर्तिपैस्तं वहन्विभुम्।
भूयोऽघमर्षणं कुर्यात्पुनर्मज्जेज्जनैः सह।।120।।

साधनानि जले क्षिप्त्वा समाप्यावभृथं गुरुः।
वेद्यामुत्थाप्य विन्यस्य सम्पूज्यान्नं निवेद्य च।।121।।

उत्थाप्यारोप्य यानेन गच्छेद् द्रुततरं गृहम्।
[52]गृहं प्रदक्षिणीकृत्य मूलबिम्बे नियोजयेत्।।122।।

तद्दिने कलशैः [53]स्नाप्यं सम्पूज्य विकिरेद् बलिम्[54] ।।123।।

**इति श्रीपाशुपते नन्दिप्रोक्ते द्वादशः पटलः॥**

48. गायत्र्या-ख
49. वाज्यं-ख
50. ब्रह्माख्य-ख
51. पुनः-ख
52. गेहं-ख
53. स्थाप्य-ख
54. अस्य पटलस्य कतिपये श्लोकाः 'ग' मातृकायामेकादशपटले प्राप्यन्ते।

# अथ त्रयोदशः पटलः

## नन्दिरुवाच

बलिभ्रमणकाले तु विघ्नं तत्र यदा भवेत्।
तत्र [1]होमं प्रकुर्वीत बीजमुख्येन सर्पिषा[2]।।1।।
ध्वजस्य पतनं यत्र छत्रस्य पतनं तथा।
नन्दीमभ्यर्च्य तेनैव शान्तिहोमं [3]समाचरेत्।।2।।
[4]भिन्ने तु कलशे पूर्णे स्नपनायाधिवासिते।
पूरयित्वापरं कुम्भं तस्मिन्नावाह्य पूर्ववत्।।3।।
अस्त्रमन्त्रेण जुहुयात् सर्पिषा [5]शतमाहुतीः।
तन्मन्त्रेण पुनर्जप्त्वा स्नापयेत्सघृतेन तम्।।4।।
विघ्निते देवकार्ये तु पूर्वोक्तां शान्तिमाचरेत्।
पतिते कौतुके भूमौ तीर्थस्नानविधौ पथि।।5।।
प्रासादेन हुनेदाज्यमष्टोत्तरशतं तदा।
समाप्य कर्मशेषं तु पूर्वोक्तां शान्तिमाचरेत्।।6।।
दोषेषु बहुरूपेण सहस्त्रं शतमेव वा।
अयुतं वा युतं लक्षं हुनेदनुदितेन च।।7।।

---

1. शान्तिं-ग
2. मन्त्रवित्-ग
3. च कारयेत्-ग
4. दिने-क
5. शतमाहुतिः-क

अयाज्ञिकैः पर्युषितैः कृमिकीटादिमिश्रितैः।
पूजिते पञ्चगव्येन [6]स्नापयेदविलम्बितम्।।8।।
उत्सवेषु च कर्तव्य[7]मुत्पातेषु तथैव च।
अन्नपूर्णं च गव्येन क्षीरेण परमेश्वरम्।।9।।
दध्ना च सर्पिषा स्नाप्य गन्धपिष्टेन लेपयेत्।
आच्छाद्य वाससा लिङ्गं सपीठं चाहतेन च।।10।।
गीतेनान्नेन परितः पूरयित्वा [8]समुच्चरन्।
अन्नसूक्तं पुनर्दध्ना मधुना [9]पयसा गुरुः।।11।।
आज्येन सेचयेदन्नं नालिकेरैश्च कादलैः।
कन्दैः पनसपक्वैश्च सहकारसमुद्भवैः।।12।।
छादयेच्चित्र[10]पुष्पेण मोदकैः कुशलो गुरुः।
पञ्चान्नं पञ्चवक्त्रेषु सोपदंशं निवेदयेत्।।13।।
ईशादिपञ्चभिश्चाज्यं मूलेन समिदादिकम्।
[11]निर्माल्यमपनीयाप्सु स्नाप्यैशमभिषेचयेत्।।14।।
रवेरुदयमारभ्य यावदस्तमनं[12] विभोः।
अर्चयेत्सविधानेन हुतभोजनसंयुतः।।15।।
एवं यो [13]यजते[14]ऽमुत्र शिववन्मोदते नरः।
प्रस्थादिकमथारभ्य सेचयेद्गोघृतेन यः।।16।।
सम्प्राप्य सकलान्कामान् रुद्रलोके महीयते।
कुम्भे मासि चतुर्दश्यां कृष्णपक्षे निशामुखे।।17।।

---

6. स्नापयित्वा-ख
7. मुत्वातेषु-ख
8. समाचरेत्-क
9. वचसा-क
10. चरुरूपेण-ख
11. निर्मल्य-ख
12. दस्तमयं-क
13. यः कुरुते-ख
14. मूर्तं-क

इष्ट्वा गजाननं रात्रौ देवमीशं समर्चयेत्।
पद्मे वा[15] शिवलिङ्गे वा पुष्पै[16]र्बिल्वैर्विमिश्रितैः।।18।।

प्रासादब्रह्मपञ्चार्णैः सविधानेन चार्चयेत्।
षड्बारमथवा भूयो व्यस्तया च समस्तया।।19।।

अर्चयेज्जीव[17] लिङ्गं[18] तत् पञ्चब्रह्माद्य[19] विद्यया।
त्रिवारमुच्च[20]रेत्पूर्वं पञ्चार्णेन विधानवित्।।20।।

घृतेन पयसा दध्ना स्नानकालेऽभिषेचयेत्।
अनेकदीपसंयुक्तं मङ्गलाङ्कुरशोभितम्।।21।।

नृत्तगीतसमायुक्तं पञ्चब्रह्मविधानतः।
पूजयेन्मण्डल[21] देवं लिङ्गे भूयस्तथैव च।।22।।

गव्यैर्व्यस्तैस्समस्तेन कलशैः[22] स्नापयेत्तदा।
इष्ट्वैवं ब्रह्मभिर्देवं भूयः प्रासादवर्त्मना।।23।।

[23]त्रिवारमर्चयेद्विद्वान् स्नानं पञ्चाक्षरोदितम्।
भूतानां हि बलिं दद्याद्यथा विभवविस्तरम्।।24।।

शिवाग्नौ जुहुयादन्नं ब्राह्मणानां मुखानले।
दक्षिणा गुरवे कार्या भोजनं सार्वका[24]मिकम्।।25।।

प्राप्याष्टगुणमैश्वर्यमिहैवं पूजयेच्छिवम्।
सायुज्यं[25] वाथ मुक्तिं वा प्राप्नोति च परत्र सः।।26।।

---

15. च-क, शिवलिङ्गेऽथवा पद्मे-ग
16. पुष्पे बिल्वविमिश्रिते-ख, पुष्पविल्वविमिश्रितैः-ग
17. अर्चयेच्छिवलिङ्गे-ख
18. तं-क
19. ब्रह्माख्यविद्यया-ख
20. त्रिवारमर्चयेत्-ख
21. मण्डपे-क
22. पञ्चभिः कलशैस्तदा-ग
23. त्रिकालं-ग
24. सर्वकामिकम्-ख
25. सायुजं-ख

दशशतघटसम्पूर्णैः क्षीरेण घृतेन वाथ[26] गन्धाद्भिः।
संस्नाप्य[27] देवमीशं पुनरपि सम्पूजयेच्च सिद्ध्यर्थम्[28] ।।27।।
ब्राह्मे मुहूर्ते सप्तम्यां त्रयोदश्यां सितेतरे।
पक्षे प्रासादमार्गेण देवमिष्ट्वा सविस्तरम्।।28।।
अग्निमुत्पाद्य हुत्वाग्नौ पक्वमाज्यं च पञ्चभिः।
अपामार्गसमित्सर्पिरन्नमाज्यं शतं शतम्।।29।।
नादेनाष्टाधिकं हुत्वा होमशेषं समाप्य च।
घृतेन पूर्ववद्धोमं सम्पाताज्यसमन्वितम्।।30।।
मध्याह्ने यागहोमादि पूर्ववद् ब्रह्मभिश्चरेत्।
उदुम्बरभवैस्तद्वद्रात्रौ होमं च पाटलैः।।31।।
यागहोमादिपञ्चार्णै[29]र्द्धाराछिद्रात्त्वहर्निशि।
शिरीषकल्कैरुष्णाद्भिर्निर्माल्यं परिशोध्य च।।32।।
वेदाध्ययनकर्तृभ्यो गुरवे दक्षिणां ददेत्।
नघृतसूक्तं च रुद्रं च पुर्होतारमेव च।।33।।
पुनः (शान्तिं)यजेद् विप्र रोदस्योः प्रथमामपि।
आद्यन्ते चोत्तरां शान्तिं जपेयुः[30] संहिताखिलाम्।।34।।
एवं यः कारयेद्धारां पञ्चमीषु विशेषतः।
सोऽपि रुद्रपदं प्राप्य मोदते रुद्रवच्चिरम्।।35।।
तिथ्यर्क्षवार[31] शुद्ध्यर्थं मुहूर्तफलसिद्धये।
ग्रहान्नव यजेद्विद्वान् पद्मे चाष्टदलान्विते।।36।।
नवशक्त्यादि[32] पर्यन्तमिष्ट्वा पीठं पुरोदितम्।

---

26. दास-क क्षीरैराज्यैः-ग
27. संस्थाप्य-क
28. सिद्धार्थम्-क
29. धोच्छिद्रावहं निशम्-क
30. संहिताखिला-क, संहिताखिलं-ख
31. सिद्धार्थं-क
32. शक्त्यादि पद्मपर्यन्त-क

सहस्रारपदस्यान्ते हुं [33]फडिति प्रणवादिकम्।।37।।
कालचक्रमनेनेष्ट्वा कर्णिकायां दिवाकरम्।
सोमं बुधं गुरुं शुक्रं पूर्वादारभ्य दिग्दले।।38।।
भौमं शनैश्चरं राहुं केतुमग्न्यादिपल्लवे[34]।
वर्णाद्रक्तं सितं रक्तं पीतं पीतसितासिते।।39।।
धूम्रं नीलं क्रमात्तेषां तद्बाह्येऽङ्गानि भास्वतः।
तद् 'बाह्येऽथ दिशां पालास्तद्(बाह्ये)ऽस्त्राणि दिक्क्रमात्।।40।।
अर्कैः [35]पलाशैः खदिरैरपामार्गैश्च पिप्पलैः।
उदुम्बरैः शमीवृक्षसमुद्भूतैर्विदन्तकैः[36] ।।41।।
कुशैः सर्वत्र दूर्वाभिर्द्रव्यालाभैः शतं शतम्।
[37]घृणिरित्युद्धरेत्पूर्वं सूर्य आदित्य इत्यपि।।42।।
अष्टाङ्गान्यष्टवर्णैस्तु पृष्ठोदरयुतानि च।
निवेद्यमेकपात्रे वा [38]नवपात्रेऽथ वा पृथक्।।43।।
मातृकावर्गपूर्वार्णैः बीजान्येवं[39] प्रकल्पयेत्।
तारादिनाममन्त्रैस्तु जपहोमादि चार्चनम्।।44।।
एवं कृते सदा पुष्टिःश्रीर्धनं रोगनाशनम्।
आयुः सौभाग्यसत्कान्तिः प्रतापश्च जयो भवेत्।।45।।
एवं यः कारयेत्पूजां भक्त्या देवस्य शूलिनः।
सोऽपि रुद्रपदं प्राप्य मोदते रुद्रवच्चिरम्[40] ।।46।।

**इति श्रीपाशुपते नन्दिप्रोक्ते त्रयोदशः पटलः॥**

**॥ क्रियाकाण्डं समाप्तम् ॥**

---

33. हुं फट्-क, वर्मास्त्रौ-ख
34. पल्लवैः-ख
35. पलाशजैः-क
36. विकङ्कतै-ख
37. अग्निरित्यु-ख
38. नवमात्रे-क
39. बीजान्येषां-ख
40. एतत्पटलस्य कतिपये श्लोकाः 'ग' मातृकायां द्वादशे पटले समुपलभ्यन्ते।

# अथ योगकाण्डम्

## अथ चतुर्दशः पटलः

### दधीच उवाच

ग्रन्थादौ सूचितो योगो नोदितो मे स्फुटो [1]मया।
त्वत्तः सम्प्रार्थये योगं ब्रूहि [2]तं पारमेश्वरम्।।1।।

### श्रीनन्दिकेश्वर उवाच

तन्त्रैः सुविदितो देवः सूत्रभाष्यादि[3]लक्षणैः।
प्रामाण्यमिह तन्त्राणामा[4]प्तप्रोक्ततया मतम्।।2।।
आप्तो हि भगवानीशस्तत्प्रोक्त[5]ममलं विदुः।
अल्पाक्षरमसन्दिग्धं सारवद्वि[6]श्वतोमुखम्।।3।।
अस्तोभमनवद्यं च सूत्रं स्मृति[7]विदो विदुः।
सूत्रार्थो व्यज्यते यत्र पदैः सूत्रानुसारिभिः।।4।।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।
आक्षेपञ्च समाधानं कृत्वा वादान्तराणि च।।5।।

---

1. स्फुटं त्वया-ख
2. तत्-ख
3. लक्षणः-क
4. मापूर्वो-ख
5. तत्त्वोक्त-ख
6. वन्निश्वतो-क
7. सूत्रविदो-ख

वितथीकृत्य या व्याख्या टीका सम्प्राहुरुत्तमाः[8]।
उक्तानुक्तदुरुक्तादिचिन्ता यत्र प्रजायते।।6।।

तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा मनीषिणः।
सगुणैर्दोषरहितैः शब्दैर्वदति यो नरः।।7।।

स वाग्मीत्यवगन्तव्यं तत्त्वोक्तममलं विदुः।
वादजल्प[9]वितण्डाभिः परतन्त्रविघा[10]तकृत्।।8।।

व्याख्यातं[11] तस्य कुर्वीत प्रमाणपरिनिष्ठितः।
[12]पदप्रमाणोपन्यासः स्वपक्षस्थापनान्वितः।।9।।

परपक्षस्य यः क्षेपः स्वपक्ष[13]स्थापनं विना।
शब्दिते वाक्छलोक्त्यादिनिगृहीत इतीरयन्[14]।।10।।

परपक्षस्य चाक्षेपो वितण्डा परिकीर्तिता।
दृष्टमक्षोद्भवज्ज्ञानं करणैर्योनि[15]दर्शनम्।।11।।

अनुमानं भवद्भाविभूतार्थज्ञानसाधनम्।
अग्निमान्पर्वतश्चायं दृष्ट्वा धूमं यथा गृहे।।12।।

उपमा यत्र सादृश्यादुपमेयार्थदर्शनम्।
यार्थादुत्पद्यते सेयमर्थापत्तिरिहेष्यते।।13।।

वेदतन्त्रादिभेदेन शाब्दं तु बहुधा स्मृतम्।
[16]स्वयंप्रकाश एतेषामात्मान्यैरनुमीयते।।14।।

---

8. एष सार्द्ध श्लोकः 'क' मातृकायां नास्ति।
9. वादं जल्पं-क
10. विघातवान्-ख
11. व्याख्यान्तं त्रीण्यं-ख
12. वाद-क, पाद-ख
13. स जल्पस्वपतं विना-ख
14. शब्दो वाक् लोक्यादि नि न इनीरयत्-क
15. कारणौर्यानि दर्शनम्-क
16. स्वयं व्रता........-क

वेदप्रामाण्यमप्युक्तं [17]तत्रैवाप्तो[18]दितेन हि।
वैरिणः क्षयमायान्ति जन्तोर्विज्ञापिते शिवे*।।15।।
कामः क्रोधश्च मोहश्च लोभश्च मदम[19]त्सरौ।
एते वैरिगणा यान्ति क्षयं योगाङ्गसेवनात्।।16।।
यमश्च नियमो धर्मो मनोवाक्कायजक्रियाः।
**श्रद्धा धृतिःप्रसादाख्यो मानसो धर्म उत्तमः।।17।।
सत्यप्रियहितालापो वाग्धर्म [20]इति कीर्तितः।
शारीरः परिचर्या शुद्ध्यनुग्रहमयस्त्रिधा।।18।।
ततस्सन्तोषमास्तिक्यं दानमीश्वरपूजनम्।
सिद्धान्तश्रवणो धर्मो ह्रीर्मतिश्च जपं व्रतम्।।19।।
एते हि नियमाः प्रोक्ता वर्णाश्रमगता अपि[21]।
जान्वोर्वोरन्तरे सम्यक् कृत्वा पादतले [22]उभे।।20।।
***ऋजुकायः सुखासीनः स्वस्तिकं तत्प्रचक्षते।
प्राणापान[23]समायोगः प्राणायाम उदाहृतः।।21।।
इन्द्रियाणां विचरतां विषयेषु स्वभावतः।
बलादाहरणं तेषां प्रत्याहारः स उच्यते।।22।।
यमादिगुणयुक्तस्य मनसः स्थितिरात्मनि।
धारणेत्युच्यते सद्भिः शास्त्रत[24]त्त्वार्थवेदिभिः।।23।।
ध्यानमात्मस्वरूपस्य वेदनं मनसा खलु।
समाधिः समतावस्था जीवात्मपरमात्मनोः।।24।।

---

17. तन्त्रे-क
18. चोक्तोदितेन-क; *र्योगाङ्गसेवनात्-ग
19. मदमत्सराः-क
20. इह-ख
21. श्लोक 18 तः एतत्पर्यन्तं पाठः 'क' मातृकायां नास्ति।
22. उभौ-ख
23. समो योगः-क
24. तात्पर्य-ख, ग; **शुद्धा-ग; ***बलमाहरणं-ग

[25]ब्रह्मण्यवस्थितिर्ये[26]षां समाधिस्तर्करूपिणी।
संयोगो योग इत्युक्तः [27]प्रकृतेः परमात्मनि।।25।।

योगो ज्ञानक्रियाभेदाद्द्विधा भवति केवलम्।
अन्तःकरणवृत्यायास्तेषामात्मैकता मता।।26।।

ज्ञानयोगस्समुद्दिष्टः कर्मयोगः क्रियात्मकः।
इष्ट्वादौ कर्मयोगेन ज्ञानयोगेन तं यजेत्।।27।।

कायिकैर्वाचिकैश्चैनं मानसैश्च पुनः पुनः।
स्थूले निवेशितं चित्तं पुनः सूक्ष्मे निवेशयेत्।।28।।

परे रूपे यदा युक्तस्तदासौ मुच्यते परात्।
परात्परतरं ज्योतिश्चिद्रूपमचलं ध्रुवम्।।29।।

यः पश्यति सुबुध्यासौ न पुनर्भुवि जायते।*
युक्ताहारविहारस्तु युक्तचेष्टः समाहितः।।30।।

एकान्ते विजने स्थाने निवाते शब्दवर्जिते।
बध्वा योगासनं योगी नत्वा च गुरुमात्मनः।।31।।

जपारम्भे तु तत्कार्यं सर्वं कृत्वाप्यतन्द्रितः।
पूजयित्वा शिवं पूजां तत्रैव प्रतिपादयेत्।।32।।

किङ्करत्वेन चात्मानं कृत्वाञ्जलिमधोमुखम्।
अभेदेन जगत्कृत्स्नं भावयेत्सचराचरम्।।33।।

प्राणानायम्य[28] मात्राभिः क्रमात्पूर्वोक्तवर्त्मना।
जानुं प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम्।।34।।

क्रियते योऽङ्गुलिस्फोटः सा मात्रेह प्रकीर्तिता।
यदा द्वादशमात्राभिः पूरकः क्रियते तदा।।35।।

---

25. ब्रह्मण्येव स्थिति-ख, या सा-ग
26. यासां-क
27. प्रकृतौ-क
28. प्राणायामस्व-ख
* यः पश्यति महायोगी न पुनर्जायते खलु-ग

रेचको द्विगुणाभिः स्यात् त्रिगुणाभिस्तु कुम्भकः।
तत्तत्रिगुणमात्राभिरुत्तरेषूत्तरेषु च।।36।।
समाधिः समतावस्था यदा [29]तावदिति क्रमात्।
तारमाधारमुद्दिष्टं प्रासादं स्कन्दमेव हि[30]।।37।।
शाक्तेयं तस्य नालं स्यान् नकारं ग्रन्थिरुच्यते।
मार्णपीठ[31]शिबीजाख्यपर्णकेसर[32]संयुतम्।।38।।
यार्णपल्लवमम्भोजं हृत्स्थमूर्ध्व[33]मुखं स्मरेत्।
कूटार्णपीठमध्यस्थबीजानि व्यापकानि तु।।39।।
केसराणि [34]स्वराण्याहुः स्पर्शार्णानि दलानि हि।
[35]मायाधारं [36]कलाकष्टं कालनालं हिरण्मयम्।।40।।
नियत्या [37]कार्णिकोपेतमविद्यारन्ध्रसंयुतम्।
विसरागमथाव्यक्तं ग्रन्थिपीठं गुणोज्वलम्।।41।।
बुध्यादिदल[38]सम्भिन्नं विकारोद्भूतकेसरम्।
विश्वस्यायतनं पद्मं ज्वालामालासमाकुलम्[39]।।42।।
यथा भवति षट्[40]कोशं विश्वस्यायतनं हि तत्।
तन्मध्ये तु त्रयीबिम्बं सूर्यसोमानलात्मकम्।।43।।

---

29. तालदिति-ख
30. च-ख, कुन्दमेव हि-ग
31. मार्णवित्राशिबीजाख्यं-क, मार्णपीठं हि बीजाढ्यं-ग
32. वर्ण-स्वर-क, वार्णकेसर-ग
33. मध्य-क
34. पुराण्याहुः-क
35. मायाधरं-क
36. कालकम्मं-ख, कालकन्दं-ग
37. कण्ठकोपेतं-ख, ग
38. बल-ख
39. 'क' मातृकायामेषा पङ्क्तिर्नास्ति।
40. तूलत्रिकोशं-क, लम्बती कोशं-ग

बिन्दुं विचिन्तयेदन्तः परमाकाशमुज्ज्वलम्।
तन्मध्ये तु शिखा तन्वी पीतवर्णत्व[41] मूपमा।।44।।

तस्याः शिखाया मध्ये तु संस्थितः परमेश्वरः।
ज्ञानं [42]तत्रैव विन्यस्य सोऽहमित्यवधारय।।45।।

एवं गुरुपदेशेन तत्त्वमस्यादिवारणैः[43]।
य एति परमां काष्ठां स मुक्तो योगवित्तमः।।46।।

एवं योगमिति प्रोक्तं मया ते पारमेश्वरम्।
योगयुक्तो भजे[44]न्नित्यं विद्यां पञ्चाक्षरीं जपेत्।।47।।

ध्यात्वा तु हृदयाम्भोजे कुन्देन्दुधवलं हरम्।
पूर्ववत्पञ्चवक्त्रं वाप्येकवक्त्रं त्रिलोचनम्।।48।।

अद्वितीयमनाद्यन्तं देव्यावासगणैर्वृतम्।
चतुर्धा प्रोच्यते[45] मन्त्रं मनोविश्वमनोमिति।।49।।

अयवापमयोङ्कारं[46] तत्तारं परमात्मनि।
नित्ये बुद्धे त्वनारम्भे भावातीते तु [47]भावयेत्।।50।।

अनया विद्यया व्याप्तं जगत्स्थावरजङ्गमम्।
हृन्मुखांसोरुयुग्मेषु षट्[48] वर्णान्क्रमशो न्यसेत्।।51।।

कण्ठ[49]मूले तथा नाभौ पार्श्वयुक्पृष्ठहृत्सु च।
मूर्धास्यनेत्रघ्राणेषु दोर्वत्सन्ध्यग्रकेषु च।।52।।

---

41. वर्णत्वनोपमा-क, शक्तीः पीतवर्णध्वनोपमम्-ग
42. ज्ञाननेत्रैव स्तन्न्यस्य-ख
43. चारणैः-क, सत्त्वमस्याभि धारणैः-ग
44. योगयुक्तोऽभवन्नित्यं-क
45. प्रोच्चरन्-ख
46. मयोन्तारं-ख
47. भवाद्भयेत्-ख
48. षट्पर्णा-क
49. कर्ण-क

सशिरोवक्त्रहृदय-जठरोरुपदेषु च।
हृदाननपरश्वेणाभी[50] त्याख्यवरदेषु च।।53।।
मुखांसहृदयेषु त्रीन् परान्यादोरुकुक्षिषु।
ऊर्ध्वाधः क्रमतः कुर्यात् गोलकान्यासमुत्तमम्।।54।।
न्यसेत्तत्पुरुषाघोरसद्यवामेशसञ्ज्ञकान्।
सतर्जनीमध्यमान्त्यानामिकाङ्गुष्ठकेषु च।।55।।
वक्त्रहृत्पादगुह्याख्य[51] मूर्ध्वस्वपि च नादिभिः।
प्राग्याम्यवरुणोदीच्यवक्त्रेष्वपि च मूर्धसु।।56।।
करदेहेषु चाङ्गानि भूयो देवं विचिन्तयेत्।
आदौ नमः प्रयोक्तव्यः शिवायेति ततः परम्।।57।।
सैषा पञ्चाक्षरी विद्या सर्वश्रुतिशिरोगता।
शब्दजातस्य सर्वस्य बीजभूतसमासतः।।58।।
बीजं हृल्लेखितं ज्ञेयं तत्स्वरूपं पुरोदितम्।
अस्याः पञ्चविधा वर्णाः प्रस्फुरद्रश्मिमण्डलाः।।59।।
पीतः कृष्णस्तथा धूम्रश्श्वेताभो रक्त एव हि।
पृथक् पृथक् प्रयोज्यास्ते बिन्दुनादविभूषिताः।।60।।
अर्धचन्द्राकृतिर्विन्दुर्नादो दीपशिखाकृतिः।
बीजद्वितीयं बीजेषु मन्त्र[53]स्यास्य क्वचित्स्मृतम्।।61।।
दीर्घपूर्वं[54] तुरीयस्य पञ्चमं शक्तिमादिशेत्।
गौतमश्च तथा चात्रिर्विश्वामित्रस्तथाङ्गिराः।।62।।
भारद्वाजश्च वर्णानां क्रमशो ऋषयः स्मृताः।
गायत्र्यनुष्टुप् त्रिष्टुप् चश्छन्दांसि [55]व्याहृतिर्विराट्।।63।।

---

50. परश्वेणाजित्या-क
51. मूर्ध्यपि-क
52. हृल्लेखकं-क
53. मन्त्रस्थास्य-क
54. सूपं-क
55. बृहती-ख

इन्द्रो रुद्रो हरिर्ब्रह्मा स्कन्दस्तेषां च देवताः।
[56]भूताक्षराणां स्थानानि पञ्चवक्त्राणि शूलिनः।।64।।

उदात्तः प्रथमो वर्णश्चतुर्थश्च द्वितीयकः।
(तृतीयः) स्वरितश्चैव मध्यमो निहतः स्मृतः।।65।।

स्नानं कृत्वा शुचौ देशे बध्वा रुचिरमासनम्।
ध्यात्वा स्वहृदि देवेशं देवीं च गुरुमात्मनः।।66।।

प्राङ्मुखोदङ्मुखो भूत्वा मौनी चैकाग्रमानसः।
विशोध्य पञ्चतत्त्वानि दहनप्लावनादिभिः।।67।।

मन्त्रन्यासं पुनः कृत्वा सकलीकृत्य विग्रहम्।
विद्यास्थानं स्वरूपं चाप्यृषिच्छन्दोऽधिदैवतम्।।68।।

बीजं शक्तिं तथा वाच्यं स्मृत्वा पञ्चाक्षरं जपेत्।
द्वात्रिंशल्लक्षमानेन पुरस्कृत्य पुनर्जपेत्।।69।।

पञ्चलक्षं हुनेदग्नौ हविषा वा घृतेन वा।
शतं वाथ सहस्रं वा जपेदष्टाधिकं पुनः।।70।।

उत्तमं मानसं जप्यमुपांशुर्मध्यमं [57]स्मृतम्।
अधमं वाचिकं प्राहुरागमार्थविशारदाः।।71।।

उत्तमं रुद्रदैवत्यं मध्यमं विष्णुदैवतम्।
अधमं ब्रह्मदैवत्यमिति शैवागमोदितम्।।72।।

यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः।
मन्त्रमुच्चारयेद्वाचा वाचिकोऽयं जपः स्मृतः।।73।।

जित्वा मात्रपरिस्पन्दमीषदुच्चारितोऽपि वा।
अपरैरश्रुतं किञ्चिच्छ्रुतो वोपांशुरुच्यते।।74।।

धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम्।
शब्दार्थचिन्तनं भूयः कथ्यते मानसो जपः।।75।।

---

56. भूताभराणां-क
57. विदुः-ख

वाचिकस्त्वेक एव स्यादुपांशुः शतमुच्यते।
सहस्रो मानसः प्रोक्तः सगर्भस्तच्छताधिकः।।76।।
प्राणायामसमायुक्तः सगर्भो जप उच्यते।
सगर्भादपि साहस्रः सध्यानो जप उच्यते।।77।।
अङ्गुल्या जपसङ्ख्यानमेकमे[58] तदुदाहृतम्।
रेखयाऽष्टगुणं विद्यात् पुत्रजीवैर्दशाधिकम्।।78।।
शतं स्याच्छङ्खमणिभिः प्रवालैस्तत्सहस्रकम्।
स्फटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते।।79।।
पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते।
कुशग्रन्थ्या च रुद्राक्षैरनन्तं गुणितं भवेत्।।80।।
त्रिंशदक्षैः कृता माला धनदा जपकर्मणि।
सप्तविंशतिसङ्ख्यातैरक्षैः पुष्टिप्रदा भवेत्।।81।।
पञ्चविंशतिसङ्ख्याकैः[59] कृत्वा मुक्तिं[60] प्रयच्छति।
अक्षैस्तु पञ्चदशभिरभिचारफलप्रदा।।82।।
अङ्गुष्ठं मोक्षदं विद्यात्तर्जनीशत्रुनाशिनी।
मध्यमा धनदा शक्तिं करोत्येषा ह्यनामिका।।83।।
कनिष्ठा रक्षणीप्रोक्ता मुनीन्द्र[61] जपकर्मणि।
अङ्गुष्ठेन जपेज्जप्यमन्यैरङ्गुलिभिः सह।।84।।
अङ्गुष्ठेन विना जप्यं कृतं यदशुभं भवेत्।
गृहे जपं समं विद्यात् गोष्ठे[62] दशगुणं भवेत्।।85।।
पुण्यारण्ये शतं विद्यात् ऋष्यारण्ये सहस्रकम्।
अयुतं पर्वते पुण्ये नद्यां लक्षमुदाहृतम्।।86।।

---

58. मेकमेकमुदाहृतम्-ख
59. संख्यातैः-ख
60. मूर्त्तिं-क
61. मुद्रे-क
62. विदुः-ख

कोटिं देवालये प्राहुरनन्तं शिवसन्निधौ।
सूर्यस्याग्नेर्गुरोरिन्दोर्दीपस्य च जलस्य च।।87।।
विप्राणां च गवां चैव सन्निधौ[63] शस्यते जपः।
तत्पूर्वाभिमुखं पश्यन्दक्षिणं चाभिचारकम्।।88।।
पश्चिमं धनदं विद्यादुत्तरं शान्तिकं भवेत्।
सूर्याग्निगुरुदेवानां द्विजानां चैव सन्निधौ।।89।।
अन्येषां च प्रशस्तानां मन्त्रं न विमुखो जपेत्।
पञ्चाक्षरस्य माहात्म्यं तद्विधिं तत्स्वरूपकम्।।90।।
वक्तुं न शक्यते विप्र[64] [65]वर्षकोटिशतैरपि।
वाच्यः शिवोऽप्रमेयत्वान्मन्त्रस्तद्वाचकः स्मृतः।।91।।
वाच्यवाचकभेदेन स्थितः सकलनिष्कलः।
विधिवाक्यमिदं शैवं शब्दब्रह्ममयं परम्।।92।।
साङ्गानि वेदशास्त्राणि संस्थितानि षडक्षरैः।
न तेन सदृशं तस्मान्मन्त्रमस्त्यपरं क्वचित्।।93।।
शिवज्ञानानि यावन्ति विद्यास्थानानि यानि च।
षडक्षरस्य सूत्रस्य तानि भाषा भवन्ति हि।।94।।
येनोम् नमः शिवायेति मन्त्राभ्यासस्थिरी[66] कृतः।
नमस्कारादिसंयुक्तं शिवायेत्यक्षरत्रयम्।।95।।
जिह्वाग्रे वर्तते यस्य सफलं तस्य जीवितम्।
आदिमध्यान्तनिर्मुक्तः स्वभावविमलः प्रभुः।।96।।
सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयश्शिवागमे।
तस्याभिधानमन्त्रोऽय[67]मभिधेयश्च स [68]स्मृतः।।97।।

---

63. शस्य तेजसः-क
64. वर्षैः-ख
65. कोटिकोटि शतैरपि-ख
66. स्थितिःकृतः-क
67. 'क' मातृकायां 96-97 श्लोकौ न स्तः।
68. संस्मृतम्-ख

अभिधानाभिधेयत्वान्मन्त्रसिद्धिः परः शिवः।
एतावद्धि शिवज्ञानमेतावत्परमं पदम्।।98।।
पदों नमः शिवायेति शिववाक्यं षडक्षरम्।
विधिवाक्यमिदं शैवं वैष्णवं ब्राह्ममेव हि।।99।।
अनेन विधिवाक्येन पूजार्थं भाषितं पुरा।
शास्त्रं पाशुपतं सिद्ध्यै प्रमाणेन सुभाषितम्।।100।।
यः सर्वज्ञः सुसम्पूर्णस्वभावविमलः शिवः।
लोकानुग्रहकर्ता यः स मृषार्थः कथं भवेत्।।101।।
यद्यथावस्थितं वस्तु गुणदोषैः स्वभावतः।
यावत्फलं च यत्पुण्यं सर्वज्ञस्तत्तथा वदेत्।।102।।
अजाताशेषदोषेण [69]सर्वज्ञेन शिवेन यत्।
प्रणीतममलं वाक्यं तत्प्रमाणं न संशयः।।103।।
तस्मादीश्वरवाक्यानि श्रद्धेयानि विपश्चिता।
यथार्थं पुण्यपापेषु तदश्रद्धो व्रजत्यधः[70]।।104।।
स्वर्गापवर्गसिद्ध्यर्थं भाषितं तत्सुभाषितम्।
बहुत्वेऽपि हि मन्त्राणां सर्वज्ञेन शिवेन तु।।105।।
प्रणीतममलं मन्त्रं न तेन सदृशं क्वचित्।
तस्मात्तत्त्च शास्त्राणामिदं शास्त्रमुदीरितम्।।106।।
प्रवरं सर्वमन्त्रेषु मन्त्रवच्च शिवोदितम्[71]।
ज्ञानानां परमं ज्ञानं गुह्यानां गुह्यमुत्तमम्।।107।।
हितानां च हितं नान्यच्छस्त्रं पाशुपतं विदुः।
यथाहं श्रुतवान् पूर्वं साक्षाद् भगवतो मुखात्।।108।।

---

69. सार्वज्ञेन-क
70. ब्रजत्यथः-ख
71. 'ख' मातृकायां 105 श्लोकादेतावत्पर्यन्तं पाठो नास्ति।

तथेदमखिलं तन्त्रं मया तुभ्यं निवेदितम्।
नादीक्षिताय दातव्यं नासंवत्सरवासिने[72] ।।109।।

नाभक्तायाविनीताय नान्यभक्ताय वा क्वचित्।
कृतज्ञाय विनीताय शुचये ब्रह्मचारिणे।।110।।

वक्तव्यं सर्वदाऽऽचार्यैरित्येवं[73] शिवशासनम्।
गुप्तं हि स्थापयेत्सर्वमगुप्तं नाशयेन्नरम्।।111।।

वेदमूलमिदं तन्त्रमाप्तप्रोक्ततया मतम्[74]।
तस्मात्सर्वप्रयत्नेन गोप्यमेतत् सदा बुधैः।।112।।

**इति श्रीपाशुपते नन्दिप्रोक्ते योगकाण्डावसानिके चतुर्दशः पटलः[75]॥**

**॥ योगकाण्डं समाप्तम् ॥**

---

72. सार्धैकपद्यमत्र 'ख' मातृकायां नोपलभ्यते।
73. नाशयेन्नरः-क
74. एषा पङ्क्तिः क ख मातृकयोर्नास्ति।
75. अस्य पटलस्य श्लोकाः कतिपये 'ग' मातृकायां द्वादशपटले प्राप्यन्ते।

# अकाराद्यक्रमेण पद्यानुक्रमणिका


| पद्यानुक्रमः | पटलः/पद्यसं. |
|---|---|
| अञ्जनाभं ततो वृत्तं | 4/24 |
| अंशैः पूर्वोदितैरेव | 7/29 |
| अकृतं च कृतं चैव | 2/55 |
| अग्नये चैव सोमाय | 6/57 |
| अग्नावग्निमुखं कृत्वा | 5/32 |
| अग्निं दूतं तु | 9/98 |
| अग्निं दूतमिति | 10/86 |
| अग्निं निधाय घोराग्निं | 9/8 |
| अग्निं होत्रेति | 9/97 |
| अग्निः प्रजापतिः सोमः | 1/14 |
| अग्निजिह्वोऽग्निनेत्रश्च | 9/36 |
| अग्निनान्तमनोरद्य वर्णैः | 3/73 |
| अग्निमभ्यर्च्य मूलेन | 4/123 |
| अग्निमारुतयोर्भूतिः | 9/71 |
| अग्निमुत्पाद्य हुत्वाग्नौ | 13/29 |
| अग्नीशरक्षो वाय्वग्रे | 4/74 |
| अग्नेस्तेजसि पद्मस्थं | 5/34 |
| अग्नौ हुत्वा बलिं | 10/19 |
| अग्रे हिरण्मयं | 10/56 |
| अघोरास्त्रेण सञ्ज्ञप्तान् | 5/3 |
| अघोरास्त्रेण सम्पूज्य | 9/51 |
| अघोरास्त्रेण सम्मन्त्र्य | 9/12 |
| अघोरास्त्रेण सम्मार्ज्य | 11/9 |
| अङ्गन्यासं पुनः कृत्वा | 10/44 |
| अङ्गानि करशाखासु | 4/33 |
| अङ्गानि करशाखासु | 4/16 |
| अङ्गानि कल्पयेद्विद्वान् | 4/87 |
| अङ्गीकृत्य जपेन्मन्त्रं | 4/39 |
| अङ्गुलत्रितयं दैर्घ्यं | 7/171 |
| अङ्गुल्या जपसङ्ख्यानमेकमेतदुदाहृतम् | 14/78 |
| अङ्गुष्ठं मोक्षदं | 14/83 |
| अङ्गुष्ठेन विना जप्यं | 14/85 |
| अङ्गैश्चतुर्भिर्मूलेन पञ्चार्णै | 4/63 |
| अङ्गैः कोणेषु | 9/103 |
| अङ्गैश्चतुर्भिर्मूलेन | 5/13 |
| अच्छिन्नधारया सिञ्चेत्कुड्यश्लेषं | 9/52 |
| अच्छिन्नधारयाप्येको नयेदग्रे | 9/130 |
| अजपाञ्च पुनर्मूर्ध्नि वर्णमाला | 3/83 |
| अजाताशेषदोषेण सर्वज्ञेन | 14/103 |
| अतत्त्ववेदिना नैव कारयेत् | 2/115 |
| अतिगुह्याष्टकं चाग्नौ | 2/71 |
| अद्भिः सम्पूर्य निक्षिप्य | 6/63 |
| अद्वितीयमनाद्यन्तं | 14/49 |
| अधस्ताद् गमिते | 10/94 |
| अधस्ताद्बलिमष्टाभ्यो | 12/79 |
| अधिवासनिकान् होमान् | 9/102 |
| अधिवासनिकान् होमान् | 10/83 |

| पद्यानुक्रमः | पटलः/पद्यसं. |
|---|---|
| अधिवासोदितैद्र्रव्यैः | 10/37 |
| अधोभाग मुखं | 7/9 |
| अध्वानं सम्प्रवक्ष्यामि | 2/2 |
| अनन्तः प्राग्दलाग्रे तु | 4/75 |
| अनया विद्यया व्याप्तं | 14/51 |
| अनले वानिले पीठे | 4/125 |
| अनुग्रहाय भक्तानां तानि | 4/59 |
| अनुमानं भवद्भाविभूतार्थज्ञानसाधनम् | 14/12 |
| अनेन चार्चयित्वा तु | 8/62 |
| अनेन दूषणेनाद्य दूषितं | 10/60 |
| अनेन विधिवाक्येन | 14/100 |
| अनेनाष्टाक्षरेणैव | 3/93 |
| अन्तः पद्मदलेष्वष्टौ | 9/58 |
| अन्तःकरणमित्याहुश्चित्तमत्र | 2/63 |
| अन्तराले त्रिकं चैवं | 7/124 |
| अन्तरालेष्वथैकैकं | 12/4 |
| अन्तरेकं बहिस्त्रीणि | 8/39 |
| अन्तर्बहिर्विभागेन | 6/24 |
| अन्तर्मण्डलमाद्यं स्याद् | 7/134 |
| अन्तस्त्रीणि बहिस्त्रीणि | 8/37 |
| अन्यद्वा शोभना | 7/8 |
| अन्यनेमिद्वयं कार्यंतयङ्गुलं | 8/25 |
| अन्याश्च मूर्तयः सर्वा | 4/117 |
| अन्याङ्गुलिचतुष्केण तृतीया | 8/26 |
| अन्याभ्यामर्ध्यपाद्यौ च | 9/64 |
| अन्येषां च प्रशस्तानां | 14/90 |
| अपनीय च निर्माल्यं | 4/18 |
| पद्यानुक्रमः | पटलः/पद्यसं. |
| अपामार्गसमित्सर्पिरन्नमाज्यं | 9/10 |
| अपामिति सितास्नानं | 7/112 |
| अप्सु स्थिता महाभागाः | 4/28 |
| अभिधानाभिधेयत्वान्मन्त्रसिद्धिः | 14/98 |
| अभिलाषा समस्तेषु शरीरं | 2/30 |
| अभिषिच्य लयं | 10/70 |
| अभूतकूरं देवानां | 12/114 |
| अमाध्यर्धशतेऽष्टौ च | 7/126 |
| अमुना त्रिकालमभ्यर्च्य | 9/26 |
| अयवापमयोङ्कारं तत्तारं | 14/50 |
| अयाज्ञिकैः पर्युषितैः | 13/8 |
| अयुतार्कसमं शुद्धं | 2/31 |
| अरूपिन् प्रथमस्तेजो | 3/45 |
| अर्कैः पलाशैः | 13/41 |
| अर्चने तु नमोऽन्ताः स्युः | 3/99 |
| अर्चयेज्जीवलिङ्गं तत् | 13/20 |
| अर्थवाक्यश्चतुर्थस्तु | 1/25 |
| अर्थशौचं मनश्शौचं | 1/35 |
| अर्धचन्द्राकृतिर्विन्दुर्नादो | 14/61 |
| अर्धहस्तप्रविष्टानि | 7/162 |
| अर्धेन पादहीनेन | 7/137 |
| अर्वाग्योजनतो गच्छेत् | 12/116 |
| अलङ्कारैरलङ्कृत्य | 7/75 |
| अलुप्तशक्तयेत्युक्त्वाद्वीङ्कार | 3/15 |
| अल्पगेहगते लिङ्गे | 10/101 |
| पद्यानुक्रमः | पटलः/पद्यसं. |
| अल्पमेकतमं वापि | 11/56 |
| अवस्त्रावीततोयेन | 7/116 |
| अविभेदेन तद्वाह्ये द्वारं | 8/35 |
| अशुद्धानि चतुर्विंशदेवं | 2/29 |
| अशोकमाधवीपर्णबदरैर्दुग्धभूरुहैः | 6/4 |
| अश्वत्थे वस्सुमित्राणं | 11/113 |
| अषण्ंिढ चैव ढिण्ंिढ च | 2/72 |
| अष्टद्विंशत्कलास्थानेष्वादरात्ताभिरेव च | 4/43 |
| अष्टदिक्शूलपद्मस्य खात्वा | 8/16 |

| पद्यानुक्रमः | पटलः/पद्यसं. |
|---|---|
| अष्टदिक्षु ध्वजामध्ये | 7/163 |
| अष्टप्रकृतिभिः सेयमष्टधा | 3/81 |
| अष्टबन्धे विशीर्णे तु | 10/100 |
| अष्टमूर्त्यधिपैः सार्धं | 2/76 |
| अष्टमोऽष्टाधिकैः प्रोक्तं | 7/128 |
| अष्टाक्षरस्य वर्णैर्वा | 5/14 |
| अष्टाङ्गान्यष्टवर्णैस्तु | 13/43 |
| अष्टाङ्गुलैस्तथा षड्भिः | 8/31 |
| अष्टाधिकशतं पूर्णां | 6/56 |
| अष्टाभिर्द्वादशार्णैस्तु | 3/103 |
| अष्टाविंशतिसङ्ख्यं वा | 9/110 |
| अष्टोत्तरसहस्रं तु गुणेदाद्यन्तौ | 3/108 |
| अष्टौ त्रयोदशाष्टौ च चतस्रः | 2/40 |
| असंस्थितपूर्वस्थित साक्षिन् | 3/52 |
| असुरः शोषरोगौ च | 6/31 |
| अस्तोभमनवद्यं च | 14/4 |
| अस्त्रमन्त्रेण जुहुयात् | 13/4 |
| अस्त्रेण क्षालयेत्पात्रं | 11/66 |
| अस्त्रेण लिङ्गं | 11/105 |
| अस्त्रेणाग्निं समादाय | 5/7 |
| अस्यान्त्यपञ्चवर्णैस्तु | 3/58 |
| अहङ्कारजतस्तस्मात्त्रिविधं | 2/59 |
| आकाशो धार्यते | 1/44 |
| आगमस्य वयं कर्तुं | 10/61 |
| आग्नेयमात्मपर्यन्तं विद्याख्यं | 2/96 |
| आग्नेया नववायव्यास्तावद्वैहायसा | 4/26 |
| आघट्य च बलिं दत्त्वा | 12/56 |
| आचण्डालान्तमन्नाद्यं | 7/117 |
| आचार्यस्सर्वतन्त्रज्ञस्तस्य | 1/33 |
| आज्यापामार्गनिर्गुण्डीतिलसर्षपपायसैः | 3/107 |
| आज्येन मधुनालिप्य | 8/79 |
| आज्येन सेचयेदन्नं | 13/12 |
| आत्मतत्त्वं तयोर्योगादीशानश्चाधिपः | 2/25 |
| आत्मशुद्धिं पुरा कृत्वा | 9/82 |
| आत्मा चैवान्तरात्मा च | 2/26 |
| आत्मानमन्तरात्मानं परमात्मानमेव | 4/52 |
| आत्मानमभ्यर्च्य च गन्धपिष्ठेन | 4/41 |
| आदाय हृदयादीशं | 5/52 |
| आदायाञ्जलिपद्मे तु | 4/54 |
| आदित्रिदीर्घभिन्नेन मूलाङ्गानि | 3/4 |
| आदौ चतुर्णां संयोज्य | 3/46 |
| आद्या त्वजा महादेवी | 2/21 |
| आनीय भगवद्गेहं | 7/13 |
| आनीयानीय कलशान् | 11/108 |
| आपः पुनन्त्वित्याचाममापो | 11/111 |
| आपत्सु रक्षयेन्मासं दत्वा | 8/70 |
| आप्तो हि भगवानीशस्तत्प्रोक्तममलं | 14/3 |
| आप्यायस्वेति च क्षीरं | 9/72 |
| आमूर्त्तिमयान् विप्रान् | 4/127 |
| आम्राशोकशमीप्लक्षजम्बुमालूरदाडिगैः | 7/99 |
| आयतं सूत्रमास्फाल्य | 8/11 |
| आयभागं क्षिपेत्क्षेत्रे | 7/53 |
| आयामतस्तालमात्रास्तारेणाष्टाङ्गुलाः | 6/51 |
| आयामाद्रत्निविस्ताराद् | 7/172 |
| आरूढभित्तिविस्तारमष्टधा | 6/65 |
| आरोप्य शिविकायां | 12/49 |
| आलिख्य पुरुषेणाङ्गमीशेन | 4/10 |
| आलिप्य कलशद्रव्यैस्तन्मन्त्रैरभिषेचयेत् | 9/69 |
| आलिप्यावोक्ष्य गव्येन | 9/44 |
| आलोक्य सर्वतन्त्राणि | 1/20 |
| आवाहयामि सगणं | 10/12 |
| आवाह्य परमं पूर्वं | 4/55 |
| आवाह्य सकलीकृत्य | 11/71 |
| आवाह्य सकलीकृत्य | 9/75 |

| पद्यानुक्रमः | पटलः/पद्यसं. |
|---|---|
| आसत्येन रजसेति देवस्य | 11/84 |
| आसत्येन रजसेति | 9/80 |
| आसने वस्त्रसंवीते निवेश्य | 1/38 |
| आस्तीर्योपरि वस्त्रेण | 9/60 |
| इच्छा या परमाशक्तिः | 2/86 |
| इति तन्त्रस्य तन्त्रत्वं | 1/29 |
| इन्द्रस्तु मरुतो | 10/29 |
| इन्द्राग्नी रोचना भूयः | 11/49 |
| इन्द्रादिनीलं स्फटिकं | 9/122 |
| इन्द्रादिलोकपालानामायुधानि च | 4/103 |
| इन्द्रायेति तटाकाद्विर्वायव्यामथ | 12/23 |
| इन्द्रियाणां विचरतां | 14/22 |
| इन्द्रो रुद्रो हरिर्ब्रह्मा | 14/64 |
| इन्धनानि क्षिपेत् | 5/10 |
| इष्टकासु च सम्पातं | 6/60 |
| इष्टकाहोमवत्सर्वं | 6/83 |
| इष्ट्वा गजाननं | 13/18 |
| इष्ट्वा बहिर्ब्रजच्चण्डं | 12/71 |
| इष्ट्वा बहिर्यजेच्चण्डं | 7/58 |
| ईशवामप्रशान्ताख्यपुरुषेशानपञ्चभिः | 5/28 |
| ईशादि पञ्च ब्रह्माणि | 2/19 |
| ईशादिपञ्चभिश्चाज्यं मूलेन | 13/14 |
| ईशानः कपिलः | 10/36 |
| ईशानः पितरस्वाहा | 11/98 |
| ईशानादि पुनर्मूर्द्धे | 3/41 |
| ईशे राजभयं | 7/146 |
| ईशो दशभुजो | 3/31 |
| ईश्वरश्चाप्यजोऽनन्त एकरुद्रश्च | 2/50 |
| ईश्वरोऽपि तथा भुक्त्वा | 2/24 |
| उग्रा तेजोवती सत्या | 4/105 |
| उच्छुष्टश्चापरो यामः | 2/37 |
| उत्तमं मानसं | 14/71 |
| उत्तमं रुद्रदैवत्यं | 14/72 |
| उत्तरानिलवारीशराक्षसस्थं | 7/54 |
| उत्तरान्तोत्तरे चैत्रे | 12/39 |
| उत्तरे धान्यकूर्चेषु | 6/54 |
| उत्तरेषु च तत्त्वेषु | 5/44 |
| उत्तानीकृत्य विन्यस्य | 11/69 |
| उत्तानौ तु करौ कृत्वा | 4/3 |
| उत्तिष्ठेति समुत्थाप्य | 9/78 |
| उत्तिष्ठेति समुद्धृत्य | 9/30 |
| उत्थाप्यारोप्य यानेन | 12/122 |
| उत्पत्तिं सर्वतन्त्राणां | 1/ 3 |
| उत्पातेषु समस्तेषु | 2/114 |
| उत्पातेषूपजातेषु भूयो | 11/1 |
| उत्पादयेद् वह्निमनन्तरं च | 5/1 |
| उत्सवं तीर्थयात्रां च | 10/46 |
| उत्सवं सप्तरात्रं | 7/106 |
| उत्सवं सप्तरात्रं | 12/38 |
| उत्सवेषु च कर्तव्यमुत्पातेषु | 13/9 |
| उत्सेधात्पादपीठस्य विस्तरात् | 7/173 |
| उदात्तः प्रथमो वर्णश्चतुर्थश्च | 14/65 |
| उद्घातावृत्तिभिः पूर्वं | 9/86 |
| उद्वास्य वरुणं चान्ते | 11/27 |
| उद्वाह्य पञ्चवक्त्राणि | 5/33 |
| उपमा यत्र | 14/13 |
| उपरिष्ठात्ततोऽनन्तं सहस्रफणमण्डितम् | 4/45 |
| उपर्युपरि संस्तीर्य तण्डुलैः | 9/15 |
| उपस्थाय च नामादिमन्त्रैश्च | 12/60 |
| उपस्थाय च नामानि | 7/61 |
| उमा चण्डेश्वरो नन्दी | 4/79 |
| ऊनाध्यर्द्धशतेष्वेवं | 12/11 |
| ऊर्णासूत्रेण हस्तस्य | 12/104 |
| ऊर्वोर्जन्वोश्च जङ्घास्थिकटिपार्श्वाङ्गुलीषु | 4/38 |

| पद्यानुक्रमः | पटलः/पद्यसं. |
|---|---|
| ऋजुकायः सुखासीनः | 14/21 |
| ऋषभं च पताकां च | 9/23 |
| ऋषभं वाहनं ध्यात्वा | 12/83 |
| ऋषभस्याथ चण्डस्य | 7/140 |
| ऋषयो लोकपालाश्च | 10/10 |
| ऋष्याद्या रक्तवर्णाभा | 3/87 |
| एक रुद्रमथैशान्यां त्रिमूर्तिमनले | 4/76 |
| एकद्वित्रैकभिर्द्वन्द्वैर्वर्णैरङ्गानि | 4/84 |
| एकपिङ्गेक्षमिशानभुवनेशपुरः सराः | 2/52 |
| एकरात्रं तु कलशे | 10/106 |
| एकविंशतिदर्भैस्तु कृत्वा | 11/12 |
| एकवीराष्टकं | 2/54 |
| एकहस्तं च पादोनं | 7/16 |
| एकादश पुटे क्षेत्रे | 7/121 |
| एकादशपुटे बाह्ये | 7/120 |
| एकादशापरान्विप्रान् | 11/8 |
| एकान्ते विजने स्थाने | 14/31 |
| एकापि या विभाति | 1/1 |
| एकावृत्या ददेदन्तरेकावृत्या | 12/113 |
| एकाशीतिघटेष्वेवमष्टोत्तरशते | 12/6 |
| एकेन पादुकं | 7/41 |
| एकैकं परितो बाह्ये | 6/19 |
| एते बलिभुजस्तत्र ग्रहाः | 8/67 |
| एते रुद्राश्च | 1/9 |
| एते हि नियमाः प्रोक्ता | 14/20 |
| एतैर्द्रव्यैः क्रियामद्भिर्बहुधा | 12/1 |
| एभिर्मन्त्रैश्च तं स्पृष्ट्वा | 9/90 |
| एवं कृते सदा पुष्टिःश्रीर्धनं | 13/45 |
| एवं कृतेऽल्पलिङ्गान्तामाहूय | 11/33 |
| एवं कृत्वा कुशाग्रैस्तं | 11/17 |
| एवं गुरुपदेशेन | 14/45 |
| एवं ग्रामबलिं दत्वा | 12/85 |

| पद्यानुक्रमः | पटलः/पद्यसं. |
|---|---|
| एवं जयाबलिः | 12/102 |
| एवं तु घटिका प्रोक्ता | 7/174 |
| एवं ध्यात्वा यजेदेतान् | 4/96 |
| एवं परिगृहीते तु | 9/54 |
| एवं पीठं प्रकुर्वीत | 7/122 |
| एवं मन्त्रगणं जप्त्वा | 10/58 |
| एवं यः कारयेत्पूजां | 13/46 |
| एवं यः कारयेद्धारां | 13/35 |
| एवं यः पूजयेद्देवं | 4/132 |
| एवं यो यजतेऽमुत्र | 13/16 |
| एवं योगमिति प्रोक्तं | 14/46 |
| एवं रुद्रपञ्चभ्यां | 12/86 |
| एवं शिवाग्निमुत्पाद्य | 5/20 |
| एवं हि प्लावनं | 11/16 |
| एवमुत्पाद्य दोषेषु | 5/25 |
| एवमुत्पाद्य सम्पूर्य | 12/36 |
| एवमुत्पाद्य सम्पूर्य | 7/104 |
| एवमेकैकबीजस्य | 3/77 |
| एवमेव विभोः पीठं | 8/83 |
| एषामेकतमं ज्ञात्वा | 7/160 |
| ऐक्षवं फलतोयं च | 11/87 |
| ओं ज्वलच्छिन्द हुं | 3/27 |
| ओं पञ्चमूर्तिने | 3/26 |
| ओं महेशाय विद्महे | 3/35 |
| ओं शिवात्मकं महातेजः | 3/55 |
| ओं सदो हुं | 3/24 |
| ओं सदोमप्यघोराय | 3/22 |
| ओषधीर्यावकं तैलं | 11/115 |
| औदुम्बराश्च काश्मर्यो | 9/104 |
| औदुम्बरोत्थाः समिधः | 11/36 |
| औमेयमाद्यं तारं | 3/70 |
| कण्ठमूले तथा नाभौ | 14/52 |

| पद्यानुक्रमः | पटलः/पद्यसं. |
|---|---|
| कण्ठस्य बिलविस्तारमष्टाङ्गुलमतः | 7/169 |
| कण्ठादिमौलिपर्यन्तं मुखं | 7/31 |
| कनिष्ठा रक्षणी प्रोक्ता | 14/84 |
| कनीयसीप्रमाणेन बिलं च | 7/195 |
| कपालमक्षमालां च शूलं | 3/7 |
| करदेहेषु चाङ्गानि भूयो | 14/57 |
| करोत्यृतुमती तत्र न जातो | 2/23 |
| कर्णिका पीतवर्णा स्यात् | 8/47 |
| कर्ता चाभिहितं | 10/67 |
| कर्तुः शिवस्यानुकूले | 8/52 |
| कर्त्ता च शिल्पिना | 6/2 |
| कर्पूरवानरावातचन्दनाम्बुरुहायसैः | 12/29 |
| कर्मज्ञा ब्राह्मणास्तद्वत्कोणेषु | 9/95 |
| कलयन्त्यखिलां सृष्टिं | 2/11 |
| कलशात्तोयरूपेण प्रतिमायां | 4/131 |
| कल्पं व्याकरणं ज्योतिष्षडङ्गं | 1/26 |
| कल्पयित्वाऽग्निमुत्पाद्य | 10/53 |
| कल्पयेल्लिङ्गविस्तारं | 7/22 |
| कल्पान्तार्कं सहस्राभं | 3/64 |
| कवचेनाम्बरं दत्वा | 4/67 |
| कषायं पञ्चगव्यं च | 9/57 |
| कामः क्रोधश्च मोहश्च | 14/16 |
| कायिकैर्वाचिकैश्चैनं मानसैश्च | 14/28 |
| कालचक्रमनेनेष्ट्वा कर्णिकायां | 13/38 |
| किञ्चिद्वैशेषिकं वक्ष्ये | 12/90 |
| किङ्करत्वेन चात्मानं | 14/33 |
| किमत्र बहुनोक्तेन | 3/92 |
| कुण्डार्थं वाथ पद्मार्थं | 8/5 |
| कुण्डार्धबाहुसूत्रं तत् | 8/14 |
| कुन्दं काञ्चननीलाभरक्तभास्करसन्निभाः | 3/30 |
| कुम्भयित्वार्चयेद् ध्यात्वा जीवं | 5/42 |
| कुम्भेषु तेषामपि | 10/92 |

| पद्यानुक्रमः | पटलः/पद्यसं. |
|---|---|
| कुलिशव्यग्रहस्ताय नमस्तेऽस्तु | 12/59 |
| कुशपुष्पाक्षताम्भोभिर्भूते क्रूरेण | 8/64 |
| कुशसर्षपदध्यम्बुयवक्षीरतिलाक्षतैः | 11/92 |
| कुशैः सर्वत्र दूर्वाभिद्रव्यालाभैः | 13/42 |
| कृणुष्वाष्टादशैराज्यं ये देवा | 9/9 |
| कृत्वा क्षेत्राङ्गुलानां | 7/50 |
| कृत्वा चाग्निमुखं हुत्वा | 5/54 |
| कृत्वा दशपुटं क्षेत्रं | 6/18 |
| कृत्वा दिशाहोममनन्तरञ्च | 10/84 |
| कृत्वा नवपुटं क्षेत्रं | 6/20 |
| कृत्वा सूत्राणि चास्फाल्य | 11/60 |
| कृत्वाधिवासं कलशेषु | 11/102 |
| कृत्वान्योऽन्यगताङ्गुल्यौ | 4/6 |
| कृत्वास्त्रयागं निर्गच्छेच्छिलार्थं | 6/93 |
| कृपाहस्तान्तमुद्दिष्टं त्रयन्त्रैराशिकं | 6/68 |
| कृष्णा रक्ता प्रारूढाश्च | 8/73 |
| कृष्णा शुद्धवती गन्धा | 2/80 |
| कृष्णेन दलसन्धिस्तु शेषं | 3/68 |
| के वक्त्रे हृदि गुह्ये च | 4/42 |
| केशैश्च कपिलैर्दीप्तं | 3/65 |
| केसराणि स्वराण्याहुः | 14/40 |
| कोटिं देवालये | 14/87 |
| कोणकर्णेष्वथैकैकं पदे | 6/21 |
| कोणग्रीवा शिला | 7/10 |
| कोणेषु दन्तिदन्तोत्थां मध्ये | 6/74 |
| कोणेषु मूर्तियागे तु | 4/118 |
| क्रमात् पञ्चाक्षरेणैव | 10/89 |
| क्रमात्तत्पुरुषाद्यैस्तु दीपानभ्यर्च्य | 6/8 |
| क्रमात्षोडशकोष्ठैस्तु मध्ये | 8/34 |
| क्रियते योऽङ्गुलिस्फोटः | 14/35 |
| क्रियां तात्कालिकीं | 12/106 |
| क्वचिज्ज्ञानं क्वचिन्नादं | 2/66 |

| पद्यानुक्रमः | पटलः/पद्यसं. |
|---|---|
| क्षमाग्नियजमानार्कवारीरणनिशाकराः | 1/41 |
| क्षितिर्वै धार्यते | 1/42 |
| क्षिप्त्वा माल्यानि | 5/27 |
| क्षीरेण दध्ना | 10/91 |
| क्षुरिकाष्टाक्षरी प्रोक्ता | 3/62 |
| क्षेत्रे कालपुटे मध्ये | 7/94 |
| क्षेत्रे धान्यपुटे | 12/12 |
| क्षेत्रे धान्यपुटे | 7/127 |
| क्षेमीशो ब्रह्मणः स्वामी | 2/33 |
| खड्गपाणिन्नरारूढं | 4/99 |
| खट्वाङ्गं परशुं शूलं | 4/80 |
| खट्वाङ्गं बालचन्द्रं च | 6/80 |
| खण्डेषु सदृशे कुण्डे | 11/34 |
| खलजामपि नादेयीं | 12/25 |
| खातस्य पार्श्वयोः | 7/44 |
| खात्वा पुरुषमात्रं तु | 6/16 |
| खात्वा वटं हस्तमात्रं | 6/6 |
| खादिराख्यसमित्सर्पिरन्नाज्यैश्च | 3/69 |
| गजवक्त्रैकदंष्ट्रौ च | 4/107 |
| गजैर्यानैर्द्विजैर्भूपैः विशूद्रै | 12/115 |
| गणानां मानुषे भागे | 7/178 |
| गणेभ्यो भूतकूरेण | 12/52 |
| गणेश्वराणां यागे तु | 4/119 |
| गत्वा शिलाकरं | 7/1 |
| गन्धतोयेन कुम्भेशं | 9/47 |
| गन्धपुष्पाक्षतकुशैः सकूर्चं | 11/15 |
| गन्धपुष्पैः समभ्यर्च्य | 10/2 |
| गन्धर्वो भृङ्गराजश्च | 6/30 |
| गन्धाद्यैः सम्यगभ्यर्च्य बलिं च | 6/26 |
| गन्धेनालिप्य वस्त्राभ्यां | 8/80 |
| गन्धैश्च विग्रजिह्वाभिर्यवैश्च | 6/38 |
| गन्धोदकं च जलधीनन्तः | 11/79 |
| गर्तं तु सुसमं नीत्वा | 7/182 |
| गर्भगेहं शिलाभिस्तु | 6/50 |
| गर्भजन्माधिकारं च | 5/39 |
| गर्भजन्माधिकारं च | 5/48 |
| गर्भाधानादिसंस्कारैः स्वकीयैरपि | 1/34 |
| गर्भावटं तु संशोध्य | 6/90 |
| गव्यैर्व्यस्तैः समस्तैश्च | 11/28 |
| गव्यैर्व्यस्तैस्समस्तेन कलशैः | 13/23 |
| गहनश्चास्य्यसाध्यश्च दशैशानो | 2/32 |
| गात्रं दिक्षु चतुष्कोष्ठैः | 8/40 |
| गायत्र्यार्घ्यं प्रदायार्कमण्डले | 4/12 |
| गालितैर्गोमयजलैर्वारुणे | 9/41 |
| गीतेनान्नेन परितः | 13/11 |
| गुणाधिकं समं | 11/93 |
| गुरुदेवोऽग्निशुश्रूषुस्सामान्यं | 1/36 |
| गुरुश्च मूर्तिमान्भूयः | 1/45 |
| गुह्यादीति पुनर्गोप्त्रे | 3/43 |
| गृहीत्वा चतुर्गृहीतं | 3/38 |
| गृह्णीयाच्च बलिं दत्वा | 6/12 |
| गृह्णीयाद्ग्रहयात्रार्थं | 10/23 |
| गेहं प्रदक्षिणीकृत्य | 10/76 |
| गो वा रज्वा समं | 10/80 |
| गोक्षीरवैणवान्नेन | 8/65 |
| गोमयेन दिशापानां | 11/106 |
| गौलं नवात्मना | 7/73 |
| गौलं सर्वोदनं | 12/45 |
| ग्रन्थादौ सूचितो | 14/1 |
| ग्रहयागं पुराकृत्वा | 9/118 |
| ग्रामे वा नगरे वापि | 6/5 |
| घनापनद्धसन्तानसुषिरादिमहास्वनैः | 9/67 |
| घृतेन पयसा दध्ना | 13/21 |
| घृतेन मधुनाभ्यज्य | 12/107 |

| पद्यानुक्रमः | पटलः/पद्यसं. |
|---|---|
| घोरघोरतरेत्युक्त्वा | 3/101 |
| चञ्चलत्वं प्रवासं च | 7/147 |
| चण्डरुद्रस्थूलगलस्तथा मातङ्गवक्त्रकः | 2/38 |
| चण्डालं वा श्वपाकं वा | 5/66 |
| चतस्रोऽष्टौ द्वादश वा | 6/52 |
| चतुरङ्गुलतो व्योम्नि | 5/46 |
| चतुरङ्गुलमायामं विस्तारं तु | 7/188 |
| चतुरश्रं धनुर्वक्त्रं | 10/85 |
| चतुरस्रं ततः कृत्वा | 8/7 |
| चतुरस्रं भगाकारमर्धचन्द्रं | 8/2 |
| चतुरस्रीकृतां कृत्वा | 7/25 |
| चतुर्थमेवं विस्तारं | 7/24 |
| चतुर्थस्वरसंयुक्तं पार्थिवोपरि | 2/100 |
| चतुर्धा तु समं भङ्क्त्वा | 8/42 |
| चतुर्बाहुं प्रियायुक्तं | 10/14 |
| चतुर्विंशतिधा भक्त्वा | 7/19 |
| चतुष्काण्यपि सर्वाणि | 12/24 |
| चरुणाज्येन गव्याक्तै | 9/18 |
| चलितं चालितं नष्टं | 10/47 |
| चाम्बादीनां बलिं | 12/94 |
| चित्रान्तमुत्तरे चैत्रे | 7/107 |
| चूर्णमुद्वर्तने प्रोक्तं | 8/87 |
| छत्रं च दर्पणं दत्वा | 9/77 |
| छत्राकमधुबाल्मीकस्वेदकीटादिसम्भवे | 11/41 |
| छन्दांसि वाक्पथे कल्प्य हृदये | 4/34 |
| छन्दोऽधिदैवते चास्य | 3/57 |
| छादयेच्चित्रपुष्पेण मोदकैः | 13/13 |
| जगज्जन्मस्थितिध्वंसबन्धमोक्षैकहेतवे | 12/69 |
| जगज्जन्मस्थितिध्वंससाधुमोक्षैकहेतवे | 7/70 |
| जटामण्डलसंयुक्तं | 3/28 |
| जटामण्डलिनो रुद्रा | 4/77 |
| जटामुकुटसंयुक्तं | 4/102 |
| जपारम्भे तु तत्कार्यं | 14/32 |
| जमदग्निर्गौतमश्च संवर्त्तक | 1/18 |
| जयप्रदे नमस्तुभ्यं | 7/110 |
